
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

४६३

अथचंद्रिकासहितकुवलयानंदप्रारंभः

श्रीगणेशायनमः अनुचिंत्यमहालक्ष्मींहरिलोचनचंद्रिकां कुर्वेकुवलयानंदसदलंकारचंद्रिकां १ चिकीर्षिताविघ्नसिद्धयइष्टदेवतां
स्तौति अमरीति अत्रचरणमेवपंकजमितिमयूरव्यंसकादिसमासाश्रयणात्परिणामालंकारः चरणेआरोप्यमाणस्यपंकजस्यारोपविषय
चरणात्मतापरिणतिंविनादुरितदूरीकरणक्रियार्थत्वासंभवात् परिणामःक्रियार्थश्चेद्विषयीविषयात्मनेतितल्लक्षणात् नचपंकजमिवचरण

अमरीकबरीभारभ्रमरीमुखरीकृतं दूरीकरोतुदुरितंगौरीचरणपंकजं १

मितिपूर्वपदार्थप्रधानउपमितसमासएवास्त्विितिशंक्यं अमरीणांकबरीभारस्यकेशपाशस्यसंबंधिनीसौगंध्यलोभात्तत्संसृष्टायाभ्रमरीतयामु
खरीकृतमितिविशेषणस्यानुगुण्याभावात् तस्यपंकजगतत्वेनैवप्रसिद्धेरिति एतद्विशेषणावगतेनचपादपतनेनाभिव्यज्यमानागौरीविषयासुरां
गनागतारतिःकविगतांतांपुष्णातीतिप्रेयोलंकारोपिबोध्यः १ ९ ९ ९

परस्परेति प्राञ्चौ पुरातनौ जायापती अर्थादुमामहेश्वरौ स्तुमः किंभूतौ प्रपंचस्य जीववर्गस्य मातापितृरूपौ निरुपाधिकपाश्रयत्वाद्धितोपदेष्टृत्वाच्च तथा परस्परसंबंधिन्यास्तपःसंपत्तेः फलवदाचरितं परस्परस्वरूपं ययोस्तौ अत्र परशब्दस्य क्रियाविनिमयविवक्षायां कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये इति वार्तिकेन द्विर्भाव असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्य इत्यनेन सुपः स्वादेशेच परस्परशब्दव्युत्पत्तेः पार्वतीतपःसमृद्धिफ

परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्राञ्चौ जायापती स्तुमः २

लायितः परमेश्वरः परमेश्वरतपःसंपत्फलायिता च पार्वतीत्यर्थो लभ्यते तपःसंपत्तेश्च फलं निरतिशयानंद इति तदुपमया परस्परं परमप्रेमास्पदलक्षणः शृंगारो व्यज्यमानः सौभाग्यातिशयव्यंजनमुखेन शिवयोर्भक्तिप्रकर्षे पर्यवस्यतीति सहृदयैराकलनीयम् मातापितराविति रूपकाभ्यामुक्तोपमयोः संसृष्टिः परस्परं चोपमयोः फलायितेत्येकवाचकानुप्रवेशलक्षणः संकर इति दिक् २

७

कुवल०
२

संप्रति प्रतिपिपादयिषितानामलंकाराणां व्युत्पत्तेः स्वतोऽपुरुषार्थतया फलत्वायोगात्तस्या रसास्वादोपयिकत्वेन फलत्वं प्रेक्षावतां प्रकृतग्रंथप्रवृत्तये सूचयितुं शृंगाररसाधिदेवतं श्रीकृष्णं प्रति रसास्वादानंदं प्रार्थयते उद्घाट्येति समुकुंदो मे मह्यं शश्वद्भवं शाश्वतिकं भग्नावरणतया सदाप्रकाशमानं श्रेयो विगलितवेद्यांतरमानंदं रसो वै स इति श्रुतेः रसपदाभिधेयं दिशातु ददात्वित्यर्थः यथाश्रुते मुक्तिप्रार्थनायाः प्रकृतेऽसंगत्यापत्तेः सकः यो धन्यैर्महामहिमपुण्यशालिभिर्नारदादिमुनिभिर्योगकलया योगकौशलेन हृदयाब्जस्य उरसोमध्यवर्तिनो हृदयपुंडरीकस्य कोशं मुकु

उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः २

लं अधोमुखतया विद्यमानं उद्घाट्य रेचकप्राणायामेनोर्ध्वमुखं कृत्वा चिराद्बहुकालं यथारुचि यथेच्छं गृह्यमाणो पि रामकृष्णाद्यभिमतमूर्तिध्यानगोचरीक्रियमाणोपि परितः पूर्णरूपमस्य तथाभूतोऽपरिच्छिन्नब्रह्मरूपः अविरतं निरंतरं मुक्तिदशायां स्फुरति प्रकाशत इति विरोधालंकारः औपासनिकरूपस्य कल्पितत्वेन च तत्परिहारः अथवा योगिभिरप्यचिंत्यस्वरूप इति माहात्म्यातिशयवर्णनं अत्र योगिगतभगवद्विषयकरतिभावस्य कविगतं तं प्रत्यंगतया प्रेयोलंकारः ३ छ छ छ

चं०टी०
२

चिकीर्षितस्य ग्रंथस्य प्रयोजनाभिधेये प्रदर्शयति अलंकारेष्विति एतच्चोभयान्वयि अलंकारेषु अर्थालंकारेषूपमादिषु विषये बालानामव्युत्पन्नानां तेष्ववगाहनस्य व्युत्पत्तेः सिद्धय इत्यर्थः तेषां ये लक्ष्यलक्षणे तयोः संग्रह इति नित्यसापेक्षत्वात्समासः लक्ष्यमुदाहरणं अलंकारत्वं च रसादिभिन्नव्यंग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठाया विषयितासंबंधावच्छिन्नाचमत्कृतिजनकतावच्छेदकतातदवच्छेदकत्वं अनुप्रासादिविशिष्टशब्दज्ञानादुपमादिविशिष्टार्थज्ञानाच्च चमत्कारोदयात्तेषु लक्षणसमन्वयः शब्दार्थयोर्ज्ञाननिष्ठचमत्कृतिजनकतायां विषयितयावच्छेदकत्वेन तद्वि

अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४

येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यंते ५

शेषणीभूतानुप्रासोपमादेस्तन्निष्ठावच्छेदकतावच्छेदकत्वात् रसवदाद्यलंकारसंग्रहाय व्यंग्योपमादिवारणाय च भेदद्वयगर्भसत्वं तोपादानं ४ परकीयग्रंथापहारशंकानिरासायाह येषामिति येषामलंकाराणां चंद्रालोके चंद्रालोकाख्यग्रंथे त एवेत्यनंतरं लिख्यंत इति शेषः तत्रस्थितानामपि केषांचिद्लेखनात्प्राय इत्युक्तं यथाऽनंतरश्लोकस्योत्तरार्धं तत्रैवं दृश्यते हृदये लेखतोरुच्चैस्तन्वंगिस्तनयोरिवेति स्वयं त्वन्यदेव विरचितमिति एवं तदीयत्वेन कथनादाशंकानिरासः ५

५ ६ ७ ७

संप्रत्यर्थालंकारेषु निरूपणीयेषु बहलालंकारघटकतया सुप्रसिद्धतया च प्रथममुपमालंकारं लक्षयति उपमेति अयं च लक्ष्यनिर्देशः शेषं लक्षणं सादृश्यलक्ष्मीश्चमत्कृतिजनकता तद्विशिष्टं सादृश्यमिति यावत् धर्मधर्मिणोरभेदोपचारात् लक्षणं व्याचष्टे यत्रेति यत्र काव्ये दृत्तित्वं सप्तम्यर्थः तत्र शक्तिलक्षणान्यतरसहकारेण बोधकत्वसंबंधेन उपमानमधिकगुणं चंद्रादि उपमेयं वर्ण्यमानं कामिनीवदनादि सहृदयः काव्य

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते कीर्तिः स्वर्गंगामवगाहते ६ यत्रोपमानोपमेययोः सहृदयहृदयाह्लादकत्वेन चारु सादृश्यमुद्भूततयोल्लसति व्यंग्यमर्यादां विनास्पष्टं प्रकाशते तत्रोपमालंकारः हंसीवेत्युदाहरणं ७ ६ ७

भावनापरिपक्वबुद्धिः व्यंग्यस्य मर्यादा प्रतीतिनियमरूपा यया सा व्यंजनेत्यर्थः अत्र चोपमानोपमेययोरिति स्वरूपकथनं न तु लक्षणांतर्गतं व्यावर्तनीयाभावात् आत्माश्रयापादकत्वाच्च उपमानत्वोपमेयत्वयोरुपमाघटितत्वात् एतच्चाग्रे व्यक्तीभविष्यति इत्थं चालंकारत्वे सति सादृश्यत्वमुपमालंकारलक्षणं बोध्यं एवमग्रेप्यधिकारप्राप्तमलंकारत्वविशेषणं बोध्यं हंसीत्यादि अत्र तावदिवार्थसादृश्ये निरूपितत्वसंसर्गेण हं

स्यादेरन्वयः सादृश्यस्य प्रयोजकत्वसंसर्गेण स्वर्गगावगाहनाश्रयत्वरूपे साधारणधर्मे तस्य च स्वरूपसंबंधेन कीर्तौ सादृश्यस्य निपातार्थतया नामार्थं
प्रति साक्षात्संबंधेन विशेष्यत्वे विशेषणत्वे च बाधकाभावात् तथा च हंसीनिरूपितसादृश्यप्रयोजकस्वर्गगाकर्मकावगाहनाश्रयत्ववती कीर्तिरि
ति बोधः ननु एवं स्वर्गगावगाहनमिव शब्दश्चेत्याद्यग्रिमग्रंथे धात्वर्थस्य समानधर्मत्वोक्तिर्विरुद्धेति वाच्यं तदाश्रयत्वस्य समानधर्मत्वे तस्य
तथात्वस्यौचित्यायातत्वेन विरोधाभावात् तथा सति तत्रैव कुतो न सादृश्यान्वय इति चेत् न धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गे
ण शाब्दबोधे विशेष्यतया विभक्त्यर्थोपस्थितेर्हेतुत्वात् नञ्निपातार्थभिन्नवृत्तित्वेन प्रकारताविशेषणीयेति वाच्यं घटो न पश्यतीत्यादौ घटाद्य
न्विताभावस्य कर्मतासंसर्गेण दर्शनेऽन्वयापत्तेः यदि तु धात्वर्थे पितासर्यवशात् सादृश्यान्वयोऽनुभवसिद्धस्तदा धात्वर्थनिष्ठविशेष्यतानिरूपितप्रका
रतासंबंधेन नान्वयबुद्धिं प्रति नञ्जन्योपस्थितेः प्रतिबंधकत्वमात्रं परिकल्प्य घटो न पश्यतीत्यादौ पूर्वोक्तान्वयबोधो निराकरणीय इति दि
क् एवमरविंदमिव सुंदरवदनमित्यादावरविंदादिनिरूपितसादृश्यस्य प्रयोजकतासंसर्गेण सुंदरपदार्थैकदेशेऽपि सुंदरत्वेऽनुभवबलाद
न्वयस्तद्विशिष्टस्य चाभेदेन मुखादौ इत्थं चारविंदनिरूपितसादृश्यप्रयोजकसौंदर्यवदभिन्नं वदनमित्यन्वयबोधः अरविंदसुंदरमिति समासे त्वरविं
दपदेन अरविंदनिरूपितसादृश्यप्रयोजकत्वं लक्ष्यते तस्याभेदेन पदार्थैकदेशे सौंदर्येऽन्वेति एवं चारविंदनिरूपितसादृश्यप्रयोजकाभिन्नसौंदर्यवदभि-
न्नं वदनमित्यन्वयबोधः एकदेशान्वयायोगादरविंदपदमेव लक्षणया सर्वार्थबोधकं सुंदरपदं तु तात्पर्यग्राहकमित्येके अरविंदमिव वदनमित्

चारविंदनिरूपितसादृश्यवद्वदनमिति बोधः सादृश्यस्य निपातार्थतयाभेदेन नामार्थान्वये बाधकाभावात् अरविंदमिव भातीत्यत्र भातेर्ज्ञानार्थकत्वे ऽरविंदपदस्य अरविंदनिरूपितसादृश्यप्रकारकज्ञानविषये लक्षणा तस्य चाभेदेन मुखादावन्वयः शेषं तात्पर्यग्राहकं पूर्वोक्तदिशा वा सादृश्य-स्यैव प्रकारितासंसर्गेण धात्वर्थेन्वयः अत्रैव सौंदर्येणेति धर्मोपादाने तृतीयार्थस्य प्रयोज्यत्वस्य सादृश्येन्वयात् सौंदर्यप्रयोज्यारविंदनिरूपित

इयं च पूर्णोपमेत्युच्यते हंसीकीर्तिः स्वर्गगावगाहनमिव शब्दश्चेत्येते षामुपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामप्युपादानात्

सादृश्यप्रकारकज्ञानविषय इति बोधः आद्यकल्पे तु अरविंदपदमेव सर्वार्थबोधकमितरत्तात्पर्यग्राहकमिति ध्येयं इयं च सादृश्यस्य पदार्थान्तरत्व मते शाब्दबोधरीतिरुपदर्शिता तस्य समानधर्मरूपत्वे तु चंद्र इव मुखमित्यादौ चंद्रवृत्तिधर्मवन्मुखमिति बोधः अत्रैवाह्लादकमिति समानधर्मोपादाने इवार्थस्य धर्मस्याह्लादकत्वे पदार्थैकदेशेऽन्वयः तदसहिष्णुतायां तु चंद्रनिष्ठाह्लादकत्ववति आह्लादकपदस्य लक्षणा चंद्रादिपदं तात्

र्याहकं चंद्रसदृशमित्यत्राप्येकदेशे साद्दश्ये चंद्रान्वयः ससंबंधिकत्वात् सदृशपदं वा चंद्रसाद्दश्यविशिष्टलाक्षणिकं अत्रैवाह्लादकत्वेनेत्युक्तावभे
दस्तुतीयार्थस्तस्य च सदृशपदार्थैकदेशे धर्मेन्वयस्तथा चाह्लादकत्वाभिन्नचंद्रवृत्ति धर्मवदभिन्नंमुखमिति बोधः सदृशपदमेव वा सर्वार्थबोधकमि
तरत्तात्पर्यग्राहकमित्येवंविधा अन्वयसरणिश्रेणयस्तत्र तत्र शब्दव्युत्पत्तिनिपुणैरनुसंधेया इत्यलं प्रसक्तानुप्रसक्तपरिचिंतनेन ६
पूर्णोपमेतीत्यनंतरमालंकारिकैरिति पूरणीयं तत्वं च विशेषत उपात्तशब्दशक्तिप्रतिपादितोपमानोपमेयकत्वे सति विशेषतः शब्दोपात्त
समानधर्मकत्वे च सति विशेषतः स्वनिरूढशब्दगम्यत्वं स्वपदमुपमापरं उपमानलुप्तायामपि लक्षणयोपमानप्रतिपत्तेस्तद्वारणाय शक्ती
ति उपमेयलुप्तायांस्मरवधूयंतीत्यादावात्मन उपमेयस्याध्याहृते नात्मानमिति शब्देन बोधनादुपात्तेति शब्दविशेषणं एवमपि तन्वीत्य
नेनाऽन्योपमेयस्य काव्यस्य सदृशं न दृश्यत इत्येवंविधायांलुप्तोपमानायामुपमानस्य च सदृशपदोपात्तत्वाद्विशेषत इति उपमेयोपमान
तावच्छेदकरूपेणेत्यर्थः धर्मलुप्तायामप्युपमावाचकेन सामान्यतो धर्मस्योपात्तत्वाद्विशेषत इति उपमाप्रयोजकतावच्छेदकरूपेणेत्यर्थः वा
चकलुप्तायामपि लक्षणयोपमानादिपदेनोपमावगमात्तद्वारणाय विशेषतः स्वनिरूढेति उपमायां च निरूढा इववद्वा यथा शब्दा इत्याद्यभियुक्तो
क्तिसंगृहीता इवादयः अत्र निपातरूपस्येवादेरुपसर्गवत् द्योतकत्वमेव कथमन्यथा शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिवेत्यादावुस्रादिप
दोत्तरतृतीयादिसंगतिः उस्रादेरुद्धरणक्रियांप्रत्यकरणत्वात् इवार्थसादृश्यान्वयित्वेन करणीभूतशरविशेषणत्वाभावाच्च द्योतकत्वे तूस्रा

दिपदस्यो स्त्वसदृशपरतयोस्त्वसदृशैः शरैरिति शरविशेषणत्वेन तृतीयादिसंगतिरिति वैय्याकरणमतं तु नादरणीयं उपास्यते गुरुरित्यादौ धात्वर्थासनक्रियाया अकर्मकतया कर्मलकारानुपपत्तिरूपबाधकस्योपसर्गवाचकताया भिवेवादिवाच्चकताया मभावेन दृष्टांतवैषम्यस्य स्फुटत्वात् विशेषणविशेष्ययोः समानविभक्तिकतायां विशेष्येण सहैकार्थं भवेद्यत्र विशेषणं तत्र लिंगादयः प्रायो विशेष्यस्था विशेषण इत्यनुशासनस्येवोपमानोपमेययोरपि तस्यां लिंगसंख्याविभेदेपि उपमानोपमेयता विभक्तिः पुनरेकैव उपमानोपमेययोरित्यनुशासनस्य सत्वेनोपमानपदोत्तरतृतीयादेः साधुत्वार्थतयोपपत्तेश्च तस्माद्वाचकत्वमेवेवादीनां युक्तं चैतत् अन्यथा सकलालंकारिकसंमतस्येवशब्दप्रयोगे श्रौतीत्वस्य दत्तजलांजलित्वापत्तेः रूढिप्रयोजनयोरन्यतरस्याभावेन चंद्रादिपदेन चंद्रसदृशलक्षणायां निषिद्धलाक्षणिकत्वरूपनेयार्थत्वदोषापत्तेश्च अपि च इवादेर्द्योतकत्वनये चंद्रादेरुपमानस्य पदार्थैकदेशतया तत्र साधारणधर्मान्वयानुपपत्तिरिति दिक् उपमानेत्यादि उपमानत्वं चोपमानिरूपकत्वेन विवक्षितत्वं तदाश्रयत्वेन विवक्षितत्वं चोपमेयत्वं साधारणत्वं च धर्मस्वारसिकमौपचारिकं बिंबप्रतिबिंबभावकृतं श्लेषकृतं वस्तुप्रतिवस्तुभावेन समासभेदाश्रयणेनेत्यनेकधा चित्रमीमांसायां प्रपंचितं तत्र स्वर्गगावगाहनस्य तथात्वमौपचारिकं कीर्तेनित्यस्वारसिकत्वाभावात् उपादानादिति वाचकस्योपादानं निर्देशः इतरेषां तु शब्देन प्रतिपादनं तदिति चिंतनीयं ६ ७

साधारण्यप्रकारविशेषोपदर्शनायोदाहरणांतरमाह यथावेति गुणदोषाविति गुणदोषावर्थात्परस्य गृह्णन्नुजानन्नु बुधः पंडितः पूर्वंपूर्वनिर्दिष्टं गुणं शिरसाश्लाघते आंदोलितेन शिरसा अभिनंदयति परंपरतोनिर्दिष्टंदोषं कंठेनियच्छति निरुणद्धि वाचाकंठात्बहिर्नोद्घाटयतीत्यर्थः कद्व इंदुक्ष्वेडौ चंद्रगरले गृह्णन्नुपाददान ईश्वरोहर इव सोपिहि पूर्वं चंद्रं शिरसाश्लाघते तत्पूर्वकं धारयति परंच गरलं कंठेनियच्छति स्थापयतीति

यथावा गुणदोषौ बुधो गृह्णन्निंदुक्ष्वेडाविवेश्वरः शिरसाश्लाघते पूर्वंपरं कंठेनियच्छति ७ अत्रयद्यपिउपमानोपमेययोर्नैकः साधारणोधर्मः उपमाने ईश्वरे चंद्रगरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसाश्लाघनं वहनं उत्तरस्य गरलस्य कंठेनियमनं संस्थापनं उपमेये बुधगुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्यपूर्वस्य गुणस्य शिरसाश्लाघनं शिरःकंपेनाभिनंदनं उत्तरस्य दोषस्य कंठेनियमनं कंठादुपरिवाचाअनुद्घाटनमितिभेदात्

क्ष्वेडस्तु गरलं विषमित्यमरः ७ शंकते अत्रयद्यपीति साधारणत्वेनाभिमतो धर्मः गृह्णन् शिरसाश्लाघते पूर्वमित्यादिनोक्तो यद्यपि नैको न साधारण इतियोजना गृह्णन्नित्यादिनोक्त एकोपि धर्मः साधारणो नेति वा यथाश्रुते साधारणस्य साधारणत्वाभावोक्तेरसंगतत्वापत्तेः साधारण्याभावे हेतुः उपमान इत्यारभ्य इतिभेदादित्यंतेनोक्तः ७ ७ ७

समाधत्ते तथापीति वस्तुगत्या साधारण्याभावेपीत्यर्थः चंद्रगरलयोरित्यादि यथाक्रमं चंद्रगुणयोर्गरलदोषयोश्चेत्यर्थः बिंबप्रतिबिंबभावेन प्रतीयमानसादृश्ययोरुपमानोपमेयधर्मयोर्भिन्नशब्दोपात्तत्वरूपेण अभेदात् अभेदाध्यवसायात् एतच्चसाधारणधर्मतेत्यत्रान्वेननेनान्वितं ज्ञानादीत्यादिना शिरसा वहनाभिनंदनयोः कंठस्थापनतद्बहिरनुद्घाटनयोश्चसंग्रहः गृह्णन्तीत्यादीत्यादिना च शिरसा श्लाघते कंठे निय

तथापि चंद्रगरलयोर्गुणदोषयोश्च बिंबप्रतिबिंबभावेनाभेदादुपादानज्ञाना
दीनां गृह्णन्तीत्येकशब्दोपादानेनाभेदाध्यवसायाच्च साधारणधर्मतेति पूर्वस्माद्विशेषः

च्छतीत्यनयोः संग्रहः अभेदाध्यवसायादिति अभेदस्याध्यवसायादाहार्यनिश्चयादित्यर्थः साधारणधर्मतेनेति साधारणधर्मत्वाभिमानविषयतेत्यर्थः पूर्वस्मात्पूर्वोदाहरणात् इतिविशेष इत्यन्वयः नचैवं साधर्म्यप्रतीत्युपपादनेपि वस्तुतस्तदभावात्कथमुपमालक्षणसमन्वय इति वाच्यं चमत्कारविशेषप्रयोजकसाधारणत्वाध्यवसायविषयधर्मत्वस्यैवोपमालक्षणत्वमित्यभिप्रायादिति ५ ५

लोके बिंबप्रतिबिंबभावव्यपदेशस्य गगनजलाशयादिगतचंद्रादिविषयतया प्रसिद्धेः कथं प्रकृते तद्व्यपदेश इत्याशंकायामाह वस्तुत इत्यादि अभिन्नयोः तथाध्यवसितयोः पृथगिति भिन्नशब्देनेत्यर्थः बिंबप्रतिबिंबभाव इति बिंबप्रतिबिंबभावपदवाच्यमित्यर्थः समय इति संकेत इत्यर्थः पूर्णायामुपमानादिसमग्रतानियमप्रसिद्धेस्तद्विपरीतायां लुप्तोपमायां सर्वलोपनियमाशंकानिरासाय लक्षणपूर्वकं तां विभजते वर्ण्येत्यादिना चकारो वाशब्दार्थे त

वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिंबप्रतिबिंबभाव इति आलंकारिकसमयः व र्ण्योपमानधर्माणामुपमावाचकस्य च एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा ८ तडिद्गौरींदुतुल्यास्या कर्पूरंती दृशोर्मम कांत्यास्मरवधूयंती दृष्टा तन्वी रहो मया ९ यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः न देतत्काकतालीयमवितर्कितसंभवं १० उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां वा प्रतिपादकशब्दाभावे न लुप्तोपमेत्युच्यते

दनंतरं च लोपे इत्यध्याहार्यं एवं चेतरेतरयोगाविवक्षया वर्ण्यस्योपमानस्य धर्मस्योपमावाचकस्य वा लोपे अन्यतमानुपादाने लुप्तोपमा सा च एकद्वित्र्यनुपादानैरष्टधा भिन्नेति पूर्वापराभ्यामुक्तं भवति ८ तडिदित्यादीन्युदाहरणानि अर्थतो व्याचष्टे उपमेयादीनामिति वस्तुनो लाघवात्पूर्णाभिन्नलक्षणं बोध्यं लक्षणवाक्यगतं क्रममुपेक्ष्योदाहरणक्रमानुसारेण विभागं दर्शयति ७, ७, ७,

कुवल० ७

यथेत्यादि वाचकलुप्तेति वाचकत्वंचात्रानुपूर्वीविशेषवत्तयोपमाबोधनेनिरूढत्वं तच्चशक्त्यानिरूढलक्षणयावा तत्राद्यमिवादेर्द्वितीयंतुतुल्य त्यदादेरितितदभावात्तडिद्गौरीत्यादौवाचकलोपः समासानुशासनेननिरूढलक्षणावगमेपिआनुपूर्वीविशेषवत्तयाशब्दविशेषस्यतदबोधना त् शास्त्रकृतइति शास्त्रप्रयुक्तइत्यर्थः कर्पूरंतीत्यत्रेति अत्रसर्वप्रातिपदिकेभ्यःक्विप्वावक्तव्यइत्यनेनविहितःक्विप्लुप्तोपित्स्मर्यमाणोध

सा चाष्टधा यथा वाचकलुप्ता १ धर्मलुप्ता २ धर्मवाचकलुप्ता ३ वाचकोपमेयलुप्ता ४ उपमानलुप्ता ५ वाचकोपमानलुप्ता ६ धर्मोपमानलुप्ता ७ धर्मोपमानवाचकलुप्ता चेति ८ तत्रोपमानलोपरहिताश्चत्वारोभेदास्तडिद्गौरीत्यादिश्लोकेनप्रदर्शिताः तद्भिन्नोभेदाउत्तरश्लोकेनदर्शिताः तत्रतडिद्गौरीत्यत्रवाचकलोपस्तडिदिवगौरीत्यर्थेउपमानानिसामान्यवचनैरितिस मासविधायकशास्त्रकृतः इंदुतुल्यास्येत्यत्रधर्मलोपःसत्वैच्छिकःनशास्त्रकृतः कांत्याइंदुतुल्यास्येत्यपिवक्तुंशक्यत्वा त् कर्पूरंतीत्यत्रधर्मवाचकलोपः कर्पूरमिवाचरंतीत्यर्थेविहितस्यकर्पूरवदानंदात्मकाचारार्थकस्यक्विपइवशब्दे नसहलोपात्

र्ममात्ररूपंआचारंबोधयति कर्पूरपदंचलक्षणयाकर्पूरसादृश्यं तस्यचातिरिक्तत्वेपूर्ववत्प्रयोजकतासंसर्गेणाचारेन्वयोधर्म रूपत्वेत्वभेदेन वस्तुतस्तुक्विप्लोपाप्रतिसंधानेपितथाबोधात्कर्पूरादिशब्दाएवकर्पूरादिसादृश्यप्रयोजकाभिन्नंतत्सादृश्याभिन्नंवाचारंलक्षयंतीतियुक्तं

चं० ७

ननु वाचकस्येवादेरनुपादानाल्लोपोयुक्तः साधारणधर्मस्यत्वाचाररूपस्य क्विबुपात्ततया कथं लोपस्तत्राह कर्पूरिवदानंदात्मकाचारार्थस्य क्विपइति कर्पूरस्येवेतीवार्थेवतिः आनंदात्मकः जनकतासंबंधेन वस्तुगत्या आनंदस्वरूपोय आचारस्तद्बोधकस्येत्यर्थः ननु क्विपू लोपाज्ञानेप्याचारप्रतीतेः कर्पूरादिपदानामेव तद्बोधकत्वपक्षे कथं धर्मलोपः संगमनीय इति चेत् अत्र प्राचः एवमपि तद्वाचकतया विहितस्य क्विपो लोपात्तल्लोपव्यपदेशः

अत्र धर्मलोप ऐच्छिकः नयनयोरानंदात्मकतया
कर्पूरंतीति तदुपादानस्यापि संभवादिति ६

अत एवात्र समानार्थकः क्यचूनोपात्तः तस्यालुप्तत्वादित्याहुः नव्यास्तु धर्ममात्ररूपस्याचारस्योपादानेपि आनंदत्वादिना विशेषरूपेणानुपादानाद्धर्मलोपोयुक्त एव अन्यथा इंदुतुल्यास्येत्यादेर्धर्मलुप्तोदाहरणस्यासंगतत्वापत्तेः नन्वेवं क्यजादावपि धर्मलुप्तास्यादिति वाच्यं इष्टापत्तेरित्याहुः

कुवल०
८

स्मरवधूयंतीत्यत्रेति ननूपमानादाचारइतिकर्मभूतादुपमानादाचारेक्यचो विधानात्स्मरवधूंरतिमिवाचरंतीत्यवगमेप्यात्मानमन्यांवेतिकथंनिर्णयस्तत्रा चं०
हविशेषणेति रत्यनुरूपाचरणस्यकांतिकरणकत्वरूपविशेषणसामर्थ्यादित्यर्थः कांतेःस्वरसतःस्वीयत्वावगमादितिभावः नचात्मनउपमेयस्यतन्वी
पदेनोपादानात्कथंलोपइतिवाच्यं तस्याद्वितीयांततयाकर्मभूतोपमेयासमर्पकत्वात् आत्मानमित्यध्याहृतेनैवतद्बोधात् अत्रचस्मरवधूपदेनस्मर

कांत्यास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः अत्रकांत्येतिविशेषणसामर्थ्यात्स्वात्मानंकामवधूमिवाचरंती
त्यर्थस्यगम्यमानतयास्वात्मनउपमेयस्यसहोपमावाचकेनानुपादानात् सलैछिकः स्वात्मानंस्मरवधूयंतीत्युप
मेयोपादानस्यापिसंभवात् काकतालीयमित्यत्रकाकतालशब्दौवृत्तिविषयेकाकतालसमवेतक्रियावर्तिनौते
नकाकागमनमिवतालपतनमिवकाकतालमितीवार्थेसमासाच्चतद्विषयादितिज्ञापकात्समासः उभयत्रोप
मेयंत्वस्यक्वचिद्गमनंतत्रैवरहसितन्व्याअवस्थानंचतेनत्वस्यतस्याश्चसमागमः

वधूसादृश्यंलक्ष्यते तस्यचप्रयोजकत्वसंसर्गे
णाभेदेनवाऽचारेन्वयः तथाचस्मरवधूसादृश्याभिन्नआत्मकर्मकोयआचारस्तदाश्रयस्तन्वीतिबोधः काकतालीयेति वृत्तिविषये समासविषये ज्ञापका
दिति इवार्थेसमासाभावेतद्विषयादित्यनेनेवार्थविषयसमासानुवादोऽनुपपन्नस्तत्ज्ञापकइत्यर्थः उभयत्र काकागमनतालपतनयोः उपमेयमित्यनं

तरंक्रमेणेतिशेषः तेनेति काकतालसमवेतक्रियापरयोः काकतालपदयोरिवार्थेसमासेनेत्यर्थः काकतालसमागमेति अयंभावः काकागमनतालपत
नयोरुपमानत्वेतदुपमेययोःस्वीयगमनतन्व्यवस्थानयोःपृथगनुपात्तत्वेनोपमेयतयान्वयायोगात्काकतालसमागमएवोपमानं इत्थंचकाकतालसमाग
मसदृशंकाकतालपदार्थस्तस्यचाभेदेनस्वीयतन्वीसमागमरूपेउपमेयेऽन्वयइति ततइति तादृशसमासोत्तरमित्यर्थः इतितदर्थइति काकतालप

काकतालसमागमसदृश इतिफलति ततःकाकतालमिवकाकतालीयमितिद्वितीयस्मिन्निवार्थे
समासाच्चतद्विषयादितिसूत्रेण इवेप्रतिकृताविस्यधिकारस्थेनछप्रत्ययः तथाच्चपतनदलितं
तालफलंयथाकाकेनोपभुक्तमेवंरहोदर्शनक्षुभितहृदयातन्वीत्वेनोपभुक्तेतितदर्थःततश्चात्र

दलक्षितस्यकाककृततालफलोपभोगसदृशस्याभेदेनतन्वीरतिलाभरूपेणोपमेयेनान्वयादितिभावः अत्रपतनदलितमितिरहोदर्शनक्षुभितहृदयेति
चबिंबप्रतिबिंबभावापन्नधर्मस्वरूपकथनंनत्वेवमन्वयाकारइतिबोध्यं नचसकृदुच्चरिताभ्यांकाकतालपदाभ्यांकथमुपमानद्वयावगमइतिवाच्यं
अनुभवानुसार्यनुशासनेनव्युत्पत्तिवैचित्र्यस्यस्फुटंप्रतिपत्तेरिति एवंदुरूहत्वात्सद्यंव्याख्यायतत्रोपमानलुप्तादींश्चतुरोपिभेदान्प्रदर्शयितुमाहततश्चेति

काकागमनेत्यादि काकागमनतालपतनरूपोयः समागमस्तद्रूपस्येत्यर्थः इदंचकाकागमनमिवतालपतनमिवेतिमहाभाष्यगतविग्रहवाक्यविरोध शंकापरिहारायोक्तं समागमस्यतादृशक्रियाद्वयाभिन्नत्वेनोक्तयुक्त्यातस्योक्तार्थएवपर्यवसानात् विशिष्टोपमायांविशेषणोपमावगतिवत्समागमोपमायामपितद्वयक्रिययोर्यथायोगंगम्यमानामुपमामभिप्रेत्यमहाभाष्यकृतांतादृशविग्रहवाक्यप्रणयनमित्याशयः धर्मस्यानुपादानइति तत्स्था

काकागमनतालपतनसमागमरूपस्यकाककृततालफलोपभोगरूपस्यचोपमानस्यानुपादानात् प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायांवाचकोपमानलोपः सर्वेप्ययंलोपश्छप्रत्ययविधायकशास्त्रकृतः अवितर्कितसंभवमितिसाधारणधर्मस्यानुपादाने प्रत्ययार्थोपमायांधर्मोपमानलोपः समासार्थोपमायांधर्मोपमानवाचकलोपः इतिसूक्ष्मयादृश्यावधारितव्यं एतेषामुदाहरणांतराणि विस्तरभयान्नलिख्यंते

नेअभवत्किंब्रवीमितेइतिपाठइतिभावः इतिश्रीमत्तत्सदुपाख्यरामभट्टसूरिवरात्मजवैद्यनाथविरचितायामलंकारचंद्रिकाख्यायांकुवलयानंदटीकायामुपमाप्रकरणंसंपूर्णं यद्यप्युपमानरूपणानंतरंतन्मूलालंकारेषुसंभवत्सादृश्या उपमेयोपमैवप्रथमंनिरूपयितुमुचितानत्वारोपितसादृश्यनिबंधनोनन्वयस्तथापितंद्वितीयसदृशव्यवच्छेदफलकतयातृतीयसदृशव्यवच्छेदफलिकामुपमेयोपमामपेक्ष्यत्वरीप्रोपस्थितिकमभिप्रेत्यप्रथमंनिरूपयति ९

उपमानोपमेयत्वमिति उपमानत्वमुपमेयत्वंचेत्यर्थः द्वंद्वांतेश्रूयमाणत्वात् विवक्ष्यतइतिचशेषः एवंचैकस्यैववस्तुनोयदुपमानत्वमुपमेयत्वं
चविवक्ष्यतेतदनन्वयइत्यन्वयः असंभवशंकानिरासायमध्येउदाहरणोक्तिः ननूक्तलक्षणस्यभणितिरिवमतिर्मतिरिवचेष्टेत्यादिरशनो
पमायामतिव्याप्तिः तत्रमत्यादेरेकस्यैववस्तुनउपमानत्वस्योपमेयत्वस्यचवर्णनात् अथैकस्यवस्तुनोयदेकनिरूपितमुपमानत्वमुपमेय
त्वंचेतिविवक्षितं एकपदस्यावृत्तिकल्पनात् इत्थंचरशनोपमायांमत्यादेश्चेष्टादिनिरूपितमुपमानत्वं भणित्यादिनिरूपितंतूपमेयत्वमि

उपमानोपमेयत्वंयदेकस्यैववस्तुनः इंदुरिंदुरिवश्रीमानित्यादौतदनन्वयः ११
एकस्यैववस्तुनउपमानोपमेयत्ववर्णनमनन्वयः वर्ण्यमानमपिस्वस्यस्वेनसाधर्म्यंना
न्वेतीतिव्युत्पत्तेः

त्येकनिरूपितोपमानोपमेयत्वविरहान्नातिव्याप्तिरित्युच्यते तदारवमिवजलंजलमिवखमित्युपमेयोपमायामतिव्याप्तिः तत्रैकस्यैववस्तुनोगगनस्य
एकजलनिरूपितस्योपमानत्वस्योपमेयत्वस्यचवर्णनादितिचेन्नैवं एकस्यैवेतिविरोधद्योतकैवकारबलेनस्वाश्रयनिरूपितयोरुपमानोपमेयत्वयोर्लाभेन
क्वाप्यतिप्रसंगाभावात् अस्तिहिइंदुरिंदुरिवेत्यनन्वयेउपमानत्वमुपमेयत्वंचस्वाश्रयेंदुनिरूपितं नतुरशनोपमायामुपमेयोपमायांवेतिसंक्षेपः ७

अनन्वयपदप्रवृत्तिनिमित्तमाह वर्ण्यमानमपीति नान्वेतीति नसंबध्यतइत्यर्थः साधर्म्यस्यभेदघटितत्वादितिभावः नन्वेवंसत्यसंबद्धप्रलापत्वापत्तिरि त्यतआह अनन्वयिनोपीति बाधितस्यापीत्यर्थः अर्थस्य साधर्म्यस्य अभिधानं आहार्यारोपरूपतयाप्रतिपादनं सदृशांतरव्यवच्छेदेन सदृशांतरव्या वृत्तिबोधद्वारेण एतदेवविशदयति इंदुरित्यादिना इत्थंचसदृशांतरव्यावृत्तिसूचनद्वारानुपमत्वद्योतनरूपप्रयोजनवत्वादापाततोरुदइरोदनार्थवादवत्

अनन्वयिनोप्यर्थस्याभिधानंसदृशांतरव्यवच्छेदेनानुपमत्वद्योतनायेंदुरिंदुरिवश्रीमानित्युक्तेश्रीमत्वेन
चंद्रस्यनान्यःसदृशोस्तीतिसदृशांतरव्यवच्छेदोलक्ष्यते नतस्थ्वस्वेनापिसादृश्यासंभवादनुपमेयत्वेपर्यव
सानं यथावा गगनंगगनाकारंसागरःसागरोपमः रामरावणयोर्युद्धंरामरावणयोरिव पूर्वोदाहरणे
श्रीमत्वस्यधर्मस्योपादानमस्तिइहतुगगनादिषुवैपुल्यादेर्धर्मस्यतन्नास्तीतिविशेषः ९ ९

द्वारमात्रतयासादृश्यप्रतिपादनेपिनासंबद्धप्रलापतापत्तिरितिभावः उदाहरणांतरमाह यथावेति गगनाकारं गगनसदृशं इवेत्यतःशाक्रयुद्धमित्यध्याहार्यं
उदाहरणांतरप्रदर्शनेबीजमाह पूर्वोदाहरणेति वैपुल्यादेरित्यादिपदाद्गांभीर्यदारुणत्वयोः संग्रहः इत्यनन्वयप्रकरणं ९

अथोपमेयोपमां लक्षयति पर्यायेणेति अयोगपद्येनेत्यर्थः वाक्यभेदेनेति यावत् तत् उपमानोपमेयत्वं विवक्ष्यत इति शेषोऽत्रापि बोध्यः उपमेयोपमेतिलक्ष्यनिर्देशः उपमेयेनोपमेति व्युत्पत्तेः धर्मोऽर्थ इवेत्युदाहरणं अर्थो धनं पूर्णश्रीः पूर्णसमृद्धिः अत्र च धर्मार्थयोर्द्वयोर्वाक्यभेदेन उपमानत्वमुपमेयत्वं च वर्णितं तत्राद्यवाक्येऽर्थस्योपमानत्वं धर्मस्योपमेयत्वं द्वितीये तु तद्विपर्यासेन धर्मस्योपमानत्वमर्थस्योपमेयत्वमिति लक्षणसमन्वयः उपमानोपमेयत्वमात्रोक्तावनन्वयेऽतिव्याप्तेर्द्वयोरित्युक्तं एवमपि समलंशारदिप्रापुरहो कुमुदतारका इत्युभयविश्रांतसादृश्यायामुपमायामतिव्याप्तिः तत्र द्वयोः कुमु

पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव

त्वयि १२ द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृतीयसदृशव्यवच्छेदार्थं

दतारकयोः सादृश्याश्रयत्वरूपोपमेयत्वस्यैव तत्प्रतियोगित्वरूपस्योपमानत्वस्याप्यर्थतः प्रतीतेरतः पर्यायेणेत्युक्तं ननु भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमलेति रशनोपमायामतिव्याप्तिः तत्र द्वयोर्मतिचेष्टयोर्वाक्यभेदेनोपमानोपमेयत्ववर्णनादिति चेत् न द्वयोरित्यनेन परस्परमुपमानोपमेयत्वस्य विवक्षितत्वात् अन्यथा पर्यायपदेनैवानन्वयवारणे तद्वैयर्थ्यापत्तेरिति संक्षेपः ननूपमाप्रतीपाभ्यां रूपायाउपमाद्वयरूपाया वा उपमेयोपमाया अलंकारांतरत्वे किं बीजमित्यत आह द्वयोरिति तथा चार्थविशेषद्योतकतया चमत्कृतिवैलक्षण्यमेव तत्र बीजमिति भावः ४

कथंतृतीयसदृशव्यवच्छेदलाभस्तत्राह धर्मार्थयोरिति धर्मार्थयोर्मध्य इत्यर्थः मुखतः शब्देन तथावभासस्य पुनर्वचनं तदितरपरिसंख्यार्थमिति न्यायादि
हापि तृतीयसदृशव्यावृत्तिलाभ इति भावः खमिवेति शरदर्णनमिदं खमाकाशमिव जलं कालुष्यापगमेन निर्मलत्वातिशयात् शेषं स्पष्टं निर्मलत्वादीत्या

धर्मार्थयोः कस्यचित्केनचित्सादृश्ये वर्णिते तस्याथन्येन सादृश्यमर्थसिद्धमपि मुखतो वर्ण्यमानं तृतीयसदृशव्यवच्छेदं फलति यथावा
खमिव जलं जलमिव खं हंस इव चंद्रश्चंद्र इव हंसः कुमुदाकारास्तारास्ताराकाराणि कुमुदानि पूर्वत्र पूर्णश्रीरिति धर्म उपात्तः इह निर्मल
त्वादि धर्मो नोपात्त इति भेदः उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनं राज्ञि धर्मार्थसमृद्धेः शरदि गगनसलिलादिनैर्म
ल्यस्य च वर्णनीयत्वात् प्रकृताप्रकृतयोरप्येषा संभवति यथा गिरिरिव गजराजोयं गजराज इवोच्चकैर्विभाति गिरिः निर्झर इव
मदधारा मदधारेवास्य निर्झरः स्रवति प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः १२

दिपदेन शैत्यातिशयपरिग्रहः गिरिरिवेति अत्र गजः प्रकृतः अयमिति प्रकृतपरामर्शि सर्वनामनिर्दिष्टत्वात् अत एवोपक्रमाद्ग्रेथ्यस्य मदधारेत्यन्वयो बो
ध्यः अत्र पूर्वार्धे उच्चकैर्विभातीति समानधर्म उपात्तः उत्तरार्धे च स्रवतीति स उक्त इति दिक् इत्युपमेयोपमाप्रकरणं प्रतीपमिति लक्ष्यनिर्देशः १२

ननूपमानोपमेयभावस्यवैवक्षिकत्वयामुखादेरप्युपमानत्वसंभवाच्चंद्र इवमुखमित्युपमायामतिव्याप्तिरित्यतआह प्रसिद्धेति प्रसिद्धोपमानस्यउपमेय भावः उपमेयत्वं प्रतीपं प्रतीपपदवाच्यं कुतः प्रातिलोम्यात् प्रसिद्धोपमानप्रतिकूलत्वात् उपमेयभावप्रातिलोम्यादित्यविसर्गपाठेपिप्रसिद्धोपमानस्य यउपमेयभावस्तस्यप्रातिलोम्यादुपमानप्रतिकूलत्वादुपमानस्योपमेयत्वकल्पनंप्रतीपमित्युच्यतइतिव्याख्येयं ननुप्रसिद्धस्योपमानोपमेयभावस्य वैपरीत्यादितियथाश्रुतरीत्या एवंविधप्रातिलोम्यस्यतृतीयपंचमप्रतीपभेदाव्यापित्वेनप्रतीपपदप्रवृत्तिनिमित्तत्वायोगादिति एवंचोक्तप्रकारेणोपमा

प्रसिद्धोपमानोपमेयभावप्रातिलोम्यात्प्रतीपं यथावा यत्वन्नेत्रसमानकांतिसलिलेमग्नंतदिंदीवरंमेघैरंतरितः प्रियेतवमुखच्छायानु कारीशशी येपित्वद्गमनानुसारिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपिमेदैवेननक्षम्यते

नप्रातिकूल्यस्यप्रतीपपदप्रवृत्तिनिमि त्तत्वकथनेनप्रसिद्धोपमानप्रतिकूलधर्मः प्रतीपमितिप्रतीपपंचकसाधारणंसामान्यलक्षणमितिसूचितं अतएवपंचमप्रतीपव्याख्यानावसरेवक्ष्यति उपमान प्रातिलोम्यादिति प्रतिकूलत्वंचतिरस्कारप्रयोजकत्वं एतच्चसकलप्रतीपभेदसाधारण्यंतत्रतत्रस्फुटीकरिष्यते यथावेति प्रोषितस्यप्रियांप्रतिवियोग वेदनानिवेदनमिदं अयिप्रियेत्वदीयसादृश्येनविनोदनंविनोदोविरहयापनंतन्मात्रमपिममदैवेननक्षम्यते एतदेवदर्शयति यदित्यादिना त्वन्नेत्रयोः समानासाधारणीकांतिःशोभायस्यतथाविधंयदिंदीवरंतत्सलिलेमग्नं वर्षर्तुनाजलवृद्धेः तवमुखस्यछाययाकांत्याअनुकारीसदृशःशशीमेघैरंतरितस्ति

१२

रहितः येपीत्यपिर्भिन्नक्रमः त्वद्गमनसदृशगतयोयेराजहंसास्तेपिगताइति अत्रकांतीत्यादिधर्मोपादानात्पूर्वोदाहरणवैलक्षण्यंबोध्यं ननूपमानादुपमेय स्याधिक्यवर्णनारूपात्व्यतिरेकालंकारादस्यकोभेदः उच्यते तत्रवैधर्म्यप्रयुक्तमुपमेयस्याधिक्यंविवक्षितमिहतूपमानतामात्रप्रयुक्तत्वात्साधर्म्यप्रयु क्तमिति प्रतीपांतरमाह अन्योपमेयेति अन्यद्वर्ण्यंउपमानंतद्रूपंयदुपमेयंतस्यलाभेनवर्णनीयस्यमुखादेरनादरोगर्वपरिहारोपितत् प्रतीपमि

अन्योपमेयलाभेनवर्ण्यस्यानादरश्चतत् अलंगर्वेणतेवक्त्रकांत्याचंद्रोपितादृशः १४ अत्युत्कृष्टगुणतयावर्ण्यमानस्यान्यत्रस्वसा दृश्यमसहमानस्योपमेयंकिंचित्प्रदर्श्यतावतातस्यतिरस्कारो द्वितीयंप्रतीपंपूर्वस्मादपिविच्छित्तिविशेषशालि यथावा गर्वमसंवा ह्यमिमंलोचनयुगलेनकिंवहसिभद्रे संतीदृशानिदिशिदिशिसरस्सुननुनीलनलिनानि

त्यर्थः तस्यगर्वप्रसक्तिपूर्वकत्वेनोपमेयताया अपिपूर्वमप्राप्त्याउपमानतिरस्कृतिविशेषप्रयोजकत्वादितिभाव- अतएवलाभेनेत्युक्तंनतुसत्वेनेति अप्राप्तप्राप्तेर्लाभशब्दार्थत्वात् विच्छित्तिविशेषे ति चमत्कारोत्कर्षेत्यर्थः उत्कर्षोपमानतिरस्कारातिशयप्रतीतेरितिभावः गर्वमिति असंवाह्यं संवहनायोग्यंअपरिमितमितियावत् भद्रेशोभ नेइतिसंबोधनं नन्वितिहेत्वर्थे अव्ययानामनेकार्थत्वात् पूर्वोदाहरणेकांत्येतिसमानधर्मोपादानमिहतुनेतिभेदः ७ ५

वर्ण्योपमेयेति अन्यस्यावर्ण्यस्य अनादरोपि तथा प्रतीपमित्यर्थः अहमेवेति सुदारुणानामतितीव्राणां गुरुः श्रेष्ठः तातेति सानुकंपसंबोधने मास्मह
प्यइति दर्पमाकथाइत्यर्थः वर्ण्येनान्यस्येति निरूपितत्वं तृतीयार्थः वर्ण्यनिरूपितायान्यस्यावर्ण्यस्योपमातस्याइत्यर्थः अनिष्पत्तिवचः उच्यमानाअनि
ष्पत्तिः कृदभिहितइतिन्यायात् तत्प्रतीपं मुधेति किलेतिवार्तायांत्वन्मुखाभमंबुजमिति वार्तामुधानिष्प्रयोजनोऽपवादः अलीकार्थकत्वेनापवाद

वर्ण्योपमेयलाभेन तथान्यस्याप्यनादरः कः क्रौर्यदर्पस्ते मृत्योस्त्वत्तुल्याः संति हि स्त्रियः १५ अत्युत्कृष्टगुणतया कस्यचिदप्युपमान
भावमसहमानस्यावर्ण्यस्य वर्ण्यमुपमेयं परिकल्प्य तावतातस्य तिरस्कारः पूर्वप्रतीपवैपरीत्येन तृतीयंप्रतीपं यथावा अहमेवगुरुः
सुदारुणानामिति हालाहलमास्मतातदृप्यः ननु संति भवादृशानि भूयो भुवनेस्मिन्वचनानि दुर्जनानां वर्ण्येनान्यस्योपमायाअनिष्प
त्तिवचश्चतद् मुधापवादो मुग्धाक्षि त्वन्मुखाभं किलांबुजं १६ अवर्ण्ये वर्ण्योपमित्यनिष्पत्तिवचनं पूर्वेभ्य उत्कर्षशालि चतुर्थंप्रती
पं उदाहरणे मुधापवादत्वोक्त्योपमित्यनिष्पत्तिरुद्घाटिता यथावा आकर्णय सरोजाक्षि वचनीयमिदं भुवि शशांकस्तव वक्त्रेणपा
मैरैरुपमीयते

स्यनिष्प्रयोजनत्वं उत्कर्षेति उपमानतिरस्कारातिशयप्रयोजकत्वरूपेत्यर्थः मुधापवादत्वोक्त्येति उक्तार्थमेतत् आकर्णयेति वचनी
यं अलीकतयानिंदितं अतएव भुवीत्युक्तं लोकांतरे मुखासन्निधानेन विशेषादर्शनादलीकत्वग्रहायोगात् सनिधानेपि विशेषाग्रहणात्पामरैरित्युक्तं

अत्र वचनीयं पामरैरित्येताभ्यामुपमितेरनिष्पत्तिः प्रकाश्यते प्रतीपमिति कः अर्थः प्रयोजनं यस्य तत्तथा अनर्थकमिति यावत्तस्य भावः कैमर्थ्यं तदपि प्रतीपं मन्वते आलंकारिका इति शेषः ननूपमानस्य पद्मचंद्रादेराह्लादविशेषरूपप्रयोजनसत्वात्कथमनर्थकत्वमत आह उपमेयस्यैवेति उपमानधूर्वहत्वेन उपमानकार्यकारित्वेन अयं चोपमानकैमर्थ्ये हेतुः अतश्चोपमानकैमर्थ्यमित्यध्याहार्यं आह्लादविशेषादेरन्यलभ्यत्वेन प्रयोजनत्वासंभ

प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिंदुना १७ उपमेयस्यै वोपमानप्रयोजनधूर्वहत्वेनोपमानकैमर्थ्यमुपमानप्रातिलोम्यात्संचमं प्रतीपं

वात्कैमर्थ्यमिति भावः उपमानप्रयोजकधूर्वहत्वेनेति पाठे उपमानं प्रयोजकं यस्या इति बहुव्रीहिः ननूपमानकैमर्थ्यस्योपमानाक्षेपश्चाक्षेप इति वामनसूत्रेणाक्षेपालंकारत्वेनोक्तत्वात्कथं प्रतीपत्वमत आह उपमानप्रातिलोम्यादिति उपमानप्रतिकूलत्वादित्यर्थः प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वमित्युक्तं तथा च प्रतीपसामान्यलक्षणाक्रांतत्वात्प्रतीपांतर्भाव एवोचित इति भावः

तदोजसइति नैषधीयेनैषधवर्णनमिदं विधिर्ब्रह्मा तस्य नलस्योजसः प्रतापस्य तद्यशसश्च स्थितौ सत्यां इमौ सूर्यचंद्रौ वृथा प्रतापज्योत्स्नादेः कार्य
स्य ताभ्यामेवोपपत्तेर्निरर्थकाविति चित्ते यदा यदा कुरुते तदा भानोर्विधोश्च परिवेषस्य परिधेः कैतवाच्छलात् कुंडलनां वैयर्थ्यसूचिकां रेखावेष्टनां क
रोतीत्यन्वयः अत्र च नायं परिवेषः किंतु कुंडलनेत्यपह्नुतौ कैमर्थ्यरूपप्रतीपस्यांगत्वात्तयोरंगांगिभावलक्षणः संकरः यद्यत्पापमित्यादिवन्न तत्सदे
वीप्सायाअकरणं न दोषइति बोध्यं केचिद्दंडिप्रभृतयः अनन्वयोपमाप्रतीपानामिति प्रतीपपदेन चात्राद्यभेदत्रयमेव गृह्यते न त्वंत्यभेदद्वयमपि तत्रोप
मितिक्रियानिष्पत्तेरभावेनोपमांतर्भावस्यासंभवात् वस्तुतस्त्वाद्यभेदत्रयस्यापि नोपमांतर्गतिर्युक्ता चमत्कारं प्रति साधर्म्यस्य प्राधान्येनाप्रयोजकत्वा

यथावा तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा तनोति भानोः परिवेषकैतवात्तदा
विधिः कुंडलनां विधोरपि केचिदनन्वयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेन तदंतर्भावं मन्यंते ७

त् सामर्थ्यनिबंधनउपमानतिरस्कार एव हि तत्र चमत्कृतिप्रयोजकतया विवक्षितो न तु साधर्म्यमेव मुखतश्चमत्कारितया विवक्षितमिति सहृदयसा
क्षिकं एवमनन्वयोपमेयोपमयोरपि न सादृश्यस्य चमत्कारितया प्राधान्येन विवक्षा किंतु द्वितीयतृतीयसदृशव्यवच्छेदोपायतयेति न तयोरप्युपमांतर्ग
तिर्युज्यते अन्यथा सादृश्यवर्णनमात्रेणोपमांतर्भावे धैर्यलावण्यगांभीर्यप्रमुखैस्त्वमुदन्वतः गुणैस्तुल्योसि भेदस्तु वपुषैवेदृशेन तदिति व्यतिरेकालंकारस्याप्युपमां
तर्गतिः स्यात् तत्र साधर्म्यसमानाधिकरणं वैधर्म्यमेव चमत्कारे प्रधानं न तु साधर्म्यमिति चेत्तुल्यमिदं प्रतीपादिष्वपीति सहृदयैराकलनीयं एतदेवास्वरसबी
जमभिसंधायोक्तं केचिदिति ७

(१५)

कुवल० १४

अन्येवामनादयः अत्रचास्तरसबीजंप्रागेवावेदितं इतिप्रतीपप्रकरणं रूपकंलक्षयति विषय्यभेदेति रूप्यतेइतरव्यावृत्ततयाज्ञायतेधर्मीअनेनेति
रूपंततद्रूपमस्यासीतद्रूपस्तस्यभावस्ताद्रूप्यंचंद्रकार्यकारित्वादि विषयिणउपमानस्यअभेदताद्रूप्याभ्यांविषयस्योपमेयस्ययद्रंजनमिचरंजनंस्वोपरक्त
द्विविषयीकरणमितियावत् तद्रूपकमित्यर्थः रूपकंतदित्येवपाठः रूपकंत्विति पाठेतुनदित्यध्याहार्यं उपात्तबिंबाविशिष्टविषयधर्मिकाऽहार्यारोप
निश्चयविषयीभूतंउपमानाऽभेदताद्रूप्यान्यतरत्रूपकमितितुनिष्कर्षः मुखंचंद्र इत्यादौनामार्थयोरभेदान्वयव्युत्पत्तिवशादाहार्यचंद्राभेदनिश्चयाल्लक्षण
समन्वयः मुखमपरश्चंद्रइत्यत्रतुनचंद्राभेदोविषयःअपरइतिभेदस्यविवक्षितत्वात् अपितुचंद्रकार्यकारित्वरूपंताद्रूप्यमितितत्रापिलक्षणसंगतिः नच

अन्येतुपंचमंप्रतीपप्रकारंउपमानाक्षेपरूपत्वादाक्षेपालंकारमाहुः विषय्यभेद
ताद्रूप्यरंजनंविषयस्ययत् रूपकंतत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः १८

तस्यमुखेसत्वात्कथमारोपइतिवाच्यं चंद्रकार्यसजातीयकारित्वस्यैवमुखेसत्वादिति यद्यपिनामार्थयोरभेदान्वयानुरोधादिहापिचंद्रपदलक्षितस्यतत्का
र्यकारिणोऽभेदसंसर्गेणैवमुखेऽन्वयादभेदरूपकमेवतथाप्युपमानतावच्छेदकरूपेणाभेदभानेएवाभेदरूपकत्वंतत्कार्यकारित्वादिरूपेणाभेदभानेतुता
द्रूप्यरूपकत्वमितितात्पर्यं अत्रकमलमनंभसिकमलेचकुवलयेतानिकनकलतिकायामित्याद्यतिशयोक्तिवारणायोपात्तेतिविषयविशेषणं आरोपश्च
निषेधानंगकत्वेनविशेषणीयः तेनापह्नुतौनातिव्याप्तिः भ्रांतिवारणायाहार्येति त्वत्पादनखरत्नानांयदलक्तकमार्जनं इदंश्रीखंडलेपेनपांडुरीकरणंविधोरि

चं०टी० २४

तिनिदर्शनावारणाय बिंबाविशिष्टेति संशयोत्प्रेक्षयोर्निरासाय निश्चयेत्युक्तमिति संक्षेपः आधिक्येत्यादि आधिक्यमुपमानस्य स्वाभाविकीमवस्थाम
पेक्ष्योपमेयतादात्म्यावस्थायां बोध्यं एवं न्यूनत्वमपि अनुभयं आधिक्यन्यूनत्वोभयरहितं अभेदताद्रूप्यान्यतरमात्रं अयंहीत्यादि अयं वर्ण्यमानो रा
जा येन हेतुना पुरः नगर्यः शिवस्यापि त्रिपुरदग्धृत्वात्स एवायमिति भावः तार्तीयीकमिति तृतीयमेव तार्तीयीकं तीयादीकक् स्वार्थे वाच्य इति वार्तिकानुसा
रात् विलोचनं विनेत्यन्वयः १९ शंभुरिति अत्राप्ययमित्यनुषंजनीयं अन्यथाऽतिशयोक्त्यापत्त्या रूपकोदाहरणत्वासंगतेः अद्य राजभावावस्थायां सम

अयंहि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते विना शंभुस्तार्तीयीकं विलोचनं १९
शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां अस्यामुखेंदुना लब्धे नेत्रानंदे किमिंदुना २०

दृष्टितां समसंख्यलोचनतां एकरूपलोचनवत्तां च मुखेंदुनेति अत्रेंदुपदमिंदुकार्यकारिपरं किमिंदुनेति प्रसिद्धचंद्रभेदविवक्षणात् अतश्चंद्रताद्रूप्यरूपक
मिदं न चात्रोत्तरपदार्थप्राधान्यादिंदुकार्यकारिणि मुखाभेदभानान्मुखाभेदरूपकं स्यात् न तु चंद्रताद्रूप्यरूपकमिति वाच्यं व्युत्पत्तिवैचित्र्येण मुखस्य स्वनिष्ठाभेदप्र
तियोगित्वसंसर्गेणान्वयाभ्युपगमात् विशेषणानुयोगिकस्यापि विशेषणसंबंधतायाः स्वामित्वस्य षष्ठ्यर्थत्ववादिभिः प्राचीनैश्चैत्रस्य धनमित्यादावंगीका
रात् एवं च मुखनिष्ठाभेदप्रतियोगी चंद्रस्तत्कार्यकारी वेति बोधान्न मुखाभेदरूपकापत्तिः मुखप्रतियोगिकाभेदस्याभानादिति एवमन्यत्राप्यूह्यं २०

असुधेति सुधासागरादुदिताउत्पन्नाप्रसिद्धालक्ष्मीः इयंतुनतथेतिन्यूनत्वोक्तिः अतिरिच्यतइति निष्कलंकतयाअधिकोभवतीत्यर्थः २१ लक्षणश्लो
कंव्याचष्टे विषय्युपमानेत्यादि विषयिणोऽभेदेनरूपेणचेतिपाठः रूपेणआह्लादकत्वादिनाताद्रूप्येण क्वचित्ताद्रूप्येणचेत्येवपाठः परमार्थतस्तुप्रामा
णिकपुस्तकेषु विषयिणोरूपेणविषयस्यरंजनमितियुक्ततरःपाठः तेनतत्त्वेत्यादेर्नपौनरुक्त्यमितिध्येयं हरिद्रादिनापटादिरंजनेप्रयुक्तस्यरंजनशब्दस्येहभक्त

साध्वीयमपरालक्ष्मीरसुधासागरोदिता अयंकलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते २१ विषय्युपमानभूतंपद्मादिविषयस्तदुपमेयंवर्ण
नीयंमुखादिविषयिणोरूपेणविषयस्यरंजनंरूपकंअन्यरूपेणरूपवतःकरणात्तच्चक्वचित्प्रसिद्धविषय्यभेदपर्यवसितं क्वचिद्भेदप्रतीय
मानएवतदीयधर्मारोपमात्रपर्यवसितं ततश्चरूपकंतावद्द्विविधं अभेदरूपकंताद्रूप्यरूपकंचेति द्विविधमपिप्रत्येकंत्रिविधं प्रसिद्धवि
षय्याधिक्यवर्णनेनन्यूनत्ववर्णनेनानुभयोक्त्याचैवंरूपकंषड्विधं अयंहीत्यादिसार्धश्लोकेनाभेदरूपकाणि अस्यामुखेंदुनेत्यादिसार्धश्लो
केनताद्रूप्यरूपकाणि आधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानि

तौबीजमाह अन्यरूपेणेति रूपंरक्तपीतादिकं अभेदता
द्रूप्येच तथाचान्यदीयधर्मेणान्यस्यतद्वत्तासंपादनत्वसामान्यादिहगौण्यारंजनशब्दप्रयोगइतिभावः तच्चेति रंजनंचेत्यर्थः प्रसिद्धेति कविसंप्रदायप्रसिद्ध
पमानाभेदेनलब्धात्मकमित्यर्थः रूपपदस्याभेदताद्रूप्योभयसाधारणत्वादितिभावः अभेदेनरूपेणचेतिपाठेतु तच्चेत्यत्रचशब्दोहेत्वर्थकः तेनपूर्वोक्तस्यैवसम

र्थनमितिनपौनरुक्त्यं तावत् विधांतरोक्तेः प्राक् उद्देशक्रमप्रातिलोम्येनेति निर्देशक्रमवैपरीत्येनेत्यर्थः एतदेवविशदयति येनेत्यादि विशेषणेनेतिहेतौ तृतीया पुरदग्धृत्वविशेषणहेतुकशिवाभेदानुरंजनादित्यर्थः ननुन्यूनत्ववर्णनेभेदापकर्षयोः प्रतीतेः कथंचमत्कारितेत्यत आह अभेददार्ढ्यापादकत्वादिति

येनदग्धाइति विशेषणेन वर्णनीयराजि प्रसिद्धशिवाभेदानुरंजनाच्छिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायां न्यूनत्वाधिक्ययोरवर्णनाच्चानुभयाभेदरूपकमाद्यं तृतीयलोचनप्रहाणोक्त्या पूर्वावस्थातो न्यूनताप्रदर्शनात् न्यूनाभेदरूपकं द्वितीयं न्यूनत्ववर्णनमपि अभेददार्ढ्यापादकत्वाच्चमत्कारि विषमदृष्टित्वपरित्यागेनजगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावावस्थायांउत्कर्षविभावनादधिकाभेदरूपकंतृतीयं एवमुत्तरेषुताद्रूप्यरूपकोदाहरणेष्वपिक्रमेणानुभयन्यूनाधिकभावाउन्नेयाः अनेनैवक्रमेणोदाहरणांतराणि

विशेषनिषेधस्यशेषाभ्यनुज्ञाफलकतयानिषिद्धव्यतिरिक्तसकलगुणशालिताप्रतीतावेकदेशविकृतमनन्यवद्भवतीतिन्यायेनाभेदनिश्चयसंपादकत्वादित्यर्थः विभावनात् प्रकाशनात् ७ ७ ७

(16)

चंद्रज्योत्स्नेति राजानंप्रति कस्यचिदुक्तिः हेभगवन् चंद्रज्योत्स्नावत् विशदंश्वेतंपुलिनंयस्यतथाभूतेऽस्मिन्शरय्वाः शरयूनामकनद्याःसैकतेसिकताम
यदेशेकयोश्चित्सिद्धतरुणयोः चिरतरंअतिचिरकालंवादरूपंघूतमभूत् कीदृकतत्राह एकःसिद्धयुवाकैटभंदैत्यविशेषंप्रथमंनिहतंवक्तिवदति
अन्यःकंसंप्रथमंनिहतंवक्ति सःकंसकैटभयोर्निहंतात्वंतत्रतयोर्मध्येपूर्वकोहतइतित्वंकथयेत्यन्व यद्यपिमुनिप्रभृतावेवभगवन्नित्यामंत्र

चंद्रज्योत्स्नाविशदपुलिनेसैकतेस्मिन्शरय्वावादघूतंचिरतरमभूत्सिद्धयूनोःकयोश्चित् एकोवक्तिप्रथमनिहतंकैटभंकंसमन्यस्त
त्वंसतत्वंकथयभगवन्कोहतस्तत्रपूर्व अत्रसत्वमित्यनेनयःकंसकैटभयोर्हंतागरुडध्वजस्तत्तादात्म्यंवर्णनीयस्यराज्ञःप्रतिपाद्यतंप्रतिकंस
कैटभवधयोःपौर्वापर्यप्रश्नव्याजेनतत्तादात्म्यदार्ढ्यकरणात्पूर्वावस्थातउत्कर्षापकर्षयोरविभावनाच्चानुभयाभेदरूपकं ७

णमुचितंनराजादौतथापिराज्ञोभगवत्तादात्म्यवर्णनादनौचित्यंपरिहरणीयं कचित्तुभवतेतिपाठः अत्रज्योत्स्नापदेनैवचंद्रिकालाभेपिचंद्रपदंशारदपूर्णचंद्र
परतयानापुष्टार्थं पुष्पमालेत्यत्रपुष्पपदमिवोत्कृष्टपुष्पपरतयेतिबोध्यं वादयोग्यतासूचनाययूनोरित्युक्तं अयंहीत्युदाहरणेऽभेदारोपहेतुभूतंपुरद
हकत्वरूपंसाधर्म्यमुपात्तं इहतुजगद्रक्षकत्वादिकंतद्गम्यमानमितिभेदः ७ ९ ७

वेधाइति द्वेधा कांताधर्मिकत्वकनकधर्मिकत्वरूपविधाद्वययुक्तं भ्रमं बलवदनिष्टाननुबंधिसुखसाधनत्वभ्रमं सर्वेषामपिभ्रमाणां वेधसानिर्माणेपिप्राधान्य विवक्षयेत्थमभिधानं अयमास्तइत्युदाहरणेशंभुसादृश्यंगम्यमानमिहत्वनासक्तिरूपंतदुपात्तमितिभेदः त्वय्यागतइति राजानंप्रतिकवेरुक्तिःसेतुश्चमंथश्चेति

वेधाद्वेधाभ्रमंचक्रेकांतासुकनकेषुच तासुतेष्वप्यनासक्तःसाक्षाद्भर्गोनराकृतिः अत्रसाक्षादितिविशेषणे
नविरक्तस्यप्रसिद्धशिवतादात्म्यमुपदिश्यनराकृतिरितिदिव्यमूर्तिवैकल्यप्रतिपादनान्न्यूनाभेदरूपकं त्वय्या
गतेकिमितिवेपतएषसिंधुस्त्वंसेतुमंथकृदतःकिमसौबिभेति द्वीपांतरेपिनहितेस्यवत्रांवदोद्यत्वांराजपुंग
वनिषेवतएवलक्ष्मीः अत्रत्वंसेतुमंथकृदितिसेतोर्मथनस्यचकर्त्रापुरुषोत्तमेनसहवर्णनीयस्यतादात्म्य
मुक्त्वातथापित्वदागमनंसेतुबंधायमंथनायवेतिसमुद्रेणनभेतव्यंद्वीपांतराणामपित्वद्वशंवदत्वेनपूर्वव
द्वीपांतरेजेतव्याभावात्प्राप्तलक्ष्मीकत्वेनमंथनप्रसक्त्यभावाच्चेतिपूर्वावस्थातउत्कर्षविभावनादधिकाभेदरूपकं

द्वंद्वःमंथनंमंथः अमृतमथनं द्वीपांतरेपीत्यपिनासुतरामेतत्द्वीपेनास्तीतिसूच्यते अधराजभावावस्थायां शंभुर्विश्वमित्यत्रविश्वसंरक्षकत्वंसादृश्य मुपात्तं द्रहतुनेतिभेदः ❁ ७ ७ ७

किंपद्मस्येति दयितांप्रतिनायकोक्तिः तववक्त्ररूपेइंदुकार्यकारिणिसतिअयमपरःप्रसिद्धःशीतांशुश्चंद्रः यदुज्जृंभतेउदितोभवतितस्मात्तववक्त्रेंदुःप
द्मस्यरुचिंकांतिंकिंनहंति प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायात्प्रयोजनस्यान्यतःसंभवेतदुज्जृंभणस्यासंगतेरिति किंनहंतीतिकाक्वाअ
पितुहंत्येवेतिपर्यवसानेतदुज्जृंभणंवृथेतिप्रतीतिपर्यवसानं एवमग्रिमवाक्ययोरपि झषोमकरःकेतनंचिह्नमस्यतथाभूतस्यसमुद्रस्यकामस्यच

किंपद्मस्यरुचिंनहंतिनयनानंदंविधत्तेनकिंवृद्धिंवाझषकेतनस्यकुरुतेनालोकमात्रेणकिं वक्त्रेंदौ
तवसत्ययंयदपरःशीतांशुरुज्जृंभतेदर्पःस्यादमृतेनचेदिहतदप्यस्त्येवबिंबाधरे अत्रापरःशीतांशुरित्यनेन
वक्त्रेंदोःप्रसिद्धचंद्राद्भेदमाविष्कृत्यतस्यचप्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेनोत्कर्षापकर्षयोरप्र
दर्शनादनुभयताद्रूप्यरूपकं

आलोकनमालोकःप्रकाशश्चतन्मात्रेण अमृतेनदर्पोभिमानःउज्जृंभणहेतुःस्याच्चेत् अयुक्तमेत
त् यतःइहवक्त्रेंदौबिंबाधरेतदप्यस्त्येवेतिसमुचितपदाध्याहारेणयोजनीयं यच्छब्दस्योत्तरवाक्यगतत्वेनतच्छब्दाक्षेपपक्षमत्वान्नतदनुपादानेपिन्यूनपदत्वदोषः
कार्यकारित्वमात्रेत्यनेनाभेदव्यावृत्तिः अस्यामुखेंदुनेत्यत्रकिमिंदुनेतिपुनरुपादानमात्रंभेदविवक्षाज्ञापकंइहत्वपरशब्दस्याप्युपादानमितिविशेषः ७

अचतुर्वदनइति बादरायणोव्यासः भालेलोचनंयस्येति व्यधिकरणत्वेपिगमकत्वाद्बहुव्रीहिः ननुहरावपरइति विशेषणात्तदंशेएवताद्रूप्यरूपकंस्यात् इतरांशेत्वभेदरूपकमेवेत्याशंक्याह अत्रेति त्रिष्वपीति एकत्रानेकारोपरूपायांरूपकमालायामवैरूप्यायतात्पर्यग्राहकस्यैकत्रस्थितस्यापिसाधारण्यमेवो चितमितिभावः अयमेवचसाध्वीत्यादिपूर्वोदाहरणाद्विशेषः न्यूनरूपस्यचमत्कारित्वंपूर्वमुक्तंदृढसंमतत्वाद्दृढयति इदमिति यदाहेत्यनंतरंसइति

अचतुर्वदनोब्रह्माद्विबाहुरपरोहरिः अभाललोचनःशंभुर्भगवान्बादरायणः अत्रहरावपरइति
विशेषणात्त्रिष्वपिताद्रूप्यमात्रविवक्षाविभाविता चतुर्वदनत्वादिवैकल्यंचोक्तमितिन्यूनताद्रूप्य
रूपकं इदंविशेषोक्त्युदाहरणमितिवामनमतं यदाह एकगुणहानौगुणसाम्यदार्ढ्यं विशेषोक्तिरिति

शेषः एकगुणहानौअभिहितायामितिशेषः गुणसाम्यदार्ढ्यं शेषगुणप्रयुक्तसाम्यायोगव्यवच्छेदः चतुर्वदनत्वाद्येकगुणव्यतिरेकस्यप्रमाणांतरसिद्धस्य पुनर्वचनंशेषगुणाभावपरिसंख्यार्थंपर्यवस्यतीतिभावः अत्रचरूपकप्रभेदत्वेनैवचमत्कारोपपत्तौनालंकारांतरत्वंन्यूनत्ववर्णनस्ययुक्तं सामग्रीकालीन कार्याभावस्यत्वलंकारांतरासंभिन्नस्यनदृश्यमाणंयुक्तमित्यस्वरसोमतमित्यनेनसूचितः

छ छ छ

किमसुभिरिति जडेतिमूर्खजलमयसाधारणंचंद्रसंबोधनं ग्लपितैर्नष्टैरसुभिर्निमित्तभूतैर्भैमसुतायादमयंत्यामनःमयिनिमज्जतुनिलीयतामितिमन्यसे किमितिसोपहासकाकुः तेनमैवंमंस्थाइत्यर्थः अत्रहेतुमाह किलनिश्चितंममविबुधःपंडितःस्मरःतदर्थिकांसःप्राणनिर्गमकालीनमनःप्रवेशःअर्थोयस्यास्तांश्रुतिंनलमुखेंदुपरांमनःप्रवेशाधिकरणत्वेननलमुखचंद्रतात्पर्यवतीमाहेति अयं कलंकिनइत्युदाहरणेदोषशून्यत्वप्रयुक्तंशाब्दमाधिक्यं

किमसुभिर्ग्लपितैर्जडमन्यसेमयिनिमज्जतुभीमसुतामनः ममकिलश्रुतिमाहतदर्थिकांनलमुखेंदुपरांविबुधःस्मरः अत्रदमयंतीकृतचंद्रोपालंभेप्रसिद्धचंद्रेननिर्याणकालिकमनःप्रवेशश्रुतितात्पर्यविषयः किंतुनलमुखचंद्रएवेतिततोस्याधिक्यप्रतिपादनादधिकताद्रूप्यरूपकं रूपकस्यसावयवत्वनिरवयवत्वादिभेदप्रपंचनंतुचित्रमीमांसायांद्रष्टव्यं ७

इहतुगुणविशेषप्रयुक्तंगम्यमानंतदितिविशेषः सावयवत्वनिरवयवत्वादीति आदिनासमस्तवस्तुविषयत्वादिरूपैतत्प्रभेदानांपरंपरितत्वरूपभेदांतरस्यचपरिग्रहः तथाहि सावयवं निरवयवं परंपरितंचेतित्रिविधंरूपकंप्रत्येकंक्रमेणद्विविधं समस्तवस्तुविषयं एकदेशविवर्तिच केवलंमालाच श्लिष्टवाचकं अश्लिष्टवाचकंचेति श्लिष्टाश्लिष्टभेदयोःकेवलमालारूपत्वाभ्यामंसंचतुर्विधमित्यष्टौभेदाः तत्रज्योत्स्नाभस्मछुरणधवलाबिभ्रतीतारका

स्थीन्यंतर्धानव्यसनरसिकारात्रिकापालिकीयं दीपाद्दीपंभ्रमतिदधतीचंद्रमुद्राकपालेन्यस्तं सिद्धांजनपरिमलंलांछनस्यछलेनेतिपद्येरात्रौकापा-
लिकीत्वारोपस्यप्रधानत्वावयविनोऽवयवरूपाणिज्योत्स्नाभस्मेत्यादिरूपकाणीतिसावयवत्वं समस्तस्यवस्तुनआरोप्यमाणस्यशब्दविषयत्वंचद्रष्ट
व्यं प्रोढमौक्तिकरुचः पयोमुचांबिंदवःकुटजपुष्पबंधवः विद्युतांनभसिनाट्यमंडलेकुर्वतेस्मकुसुमांजलिश्रियमित्यत्रप्रधानस्यनभसिनाट्यमं
डलत्वारोपस्यावयवभूतंविद्युतांनर्तकीत्वरूपणमार्थंनशाब्दमित्येकदेशेविशेषेणशाब्दतयावर्तनादेकदेशविवर्तित्वं कुरंगीवांगानिस्तिमित
यन्तिगीतध्वनिषुयत्सखींकांतोदंतंश्रुतमपिपुनःप्रश्नयतियत् अनिद्रंयच्चांतःस्वपितितदहोवेद्म्यभिनवांप्रवृत्तोस्याःसेक्तुंहृदिमनसिजःप्रेमलतिका
मित्यत्रप्रेमलतिकामित्यमालारूपंनिरवयवं सौंदर्यस्यतरंगिणीतरुणिमोत्कर्षस्यहर्षोद्गमःकांतेःकार्मणकर्मनर्मरहसामुल्लासनावासभूः विद्यावक्रगिरां
विधेरनवधिप्रावीण्यसाक्षात्क्रियाबाणाःपंचशिलीमुखस्यललनाचूडामणिःसाप्रियेत्यत्रचमालारूपंनिरवयवंबोध्यं एवंअलौकिकमहालोकप्र-
काशितजगत्त्रयःस्तूयतेदेवसद्वंशमुक्तारत्नंनकैर्भवानित्यत्रवेणुकुलयोःश्लिष्टेनवंशपदेनकुलेवेणुत्वारोपपूर्वकएवराज्ञिमुक्तारत्नत्वारोपइति
श्लिष्टवाचकंकेवलंपरंपरितरूपकं विद्वन्मानसेत्यादावेतदेवमालारूपं चतुर्दशलोकवल्लिकंदइत्यत्राश्लिष्टवाचकंकेवलपरंपरितं पर्यंकोरा
ज्यलक्ष्म्याइत्यादावालानंजयकुंजरस्येत्यादौचाश्लिष्टवाचकंमालापरंपरितंचद्रष्टव्यं विस्तरभयान्नेहप्रपंच्यते इत्यलंकारचंद्रिकायांरूपकप्रक
रणं ❋ ७ ७ ७

कुवल०
१९

परिणामंलक्षयति परिणामइति विषयिनिष्ठायाःप्रकृतकार्योपयोगिताया अवच्छेदिकाविषयात्मतापरिणतिःपरिणामःसाचविषयतादात्म्याध्यवसा यविषयता एवंचविषयाभेदस्यैवविषयिणिविवक्षणात् दृगभिन्नेनाब्जेनेतिस्वारसिकएवबोधः नतुरूपकइवदृङ्निष्ठाभेदप्रतियोगिनाब्जेनेत्यनुयोगि

चं०टी०

परिणामःक्रियार्थश्चेद्विषयीविषयात्मना प्रसन्नेनदृगब्जेनवीक्षतेमदिरेक्षणा यत्रारोप्यमाणोवि षयीकिंचित्कार्योपयोगित्वेननिबध्यमानःस्वतस्तस्यतदुपयोगित्वासंभवात्प्रकृतात्मनापरिणमेपेक्षतेत त्रपरिणामालंकारः अत्रोदाहरणंप्रसन्नेनेति अत्रहिअब्जस्यवीक्षणोपयोगित्वंनिबध्यतेनचदृशः म यूरव्यंसकादिसमासेनउत्तरपदार्थप्राधान्यात् नचोपमितसमासाश्रयणेनदृगब्जमिवेतिपूर्वपदप्राधा न्यमस्तीतिवाच्यं प्रसन्नेनेतिसामान्यधर्मप्रयोगादुपमितंव्याघ्रादिभिःसामान्याप्रयोगइतितदप्रयोगए वोपमितसमासानुशासनात् अब्जस्यवीक्षणोपयोगित्वंनस्वात्मनासंभवति अतस्तस्यप्रकृतदृगात्मता परिणत्यपेक्षणात्परिणामालंकारः

लसुखइतिरूपकाद्भेदोबोध्यः

असमासेष्युदाहरति तीर्त्वेति मुरारिनाटकगतमेतत्पद्यं आत्मना तृतीयः सीतालक्ष्मणसहित इतियावत् असौ प्रक्रांतो रामः भूतेशस्य शंभोर्मौलिमालारूपममरनदीं गंगां तीर्त्वा तस्मै नाविकाय गुहसंज्ञाय निषादपतये सौमित्रेर्लक्ष्मणस्य मैत्रीरूपमातरं तरणमूल्यमुपकृतवान् उपकाररूपतयाद

यथावा तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयस्तस्मै सौमित्रिमैत्रीमयमुपकृतवाना
तरं नाविकाय व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदंचदक्षं कृच्छ्रादन्वीयमानः क्षणमचलम
थो चित्रकूटं प्रतस्थे अत्रारोप्यमाण आतरः सौमित्रिमैत्रीरूपतापत्त्या गुहोपकारलक्षणकार्योपयोगी
न स्वात्मना गुहस्य रघुनाथप्रसादैकार्थित्वेन वेतनार्थित्वाभावादिति परिणामालंकारः ७

तवान् अथो ऽनंतरं चित्रकूटं प्रति प्रतस्थे प्रस्थितवान् कीदृशः व्यामेन तिर्यक्प्रसारितभुजद्वयांतरालेन ग्राह्यौ तावत्परिणाहौ स्तनौ यासां तथाभूताभिः शबराणां व्याधानां युवतिभिः कौतुकेनोदंचंति विकसंत्यक्षीणि यत्र क्रियायां तथा कृच्छ्रात्क्लेशादतएव क्षणमन्वीयमानो ऽनुगम्यमान इत्यर्थः ७

इति परिणामप्रकरणं

अथोल्लेखालंकारं लक्षयति बहुभिरिति एकस्य बहुधोल्लेखादित्यन्वयः उल्लेखनं विषयीकरणमुल्लेखः हेतौ पंचमी तथाचैवंविधोल्लेखाद्धेतोरुल्लेखइष्य
तेउल्लेखइतिव्यवह्रियतइत्यर्थः व्यवहारं प्रतिलक्षणस्य प्रयोजकत्वात् स्त्रीभिरिति स्वर्द्रुः स्वर्गसंबंधीद्रुमः कल्पतरुः कालोयमः सप्रकृतोरा
जाश्लोकंव्याचष्टे यत्रेति नानाविधेति सौंदर्यदातृत्वभूरत्वादिरूपेत्यर्थः तत्तद्धर्मेति रुच्यर्थित्वभयादिरूपेत्यर्थः एतच्च स्वरूपकथनंनतु

बहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते स्त्रीभिः कामोर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षिसः यत्र नानाविधधर्मयोग्येकंवस्तु
तत्तद्धर्मयोगरूपनिमित्तभेदेन अनेकेनग्रहीत्वाअनेकधोल्लिख्यते तत्रोल्लेखः अनेकधोल्लेखने रुच्यर्थित्वभयादिकंयथार्हं
प्रयोजकं रुचिरभिरतिः अर्थित्वंलिप्सा स्त्रीभिरित्याद्युदाहरणं अत्रैकएवराजासौंदर्यवितरणपराक्रमशालीतित्वास्त्री
भिरर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः कामकल्पतरुकालरूपोदृष्टः

लक्षणांतर्गतम् ननुद्वाभ्यांग्रहीतृभ्यांनिमित्तद्वयवशात्प्रकार
द्वयेनोल्लेखेऽव्याप्तिरतआह अनेकेनेत्यादि तथाचलक्षणेबहुपदमनेकपरमितिभावः एवंचग्रहीतृविषयाद्यन्यतमानेकत्वप्रयुक्तमेकस्योल्लिख्य
मानानेकप्रकारत्वमुल्लेखइतिलक्षणंबोध्यं सौंदर्यस्यतरंगिणीत्यादिमालारूपकवारणायाद्यंविशेषणं तत्रग्रहीतृभेदप्रयुक्तंनानेकप्रकारत्व

मितिनातिव्याप्तिः वक्ष्यमाणोल्लेखप्रभेदसाधारण्यायान्यतमत्वप्रवेशः तद्विवेचनं तद्व्याख्यानावसरे करिष्यामः अन्यतमानेकत्वप्रयुक्तं एकस्योल्लि
ख्यमानत्वमित्येतावदुक्तो विद्याविक्रमसौंदर्यतपसां निधिमागतं पश्यंति विबुधाः शूराः स्त्रियो वृद्धाश्च कौतुकादित्यत्रातिव्याप्तिरतोऽनेकप्रकारत्व
मित्युक्तं नचोल्लिख्यमानप्रकारत्वमित्येवास्तु उक्तोदाहरणे प्रकारस्य कस्याप्यनुल्लेखादेवानतिप्रसंगादिति वाच्यं एवमपि नृत्यत्त्वद्वाजिराजिप्र
खरखुरपुटप्रोद्भूतैर्धूलिजालैरालोकालोकभूमीधरमतुलनिरालोकभावं प्रयाते विश्रांतिं कामयंते रजनिरितिधिया भूतले सर्वलोकाः कोकाः क्रं
दंति शोकानलविकलतया किंचनं दंत्युलूका इत्यत्र धूलिजालरूपस्यैकस्य वस्तुनोऽनेकैर्लोककोकोलूकैर्ग्रहीतृभिरेकेनैव रजनीत्वेन प्रकारेणोल्लेखनादति
व्याप्तेर्वारणाय प्रकारेऽनेकत्वोपादानस्यावश्यकत्वात् सिंजानैर्मंजरीतिस्तनकलशयुगं चुंबितं चंचरीकैस्तत्रासोल्लाससलीलाः किसलयमनसा पाणयः की
रदष्टाः तल्लोपाय्यालपंत्यः पिकनिनदधिया ताडिताः काकलोकैरित्थं चोलेंद्र सिंहत्वदरिमृगदृशां नाप्यरण्यं शरण्यमित्यनेकगतभ्रांतिपरंपरायामतिप्रसं
गवारणार्थमेकस्येत्युक्तमिति संक्षेपः यथार्हमिति स्त्रीभिः कामत्वोल्लेखे तासां रुचिरनुरागः प्रयोजकः अर्थिभिः कल्पतरुत्वोल्लेखे तेषां लिप्सा प्रयोजिका
शत्रुभिर्यमत्वोल्लेखे तेषां भयं प्रयोजकमित्येवं यथायोग्यमित्यर्थः

उदाहरणांतरमाह यथावेति श्रीकृष्णस्य मथुराप्रवेशवर्णनं शौरिः श्रीकृष्णः वृद्धाभिर्जगत्रातेति दृष्ट इत्याद्यन्वयाः सकौतुकं सोत्कंठमिति दर्शनक्रिया विशेषणं सर्वत्र संबध्यते श्लोकं व्याचष्टे यइति तथा महाग्राहग्रहणेन युवतिसमूहैः तरुणीसमूहैः पूर्वमिति उदाहृत इति शेषः उल्लेख इत्यनुषज्यते आरोपरूपकसंकीर्ण इति पाठे आरोपस्वरूपं यद्रूपकं तत्संकीर्ण इत्यर्थः आरोपरूपरूपकेति पाठस्तु स्पष्टार्थ एव उल्लेखप्रभेदांतरमाह एकेने

यथा या गजत्रातेति वृद्धाभिः श्रीकांत इति यौवतैः यथास्थितश्च बालाभिर्दृष्टः शौरिः सकौतुकं अत्र यस्तथाभीतं भक्तं गजं त्वरया त्रायते स्म सोयमादिपुरुषोत्तम इति वृद्धाभिः संसारभीत्या तदभयार्थिनीभिः कृष्णोयं मथुरापुरं प्रविशन् दृष्टः यस्तथा चंचलत्वेन प्रसिद्धाया अश्रियो पिकामोपचारवैदग्ध्येन नित्यं वल्लभः सोयं दिव्ययुवेति युवतिसमूहैः सोत्कंठं दृष्टः बालाभिस्तु ह्याद्यगतरूपवेषालंकारदर्शनमात्रलालसाभिर्यथास्थितवेषादियुक्तो दृष्ट इति बहुधोल्लेखः पूर्वः कामत्वाद्यारोपरूपकसंकीर्णः अयं तु शुद्ध इति भेदः एकेन बहुधोल्लेखेप्यसौ विषयभेदतः गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरासने ग्रहीतृभेदाभावेपि विषयभेदाद्बहुधोल्लेखनादसावुल्लेखः उदाहरणं श्लेषसंकीर्णं वचो विषये महान्पटुरित्यादिवत् बृहस्पतिरित्याद्यर्थांतरस्यापि क्रोडीकरणात् शुद्धो यथा

ति व्याचष्टे ग्रहीत्रिति विषयभेदादित्यनंतरमेकस्येति शेषः विषयपदमाश्रयसंबंधिनोरुपलक्षणं अतएव लक्षणे ग्रहीतृविषयादीत्यादिपदेन तत्संग्रहः कृतः तत्र विषयसप्तमीनिर्दिष्टो विषय इत्युच्यते

अधिकरणसप्तमीनिर्दिष्टस्त्वाश्रयः षष्ठ्यादिनिर्दिष्टः संबंधीति विवेकः गुरुरित्यस्यार्थकथनं महानिति गुरुर्महति वाच्यवदिति विश्वकोशात् पटुरिति तु तत्पर्यवसितार्थकथनं पटुर्दक्ष इत्यादीत्यादिना कीर्तिविषये ऽर्जुनो धवल इति वत्सार्थ इत्यर्थांतरस्य धनुर्विषये भीष्मो भीषण इतिवत् गांगेय इत्यर्थांतरस्य च संग्रहः भीष्मस्तु भीषणे रुद्रे गांगेये च निशाचर इति विश्वः कोडीकरणात् एकवृंतगतफलद्वयन्यायेन संग्रहात् अक्लशमिति कपालिनो हरस्य भागधेयं भाग्यं तत्त्वेनाध्यवसितं पार्वतीस्वरूपं चित्ते आविरस्तु प्रकटीभवत्विति संबंधः किंभूतं कुचयोः कुचविषये अक्लशं स्थूलं एव

अक्लशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितंबे
अधरे रुणमाविरस्तु चित्ते करुणाशालि कपालिभागधेयं

मग्रेपि विलग्नो मध्यः विलग्नो मध्यलग्नयोरिति विश्वः विपुलं आयतं अधरे अधरोष्ठे अरुणमारक्तं अरुणाधरमिति पाठस्तु प्रक्रमभंगादयुक्तः चित्ते इति करुणाशालीत्यत्रापि मध्यमणिन्यायेन संबध्यते एवं तु षारास्तापसब्राते तामसेषु च तापिनः दृगंतास्ताडकाशत्रोर्भूयासुर्नमिभूतय इत्याद्यवधिकरणानेकत्वप्रयुक्तः यमः प्रतिमहीभृतां कृतवहो सितन्नीवृतां सतां खलु युधिष्ठिरो धनपति धनाकांक्षिणां गृहं शरणमिच्छतां कुलिशकोटिभिर्निर्मितं त्वमेक इह भूतले बहुविधो विधात्राकृत इत्यादौ संबंधिभेदप्रयुक्तश्चोल्लेखो द्रष्टव्य इति दिक्

इत्यलंकारचंद्रिकायामुल्लेखप्रकरणं

अथज्ञानप्राधान्यसाम्यात्स्मृत्यादीनलंकारान्लक्षयति स्यादिति स्मृतिभ्रांतिसंदेहैर्व्यवहर्तव्यतयाहेतुभूतैस्तदंकंतेषामंकस्तदंकः तदंकोविद्यतेअस्मि
न्तथाभूतंमत्वर्थीयाच्प्रत्ययात् अंकश्चिह्नंसंज्ञेतियावत् तेनतत्संज्ञासंज्ञितमित्यर्थः अलंकृतित्रयंव्यवहारविषयःस्यादितियोजना एवंचस्मृ
तित्वभ्रांतित्वसंदेहत्वानित्रीणिलक्षणानि तत्रस्मृतित्वंतावत्स्मरामीत्यनुभवसाक्षिकोजातिविशेषः भ्रांतित्वंविशेष्यावृत्तिप्रकारकज्ञानत्वं संदे
हत्वंतुनिश्चयभिन्नत्वेसतिसंभावनाभिन्नज्ञानत्वंपारिभाषिकं स्मृतिभ्रांत्यादिवारणायसत्यंतं उत्प्रेक्षावारणायसंभावनाभिन्नेति चमत्कारित्वं

स्यात्स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्रयं पंकजंपश्यतःकांतामुखंमेगाहतेमनः अयंप्रमत्तमधुपस्त्वन्मुखंवेत्तिपंकजं पंकजं
वासुधांशुर्वेत्यस्माकंतुननिर्णयः स्मृतिभ्रांतिसंदेहैःसादृश्यान्निबध्यमानैःस्मृतिमान्भ्रांतिमान्ससंदेहइतिस्मृत्यादिपदांकितमलं
कारत्रयंभवति तच्चक्रमेणोदाहृतं

पुनरखिलालंकारसाधारणंलक्षणत्रयेपिनिवेशनीयं तेनसघटइतिस्मृताविदंरजतमितिभ्रांतावयं
स्थाणुःपुरुषोवेतिसंशयेनातिप्रसंगइतिध्येयं गाहतेआकलयतिस्मरतीतियावत् सादृश्यान्निबध्यमानैरितिचमत्कारित्वोपलक्षकं नत्वेत
स्यापिस्वातंत्र्येणलक्षणेप्रवेशः सादृश्यामूलकानामपिस्मृत्यादीनांचमत्कारित्वेऽलंकारतायाअनिवार्यत्वात् चमत्कारित्वैकजीवातुत्वात्तस्याःअ
चमत्कारित्वेतुतेनैववारणमितिव्यर्थंसादृश्यहेतुकत्वविशेषणं नचैतदेवोपादीयतांनतुचमत्कारित्वविशेषणमितिवाच्यं उदाहृतेषुसादृ-

त्वयमूलकस्मृत्यादिध्वनिप्रसंगवारणार्थं तस्यावश्यकत्वादितिसंक्षेपः दिव्यानामिति माघेजलक्रीडावर्णनप्रस्तावेपद्यमिदं शौरिः श्रीकृष्णः अंभस्तःज
लात् उत्तरंतीं निर्गच्छंतीं श्रियमिव श्रीसदृशीं कांचित्पुरस्ताद्ग्रे उद्वीक्ष्यजलनिधिमंथनस्य अस्मार्षीत् स्मृतवान् अधीगर्थेतिकर्मणिषष्ठी किंभूतां दिविभवा
दिव्यास्तेषां देवानामपि सौंदर्यातिशयेन कृताश्चर्यां तथास्फुरता अरविंदेन कमलेन चारुः रमणीयः हस्तोयस्यास्तथाभूतां तथाचैवंविधनायिकासदृश
लक्ष्मीस्मरणात्तत्संबंधिजलनिधिमंथनस्मरणमितिभावः अत्र श्रियमिवेत्युपमायाः स्मृत्यंगत्वात्तयोरंगांगित्वलक्षणः संकरः पलाशेति वक्रिमलोहि-
यथावा दिव्यानामपिकृतविस्मयांपुरस्तादंभस्तःस्फुरदरविंदचारुहस्तां उद्वीक्ष्यश्रियमिवकांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्यशौ
रिः पूर्वत्रस्मृतिमदुदाहरणेसदृशस्यैव स्मृतिरत्रसदृशलक्ष्मीस्मृतिपूर्वकंतत्संबंधिनोजलनिधिमंथनस्यापिस्मृतिरितिभेदः पलाशमुकुल
भ्रांत्याशुकतुंडे पतत्यलिः सोपिजंबूफलभ्रांत्यातमलिंधर्तुमिच्छति अत्रान्योन्यविषयभ्रांतिनिबंधनः पूर्वोदाहरणाद्विशेषः जीवनग्रहणेनम्रा
गृहीत्वापुनरुद्गताः किंकनिष्ठाः किमुज्येष्ठा घटीयंत्रस्यदुर्जनाः पूर्वोदाहृतसंदेहः प्रसिद्धकोटिकः अयंतुकल्पितकोटिकइतिभेदः
त्वरूपसादृ
श्यात् भ्रांतिः अलिः भ्रमरः सोपिशुकोपिभ्रांतिनिबंधनइति भ्रांतिप्रयुक्तइत्यर्थः जीवनेतिजीवनंजलं प्राणसंयोगश्च अथवा जीवंतेनेनेतिजीवनंधनं नम्राअ
धोमुखाः विनीताश्च उन्नताः ऊर्ध्वमुखाः उद्धताश्च घटीयंत्रं एकरज्जुसंबद्धघटमालारूपंभाषायांराहट इतिप्रसिद्धं अप्रसिद्धेति घटीयंत्रसंबंधिनोर्ज्येष्ठकनि
ष्ठयोः कोप्ययोरप्रसिद्धेरितिभावः इत्यलंकारचंद्रिकायांस्मृतिभ्रांतिसंदेहप्रकरणं ७

(२७)

अथापह्नुतिः तत्र तावदभेदप्रतिपत्तिनिरूपितांगांगित्वान्यतरवान्निषेधोपह्नुतिरित्यपह्नुतिसामान्यलक्षणं निषेधश्च नञादिसत्वे वाच्यः क्वचित्तु तदभावात्कैतवादिपदैः परमतत्वोपन्यासादिभिश्च व्यंग्यः तथा क्वचिदभेदप्रतिपत्तिसमानाधिकरणः क्वचित्तु तद्व्यधिकरण इति विवेकः एवमभेदः क्वचिदारोप्यमाणः क्वचित्तु स्वाभाविकः एवं तत्प्रतिपत्तिरपि क्वचित् व्यंजनया प्रायशस्तु वाच्यत्वेनैव बोध्यं निषेधोऽपह्नुतिरित्येतावदुक्तौ न घूतमेतत्कितवक्रीडनं निशितैः शरैरिति प्रसिद्धनिषेधानुवादरूपे प्रतिषेधालंकारेतिव्याप्तिरतोऽभेदप्रतिपत्तिनिरूपितेत्यादिविशेषणमुपात्तं तत्र हि युद्धप्रवृत्तं कितवं प्रतियुद्धे घूतत्वाभावो निर्ज्ञातोपि कीर्त्यमानो घूत एव तव प्रागल्भ्यं न तु युद्ध इत्युपहासार्थो न तु युद्धाभेदप्रतिपत्त्यंगं तस्यास्तदुपन्यासं

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं

विनापि सिद्धत्वात् नाप्यंगिभूतः निर्ज्ञातत्वेन तदुपायानपेक्षणादिति तद्वारणं अभेदप्रतिपत्तिनिरूपितांगित्वमात्रोक्तौ शुद्धापह्नुतिहेत्वपह्नुतिपर्यस्तापह्नुतिकैतवापह्नुतिष्वव्याप्तिः तत्र सर्वत्र नायं सुधांशुरित्यादेर्निषेधस्य व्योमगंगासरोरुहाद्यभेदप्रतिपत्त्यर्थत्वेन तदंगतयांगित्वाभावात् अभेदप्रतिपत्तिनिरूपितांगत्वमात्रोक्तौ च भ्रांतापह्नुतिछेकापह्नुत्योरव्याप्तिः तयोर्भ्रांतिशंकानिवारणरूपनिषेधस्य प्राधान्येनाभेदप्रतिपत्त्यंगत्वाभावात्तत्तदन्यतरवत्वनिवेशः तदाहुः साम्यायापह्नवो यत्र सा विज्ञेयाऽपह्नुतिः अपह्नवाय सादृश्यं यस्मिन्नेषाप्यपह्नुतिरिति सर्वं चैतत्तत्तदुदाहरणव्याख्यानावसरे व्यक्तीभविष्यतीति नात्र प्रपंचितं एवं सामान्यलक्षणं मनसि निधाय शुद्धापह्नुत्यादींस्लक्षयन् दान्वकुमुपक्रमते शुद्धापह्नुतिरिति ७

लक्षणं व्याचष्टे वर्णनीयइति कविमतेर्विकासः स्फूर्तिशालित्वानथाचोपमेयेउपमानारोपफलकउपमेयधर्मस्याभिमतनिषेधः शुद्धापह्नुतिरितिलक्ष णमितिभावः अत्रचानुक्तनिमित्तत्वंकैतवादिपदाव्यंग्यत्वंचनिषेधविशेषणंबोध्यं तेनहेत्वपह्नुतौकैतवापह्नुतौचनातिप्रसंगः कांतःकिंन हिनूपुरइतिछेकापह्नुतौउपमेयधर्मस्यकांतत्वस्यनिषेधसत्वादितिप्रसंगवारणायाद्यंविशेषणं तत्रहिनकांतत्वनिषेधोनूपुरारोपार्थोऽपि

वर्णनीयेवस्तुनितत्सदृशधर्मारोपफलकस्तदीयधर्मनिह्नवः कविमतिविकासोत्प्रेक्षितधर्मांतर
स्यापिनिह्नवःशुद्धापह्नुतिः यथाचंद्रेवियन्नदीपुंडरीकत्वारोपफलकस्तदीयधर्मस्यचंद्रत्वस्यापह्नवः

तुनूपुरारोपएवशंकितकांतत्वनिषेधार्थइतितद्व्यावृत्तिः पर्यस्तापह्नुतिवारणायोपमेयधर्मेत्युक्तंनत्वोपमानधर्मस्यैवसुधांशुत्वादेर्निषेधइति-
नातिव्याप्तिरितिसर्वंसुस्थं पुंडरीकेति पुंडरीकंसिताम्भोजमित्यमरः एवंचसरोरुहपदंविशेषपरमितिभावः ७

अंकमिति इंदोर्दलितस्यस्फुटितस्येंद्रनीलमणेः शकलवत्श्यामंयद्दरीदृश्यते तत्केचिकथयंः अंकं कलंकं शशांकिरे शंकितवंतः परे ऽन्येजलनिधेः पं कंमेनिरे कतिचित्तु नः सारंगंसंजगदिरे अब्रुवन् परेइतरेभुवः भूमेश्छाया भूछायंएछन् विभाषासेनासुराछायेत्यादिना क्लीबत्वं वयंतुसांद्रंघनं निशिरात्रौ पीतं अतएव कुक्षिस्थमंधतमसंगाढध्वांतंआचक्ष्महे ब्रूमहइत्यन्वयः औत्प्रेक्षिकाः उत्प्रेक्षामात्रविषयाः कलंकादयः अपिनास्वाभा विकस्यभूछायत्वस्य समुच्चयः अर्थसिद्धइति नायंसुधांशुरित्यत्रनेतिशब्दोपात्तत्वाच्छाब्दः इहतुपरमतत्वोत्कीर्तनेनस्वानभिमतत्वसूचना

यथावा अंकंकेपिशशांकिरेजलनिधेः पंकंपरेमेनिरेसारंगंकतिचिच्चसंजगदिरे भूछायमैच्छन्परे इंदौयद्दलितेंद्रनील शकलश्यामंदरीदृश्यते तत्सांद्रंनिशिपीतमंधतमसंकुक्षिस्थमाचक्ष्महे अत्रौत्प्रेक्षिकधर्माणामप्यपह्नवः परपक्षत्वोपन्यासा दर्थसिद्धः सएवयुक्तिपूर्वश्चेदुच्यतेहेत्वपह्नुतिः नेंदुस्तीव्रोननिश्यर्कः सिंधोरौर्वोयमुत्थितः ७

दर्थगम्यइत्यर्थः एकत्रानेकापह्नवरूपतयाप्यत्रवैचित्र्यंबोध्यं हेत्वपह्नुतिमाह सएवेति शुद्धापह्नवएवेत्यर्थः युक्तिपूर्वइति योज्यतेसाध्यमनेने तियुक्तिर्हेतुः तत्पूर्वस्तित्सहितइत्यर्थः तथाचशुद्धापह्नवलक्षणएवानुक्तनिमित्तइत्यस्यस्थानेउक्तनिमित्तइत्युक्तौ हेत्वपह्नुतिलक्षणंसंपद्यतइति भावः नेंदुरित्यादि विरहाकुलोक्तिः तीव्रोदारुणोयतः अतोनेंदुः निशिरात्रौसत्वान्नार्कः और्वस्तुवडवानलइत्यमरः ७

नैशत्वेति निशिभवोनैशस्तत्त्वमित्यर्थः अत्रापिचंद्रत्वंस्वाभाविकोधर्मःसूर्यत्वंत्वोपेक्षिकमितिबोध्यं मंथानेति मंथानोमंथनदंडः सचासौभूमिध
रःपर्वतोमंदरस्तस्यमूलभारोयत्शिलासहस्त्रंतेनसंघट्टनाद्योव्रणस्तस्यकिणश्चिह्नमिंदुमध्येस्फुरतिप्रकाशते छायाभूमेःमृगोहरिणः शशकःशशइ
त्येषा अतिपामराणांमुखर्वतमानामुक्तिःहियस्मात्तेषांछायादीनांतत्रइंदुमध्यभागेकथंचिदपिकेनापिप्रकारेणप्रसक्तिर्नास्तीत्यन्वयः वैशारवमंथ

अत्रचंद्रएवतीव्रत्वनैशत्वयुक्तिभ्यांचंद्रत्वस्यसूर्यत्वापह्नवोवडवानलत्वारोपार्थः यथावा मंथानभूमिधरमूलशिलासहस्त्रसंघट्टन
व्रणकिणःस्फुरतींदुमध्ये छायामृगःशशकइत्यतिपामरोक्तिस्तेषांकथंचिदपितत्रहिनप्रसक्तिः अत्रचंद्रमध्येमंथनकालि
कमंदरशिलासंघट्टनव्रणकिणस्यैवछायादीनांसंभवोनास्तीतिछायात्वाद्यपह्नवःपामरवचनत्वोपन्यासेनाविष्कृतः अन्य
त्रतस्यारोपार्थःपर्यस्तापह्नुतिस्तुसः नायंसुधांशुःकिंतर्हिसुधांशुःप्रेयसीमुखं यत्रक्वचिद्वस्तुनितदीयधर्मनिह्नवः अन्यत्र
वर्णनीयेवस्तुनितस्यधर्मस्यारोपार्थःपर्यस्तापह्नुतिः

मंथानमंथानोमंथदंडकेइत्यमरः नास्तीतीति इतिहेतोरित्यर्थः पर्यस्तापह्नुति
माह अन्यत्रेति सःअपह्नवः तथाचतदारोपार्थस्तस्यापह्नवइतिलक्षणं निषेधस्यचनस्वाधिकरणेप्रतियोग्यारोपार्थत्वसंभवोनवास्वाधिक
रणेस्वारोपइत्यर्थसिद्धमेवारोपस्यान्याधिकरणत्वमन्यत्रेत्यनेनोक्तं अतएवपर्यस्तापह्नुतिरित्युच्यते पर्यस्ताआरोपविपरीताआरोपव्यधिक
रणेतितदर्थात्

(२८)

नचचंद्रेचंद्रत्वनिषेधस्यकथंसुखेनतदारोपार्थत्वमितिवाच्यं आरोपदार्ढ्यसंपादकत्वेननिषेधस्यतदर्थतायाअनुभवसिद्धत्वात् अतएवदृढारोपरूपकमेवेदंनापह्नुतिरितिप्राचांसिद्धांतस्तदनुसारेणैवचचित्रमीमांसायांप्रकृतस्यनिषेधेनयदन्यत्वप्रकल्पनमित्यपह्नुतिलक्षणमुक्तं इहत्वलंकाररत्नाकराद्यनुसारेणायंप्रभेदउपदर्शितसामान्यलक्षणाभिप्रायेणापह्नुतित्वेनोक्तइतिनिरवद्यं हालाहलइति हालाहलोविषंनैवभवतिकिंतुरमालक्ष्मीर्विषं जनाःपरंकेवलमत्रास्मिन्विषयेव्यत्ययंवैपरीत्यंमन्वतेअभ्युपगच्छंति कुतस्तत्राह यस्मात्शिवस्तंहालाहलंनिपीयसुखेनजागर्ति

यथाचंद्रेचंद्रत्वनिह्नवोवर्णनीयेसुखेनतदारोपार्थः यथावा हालाहलोनैवविषंविषंरमाजनाःपरंव्यत्ययमत्रमन्वते निपीयजागर्ति सुखेनतंशिवःस्पृशन्निमांमुह्यतिनिद्रयाहरिः पूर्वोदाहरणेहेतूक्तिर्नास्तिअत्रतुसास्तीतिविशेषः ततश्चपूर्वापह्नुतिवदत्रापिद्वैविध्यमपिद्रष्टव्यं

हरिस्तुइमांरमांस्पृशन्सन्निद्रयामुह्यति स्मरन्नितिपाठेस्मरन्नपिमुह्यतिकिमुस्पृशन्नित्यर्थः तथाचरमायाविषरूपत्वेमोहजनकत्वंहेतुःहालाहलस्यतत्वापह्नवेचजागरसुखप्रयोजकत्वमितिबोध्यं हालाहलोविषेइतिविश्वः अत्रस्पृशन्मुह्यतीतिकार्यकारणयोःपौर्वापर्यविपर्ययरूपातिशयोक्तिरलंकारःसाहेतूक्तिः ततश्चेति हेतूक्तितदनुक्तिरूपभेदादित्यर्थः पूर्वापह्नुतिवत् शुद्धापह्नुतिवत् द्वैविध्यं शुद्धपर्यस्तापह्नुतिःहेतुपर्यस्तापह्नुतिरित्येवंद्विप्रकारत्वं ७

भ्रांतापह्नुतिरिति अन्यस्य प्रकृतस्य भ्रांतिवारणेवार्यतेऽनेनेतिवारणं तथाचभ्रांतिवारकेतत्त्वाख्यानेसतीत्यर्थः भ्रांतंभ्रमः भावेक्तः भ्रांतापह्नुतिरि त्यर्थः एवंचतत्त्वकथनहेतुकभ्रांतिविषयनिषेधोभ्रांतापह्नुतिरितिलक्षणंबोध्यं तस्य तापकारित्वरूपस्मरवृत्तांतस्य नागरिकेति नगरेभवोनागरिक स्तंप्रतिग्रामीणस्यप्रश्नः समधिकापश्वंतरेभ्यः उन्नतिरुच्चता यस्यैवंभूतउभयतःमुखपृष्ठभागयोःपुच्छंयस्यैवंभूतश्चकोयं महिषइति नहिनही

भ्रांतापह्नुतिरन्यस्यशंकायांभ्रांतिवारणे तापंकरोतिसोत्कंपंज्वरःकिंनसखिस्मरः अत्रतापंकरोतीतिस्मरवृत्तांतेकथितेत स्यज्वरसाधारण्यादृजुबुध्यासख्याज्वरःकिमितिपृष्टेनसखिस्मरइतितत्त्वोक्त्याभ्रांतिवारणंकृतं यथावा नागरिकसमधिकोन्न तिरिहमहिषःकोयमुभयतःपुच्छः नहिनहिकरिकलभोयंशुंडादंडोयमस्यनतुपुच्छं इदंसंभवद्भ्रांतिपूर्विकायांभ्रांतापह्नुताबुदा हरणं

मुत्तरंमहिषइत्यनुषज्यते अयंकरिकलभःकरिशावकः कलभःकरिशावकइतिकोशात्कलभइत्येतावतैवसि द्धेकरिपदमुत्कृष्टकरिबोधार्थं अयमस्यशुंडादंडोनतुपुच्छमिति पुच्छइतिपाठोप्यर्द्धर्चादित्वात्साधुरेव अप्रयुक्तत्वंतुतत्रपरंविचार्यमिति पूर्वोदाहरणेसं देहरूपभ्रांतिविषयज्वरत्वापह्नवःज्वरःकिमितिप्रश्नेनतद्विषयसंदेहावगमात् इहतुमहिषत्वनिश्चयरूपभ्रांतिविषयस्यमहिषत्वस्येतिततोभेदः ९

(२४)

जटेति विरहिण्या इयमुक्तिः हे कुसुमशर पुरारातेर्हरस्य भ्रांत्या मां किं कुतः प्रहरसि पीडयसि यतो नेयं जटा किंतु वेणीकृतः अवेणी वेणीसं
पद्यते तथा कृतः कचानां कलापः तथा गले गरलं नैतदपि तु इयं कस्तूरी एवं शिरसि नैषा शशिलेखा किंतु कुसुमं तथा इयमंगे भूतिर्भस्म न भवति
परंतु प्रियविरहाज्जन्म यस्यैवंभूतो धवलिमा पांडिमेति अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनसूत्राद्व्यधिकरणोपि बहुव्री

कल्पितभ्रांतिपूर्वा यथा जटा नेयं वेणीकृतकचकलापो न गरलं गले कस्तूरीयं शिरसि शशिलेखा न कुसुमं
इयं भूतिर्नांगे प्रियविरहजन्मा धवलिमा पुरारातिभ्रांत्या कुसुमशर किं मां प्रहरसि अत्र कल्पितभ्रांतिर्ज
टा नेयमित्यादिनिषेधमात्रोन्नेया पूर्ववत्प्रश्नाभावात् दंडी त्वत्र तत्त्वाख्यानोपमेत्युपमाभेदं मेने यदाह
न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमा मतेति ७ ७

हिर्न दुष्टः कल्पितेति कुसुमशरे उत्प्रेक्षितेत्यर्थः निषेधमात्रोन्नेयेति निषेधस्य मसक्तिपूर्वकत्वादिति भावः मेने इत्यस्वरसोद्भावनं तद्बीजं तूपमा
बोधकस्येवादेरसत्त्वेपि तदुपगमे रूपकस्याप्युपमात्वं स्यादिति स्पष्टमेव ः ७ ७ ७ २६

छेकापह्नुतिरिति छेकोविदग्धस्तत्कृता अपह्नुतिः छेकापह्नुतिरितिलक्ष्यनिर्देशः वाक्यान्यथायोजनहेतुकः शंकिततात्विकवस्तुनिषेधइतिल
क्षणं अन्यस्यशंकात इत्यन्यशंकायानिवर्त्तनीयत्वेनहेतुतयाव्यपदेशः संतापात्स्नातीतिवत् अत्रचशुद्धापह्नुतिवारणायाद्यंविशेषणंम
मकिलश्रुतिमाहतदर्थिकामित्यधिकताद्रूप्यरूपकवारणायशंकितेति नचानेनैवशुद्धापह्नुतिवारणाद्वाक्येत्यादिव्यर्थमितिवाच्यं कस्य
वानभवेद्रोषः प्रियायासव्रणेधरे सभृंगंपद्ममाघ्रासीर्वारितापिमयाधुनेतिव्याजोक्तावतिप्रसंगवारकत्वेनतत्सार्थक्यात् यद्वक्ष्यति छेकाप

छेकापह्नुतिरन्यस्यशंकातस्तथ्यनिह्नवे प्रजल्पन्मत्पदेलग्नः कांतः किंनहिनूपुरः कस्यचित्कंचित्प्रतिरहस्योक्तावन्ये
नश्रुतायामुक्तेस्तात्पर्यांतरवर्णनेनतथ्यनिह्नवे छेकापह्नुतिः यथानायिकयानर्मसखींप्रति प्रजल्पन्मत्पदेलग्न इतिस्वना
यकवृत्तांतेनिगद्यमानेतदाकर्ण्यकांतः किमितिशंकितवतीं अन्यांप्रतिनूपुरइतिनिह्नवः

ह्नुतेरस्याश्चायंविशेषोयत्तस्यांवचन
स्यान्यथानयनेनापह्नवः अस्यामाकारस्यहेत्वंतरवर्णनेनगोपनमिति तथ्यनिह्नवइति तात्विकनिषेधेइत्यर्थः नूपुरोमंजीरः मंजीरो
नूपुरोऽस्त्रियामित्यमरः नर्मसखी क्रीडासखी अत्रकांतपरायाः प्रजल्पन्मत्पदेलग्नइत्युक्तेर्नूपुरतात्पर्यकत्ववर्णनेनकांतत्वापह्नवो
मुख्यः नूपुराभेदप्रतिपत्तिस्तुतदंगमितिबोध्यं ※

छ छ छ

27

सीत्कारमिति सीत्कारं तदनुकारिमुखध्वनिं शिक्षयति अधरं अधरोष्ठं व्रणयति व्रणोस्यास्तीति व्रणी व्रणिनं करोतीत्यर्थे तत्करोतीति णिच् न
थारोमांचं तनोति विस्तारयतीतिवाक्यत्रयं नागरिकाभिप्रायेण प्रियसखीं प्रति कयाप्युक्तं तदाकर्ण्य नागरिकः किमु मिलित इतिशंकितव
तीमन्यां प्रति तच्छंकानिवृत्तये नहीत्यादिना हेमंतिकपवनपरत्ववर्णनेन तात्विकस्य नागरिकस्यापह्नवः सीत्कारशिक्षादिकर्तृत्वस्य नाग

सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं नागरिकः किं मिलि

तो न हि न हि सखि हैमनः पवनः इदमर्थयोजनया तथ्यनिह्नवे उदाहरणं

रिक इव पवनेपि सत्वात् तदाह अर्थयोजनयेति विवक्षिताविवक्षितसाधारणस्यार्थस्याविवक्षितार्थसंबंधित्ववर्णनयेत्यर्थः इदमित्युदाह
रणमिति च जात्यभिप्रायेणैकवचनं हेमंतशब्दात्तत्रभवइत्यर्थे सर्वत्राण्तलोपश्चेत्यणि तलोपे च हैमन इति रूपसिद्धिः प्रजल्पन्नित्युदाहर
णे एकस्य वाक्यस्यान्यथा योजनमिह त्वनेकेषामिति भेदः

शब्दयोजनयेति अर्थभेदेपिशब्दश्लेषमात्रेणेत्यर्थः पद्मेइति क्रीडायाविटो भोक्ताकृष्णोवोयुष्मान्पातुरक्षत्विति संबंधः कीदृश इतिउत्तम वचःस्वप्नेउद्गतमुत्स्वप्नंवचनमर्थात्कृष्णस्य अनुभाष्य अनूद्यराधयानिर्भर्त्सितःसन् तद्वचनंतत्परमेवराधापरमेवव्यपदिशन् कथयन् इति किं हेपद्मेरमे त्वन्नयनेसततंस्मरामि नीलेभवत्याः कुंतलेकेशपाशेममभावोंतःकरणवृत्तिरूपःमुत्यतिमोहंप्राप्नोति ननुचिन्तासंगोनिवर्त्ति तांतत्राह किं करोमि अकिंचित्करोस्मि यतस्तेतवमहितैः पूज्यैः विभ्रमैर्विलासैः क्रीतोस्मिमूल्येनगृहीतोस्मीति किंकरोस्मीति कश्चित्पाठेयुक्त

शब्दयोजनायाथा पद्मेत्वन्नयनेस्मरामिसततंभावोभवत्कुंतले नीलेमुत्यति किंकरोमिमहितैः क्रीतोऽ
स्मितेविभ्रमैः इत्युत्स्वप्नवचोनिशम्यसरुषानिर्भर्त्सितोराधयाकृष्णस्तत्परमेवतद्व्यपदिशन्क्रीडाविटःपातुवः

नरः तत्रचास्मीत्यहमर्थकमव्ययं अहं किंकरोदासःक्रीतोस्मीत्यर्थः राधापरत्वेतु हेराधेइत्यर्थात्संबोधनं पद्मरूपत्वन्नयनेस्मरामीतिविशेषः ...पूर्ववत् अत्ररमासंबोध्यकस्तन्नयनस्मरणरूपेणवाक्यार्थोऽपितुत्वत्संबोध्यकः पद्मरूपत्वन्नयनस्मरणरूपइत्यपकृष्वत्स्तत्परमेवतद्व्य पदिशन्नित्यनेनप्रकाश्यते नचात्रार्थस्यरमाराधासाधारणत्वमपितुपद्मेइतिलिंगवचनश्लिष्टशब्दयोजनेवेति ५

विषयांतरेति विवक्षितविषयभिन्नेत्यर्थः अवस्था जाग्रत्स्वप्नादिरूपा वदंतीति पत्योर्भर्त्तरि सखीधिया सखिभ्रमेण जारवृत्तांतं स्वकामुकवा र्तां वदंती धूर्ता कानित्यतिंबुध्वा सखीत्यादिवाक्यशेषमपूरयत् पूरितवती सखीतिपुनःसंबोधनमप्रतार्यतासूचनाय ततः उक्तवृत्तांतानानंत रं प्रबुद्धा जागरणवती अत्र नासौ जाग्रदवस्थावृत्तांतः किंतु स्वाप्निक इत्यवस्थाभेदयोजनयापह्नवः सखीत्यादिवाक्यशेषेण प्रकाश्यते कै

सर्वमिदं विषयांतरयोजने उदाहरणं विषयैक्येप्यवस्थाभेदेन योजने यथा वदंती जारवृत्तांतं पत्यौ धूर्तासखीधिया प तिंबुध्वा सखि ततः प्रबुद्धास्मीत्यपूरयत् कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः निर्यांति स्मरनाराचाः कांतादृक्पात कैतवात् अत्रासत्यत्वाभिधायिना कैतवपदेन नेमे कांताकटाक्षाः किंतु स्मरनाराचा इत्यपह्नवः प्रतीयते ७

तवापह्नुतिरितिलक्ष्यनिर्देशः व्याजाद्यैः पदैर्निह्नुतेर्व्यक्तौ अभिव्यक्तौ सत्यां कैतवापह्नुतिरिति व्यवहर्तव्यमित्यर्थः कैतवेनापह्नुतिरितिव्युत्पत्तेः व्या जाद्यैरित्यनेन मिषकपटछलछद्मकैतवादयो गृह्यंते एवं च कैतवादिपदव्यंग्यापह्नुतित्वं लक्षणं बोध्यं नाराचा बाणाः दृक्पाताः कटाक्षाः अप ह्नवः निषेधः प्रतीयत इति असत्यत्वस्य विषयबाधाधीनत्वादितिभावः ७ ७ ७

रिक्तेष्विति ग्रीष्मवर्णनं तरवो वृक्षाः वारिणोजलस्य कथयावार्तयापि रिक्तेषुशून्येषु विपिनस्यारण्यस्योदरेषुमध्यप्रदेशेषुजलं अर्थयंते प्रार्थयंते कीदृशाः मध्याह्नेजृंभितः प्रवृद्धोयोमहानातपउष्णं तस्यतापस्तपनं तेन तप्ताः संतप्ताः किंकृत्वा स्कंधांतरात् प्रकांडाभ्यंतरादुत्थितोयोदवाग्निर्दावानलस्तस्ययाशिखाज्वालातस्याः छलेन जिह्वांप्रसार्येति अस्त्रीप्रकांडः स्कंधस्यान्मूलाच्छाखावधिस्तरोरित्यमरः अत्रनेयंदवाग्निशिखा अपितुजिह्वेति छलपदात्प्रतीयते अत्रचानभिहितवाच्यतादोषनिरासायकथयापिवनोदरेष्विति पठनीयं इत्यपकुतिप्रकरणं ॥

रिक्तेषुवारिकथयाविपिनोदरेषुमध्याह्नजृंभितमहातपतापतप्ताः स्कंधांतरोत्थितदवाग्निशिखाछलेन जिह्वांप्रसार्यतरवो
जलमर्थयंते संभावनास्यादुत्प्रेक्षावस्तुहेतुफलात्मना उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदेपरे ॥ ॥ ॥

उत्प्रेक्षांलक्षयति संभावनेति अत्रोत्प्रेक्षेत्यनंतरंसाचत्रिधेत्यध्याहार्यं तथाच संभावनाउत्प्रेक्षापदवाच्यास्यात्साच वस्तुहेतुफलरूपेणत्रिधेत्यर्थः वस्तुहेतुफलानांच संभावनाधर्मत्वंस्वविधेयकत्वसंबंधेन तेन वस्तुहेतुफलविधेयकत्वेनेति पर्यवसितार्थः वस्तुत्वंचहेतुत्वेन फलत्वेनवाविवक्षितंयत्तद्भिन्नत्वं नातोवस्तुत्वस्यकेवलान्वयितयाविभागासंगतिः उक्तेत्यादि अत्र आसामुत्प्रेक्षाणांमध्येआद्यावस्तूत्प्रेक्षाउक्तंचानुक्तंचोक्तानुक्ते आस्पदंयस्याइतिविग्रहः आस्पदंचोत्प्रेक्षायाधर्मिरूपोविषयः सिद्धासिद्धेत्यत्रविग्रहः पूर्ववत् ॥

धूमेति तमः कोकीविरहशुष्मणां धूमस्तोमं शंके इत्यन्वयः कोकस्य चक्रवाकस्य स्त्री कोकी तस्या विरहरूपाणां शुष्मणां अग्नीनां संबंधिनं धूमसमूहमित्यर्थः लिंपतीवेति अत्र तम इति नभ इति च कर्तृपदं रक्ताविव्यादि दयितां प्रति नायकस्योक्तिः तव मृदुलौ सुकुमारावंघ्रीचरणौ ध्रुवं भुवि विक्षेपणाद्धेतोः रक्तवर्णाविति त्वन्मुखेति पद्मगतायास्त्वन्मुखकांतेरिच्छया हेतुनेत्यर्थः वैरायत इति वैरं करोतीत्यर्थे शब्दवैरकलहाभ्र

धूमस्तोमं तमः शंके कोकीविरहशुष्मणां लिंपतीव तमोंगानि वर्षतीवांजनं नभः
रक्तौ तवांघ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवं त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी
मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः प्रायोऽग्नंत्वसदैक्यं प्राप्तुं तोये तपस्यति

कण्वमेघेभ्यः करण इति क्यङ् मध्य इति मध्यभागः कुचयोर्धृत्यै धरणार्थं कनकस्य दामभिः रज्जुभिरिति निगीर्याध्यवसानरूपातिशयोक्त्या वलीभिः बद्धः किमित्यर्थः प्राय इति अब्जं कर्तृ प्रायः बहुधा त्वच्चरणेन सहैक्यं प्राप्तुं तोये जले तपस्यति तपश्चरतीत्यर्थः कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यङ् तपसः परस्मैपदं चेति परस्मैपदं लक्षणं परिस्फुरुते ६७ ६८

अन्यधर्मेति अन्यस्यविषयिणो यो धर्मस्तत्संबंधरूपेण निमित्तेन अन्यस्य अन्यविषयकं अन्यस्यविषयिणः तादात्म्येन संभावनमित्यर्थः अन्यस्ये
तिषष्ठ्यर्थो विषयताधर्मितारूपा विषयिण इति षष्ठ्यर्थस्तु विशेषणतारूपा विषयता अन्यत्वेनोत्कीर्तनं च संभावनाया आहार्यतासूचनाय त
थाच विषयिनिष्ठधर्मसंबंधप्रयुक्तं विषयधर्मिकं तादात्म्यसंसर्गेण विषयिविधेयकमाहार्यसंभावनमुत्प्रेक्षेति पर्यवसितं तन्निष्ठधर्मसंबंध

अन्यधर्मसंबंधनिमित्तेन अन्यस्य अन्यतादात्म्यसंभावनमुत्प्रेक्षा सा वस्तुहेतुफला
त्मतागोचरत्वेन त्रिविधा अत्र वस्तुनः कस्यचिद्वस्त्वंतरतादात्म्यसंभावना प्रथमा स्वरूपो
त्प्रेक्षेत्युच्यते अहेतोर्हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते

प्रयुक्तमाहार्यतत्संभावनमिति तु निष्कर्षः इतरांशस्याव्यावर्तकतया स्वरूपकथनमात्रपरत्वात् मुखं चंद्रं मन्य इत्युत्प्रेक्षायां चंद्रनिष्ठाह्लाद
कत्वादिधर्मसंबंधप्रयुक्तं मुखे चंद्रसंभावनमाहार्यमस्तीति लक्षणसमन्वयः बाधाद्यभावदशायां तु जायमाना मुखादौ चंद्रादिसंभावना नोत्प्रेक्षे
ति तद्वारणायाहार्येति एतेन विरक्तसंध्यापरुषं पुरस्ताद्यथा रजः पार्थिवमुज्जिहीते शंके हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्य इत्य

त्रर जो भरोद्गमनरूपससैन्यप्रयुक्तत्वधर्मसंबंधप्रयुक्तायां भरतेतत्संभावनायामपिनातिव्याप्तिः तस्याअनाहार्यत्वात् संभावनंयदीत्थंस्यादित्यू
होन्यस्यसिद्ध्यइतिवक्ष्यमाणसंभावनालंकारविषयेयद्विशेषोभवेद्युक्ताकथिताःस्युर्गुणास्तवेत्यादावतिव्याप्तिवारणायप्रयुक्तांतं सर्वातिशा
यिसौंदर्यशंकेसत्यवतोमुखं येनसामृगशावाक्षीसावित्रीतरलीकृतेत्यादावतिप्रसंगवारणायतन्निष्ठेतिसंभाव्यमानवृत्तित्वं धर्मविशेष
णं तत्रसावित्रीतरलीकारकत्वरूपोधर्मोमुखवृत्तिर्नतुसंभाव्यमानवृत्तिरितिनातिप्रसंगइतिदिक् वस्तुहेतुफलात्मता वस्तुहेतुफलतादा
त्म्यं ननुसंबंधांतरेणोत्प्रेक्षायाअसंग्रहइतिचेन्न सर्वत्राभेदेनैवोत्प्रेक्षणमितिप्राचीनमतानुसारेणेत्थमभिधानात् एतत्सूचनायैवलक्षणे
त्रच तादात्म्योपादानमिति नन्वलंकारसर्वस्वकारादिभिःस्वरूपोत्प्रेक्षेतिव्यवहृतायास्तुरीयाया अपि सत्वात् त्रिविधेत्ययुक्तमित्याशं
क्याह

९ ९ ९

चं

३

अत्रेति आसांमध्येयाप्रथमावस्तूत्प्रेक्षासेवस्वरूपोत्प्रेक्षेत्युच्यतइत्यर्थः विसृत्वरस्येतिप्रसरणशीलस्येत्यर्थः नमसइति संभावनेत्यनेनान्वेति
षष्ठ्यर्थोविषयता तमोविषयेत्यर्थः प्रतिरोधकत्वादीत्यादिपदात् प्रसरणशीलत्वस्यसंग्रहः प्रियैःपतिभिर्विघटितावियुक्ताः व्यापनस्येतिषष्ठ्यं

अत्रआद्यास्वरूपोत्प्रेक्षाउक्तविषयानुक्तविषयाचेतिद्विविधा परेहेतुफलोत्प्रेक्षेसिद्धविषयाऽसिद्धविषयाचेतिप्रत्येकं
द्विविधे एवंषण्णामुत्प्रेक्षाणांधूमस्तोमेत्यादीनिक्रमेणोदाहरणानि रजनीमुखेसर्वत्रविसृत्वरस्यतमसोनैत्यदृष्टिप्रति
रोधकत्वादिधर्मसंबंधेनगम्यमानेननिमित्तेनसद्यःप्रियविघटितसर्वदिशास्थितकोकांगनात्हृदुपगतप्रज्वलिष्यद्विरहानल
धूमस्तोमतादात्म्यसंभावनास्वरूपोत्प्रेक्षा तमसोविषयस्योपादानादुक्तविषया तमोव्यापनस्यनभःप्रभृतिभूपर्यंतसक
लवस्तुसांद्रमलिनीकरणेननिमित्तेनतमःकर्तृकलेपनतादात्म्योत्प्रेक्षा नभःकर्तृकांजनवर्षणतादात्म्योत्प्रेक्षाचानुक्तवि
षयास्वरूपोत्प्रेक्षा उभयत्रापिविषयभूततमोव्यापनस्य अनुपादानात् ५ ५ ५

तस्यपूर्ववदुत्प्रेक्षापदेनान्वयः एवमग्रेतनस्यतमसइत्यस्यापि अनुपादानादितिविषयिवाचकाभ्यांलिंपतिवर्षतिभ्यामन्येनानुपादानादित्यर्थः
यथाश्रुतेताभ्यामेवसाध्यवसानलक्षणयोपादानादसंगतेः ५ ५ ५

उक्तविषयमेवेति सकृदुच्चरिताभ्यांलिंपतिवर्षतिभ्यांशक्त्यालेपनवर्षणयोः साध्यवसानलक्षणयाचसाधारणधर्मपुरस्कारेण व्यापनस्यचोपस्था पनस्ययुगपद्वृत्तिद्वयविरोधेनासंभवादित्याशयः स्मृतेः निरुक्तस्मृतेः उत्प्रेक्षणीयतयाउत्प्रेक्षाविषयतया अन्यत्रउत्प्रेक्षायां अन्वयसंभवादि ति निराकांक्षत्वादितिभावः अतएव आख्यातार्थस्यकर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवादेव क्वचिदतएवेत्युत्तरं अयमेवव्याख्यान

नन्वत्र तमसोव्यापनेननिमित्तेनलेपनकर्तृतादात्म्योत्प्रेक्षा नभसोभूपर्यन्तंगाढनीलिमव्याप्तत्वेन निमित्तेनांजनवर्षणक र्तृतादात्म्योत्प्रेक्षाचेतिउत्प्रेक्षाद्वयमुक्तविषयमेवास्तु मैवं लिंपतिवर्षतीत्याख्यातयोः कर्तृवाचकत्वेपिभावप्रधानमाख्या तमितिस्मृतेर्धात्वर्थक्रियाया एवप्राधान्येन तदुपसर्जनत्वेनान्वितस्यकर्तुरुत्प्रेक्षणीयतया अन्यत्रान्वयासंभवात् अतए वाख्यातार्थस्यकर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवादेवास्योपमायामुपमानतयान्वयोपिदंडिनानिराकृतः कर्त्रायद्युप मानंस्यान्न्यग्भूतोसौक्रियापदे स्वक्रियासाधनव्यग्रोनालमन्यद्व्यपेक्षितुमिति

ग्रंथः प्रमादलिखितोदृश्यते न्यग्भूतेति गुणभूतइत्यर्थः

स्वक्रियेति क्रियांप्रतिसाधनत्वेनान्वितइत्यर्थः व्यपेक्षितुंआकांक्षितुं नालंनसमर्थः तथाचनिराकांक्षत्वादुपमानत्वेनान्वयोनसंभवतीतिभावः एते नतमसिलेपनकर्तृत्वमुत्प्रेक्ष्यमित्यलंकारसर्वस्वकारमतमपास्तं तस्यापिकर्तृविशेषणत्वात् विवक्षितविवेकेनलेपनस्यैवोत्प्रेक्ष्यत्वाच्च एवंतम

धानभूतलेपनक्रियागोचराभावेनैवनिगीर्णव्यापनविषयेतिसिद्धं नचयुगपद्वृत्तिद्वयविरोधःशंक्यः तदनभ्युपगमात् केचिदितिमनइतिचास्वरसो
द्भावनं तद्बीजंतुतमोनभसोःकर्तृत्वेनविषयत्वेनचवारद्वयमन्वयक्लेशः तथाधर्म्युत्प्रेक्षासाधर्मप्रयुक्ता धर्मोत्प्रेक्षातुतत्सहचरितधर्मसंबंधप्रयु

केचित्तु तमोनभसोर्विषययोस्तत्कर्तृकलेपनवर्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः तन्मतेस्वरूपोत्प्रेक्षायांधर्म्युत्प्रेक्षा
धर्मोत्प्रेक्षाचेत्येवंद्वैविध्यंद्रष्टव्यं चरणयोःस्वतःसिद्धेरक्तिमनिवस्तुनोविक्षेपणंनहेतुरितिअहेतोस्तस्यहेतु
त्वेनसंभावनाहेतूत्प्रेक्षाविक्षेपणस्यविषयस्यसत्वात्सिद्धविषया चंद्रपद्मविरोधस्वाभाविकेनायिकावदनकां
तिप्रेक्षानहेतुरितितत्रनहेतुत्वसंभावनाहेतूत्प्रेक्षावस्तुतस्तद्दिछाया अभावादसिद्धविषया मध्यःस्वयमवकुंठो
धरतिननुकनकदामबंधत्वेनाध्यवसितायावलित्रयशालितायाबलादितिमध्यकर्तृककुचधृतेर्मन्त्रफलत्वेनो
त्प्रेक्षासिद्धविषयाफलोत्प्रेक्षा जलजस्यजलावस्थितेरुदवासतपस्त्वेनाध्यवसितायाःकामिनीचरणसायुज्य
प्राप्तिर्नफलमितितस्यागगनकुसुमायमानायास्तपःफलत्वेनोत्प्रेक्षणात् असिद्धविषयाफलोत्प्रेक्षा अनेनैवक्र
मेणोदाहरणांतराणि ॥

केतिलक्षणाननुगमः नचतन्निष्ठतत्समानाधिकरणान्यतरत्वेनधर्मनिवेशान्नाननुगमइतिवाच्यं सर्वत्रस

कुवल०
३२

द्रव्यनिमित्तायाएवोत्प्रेक्षायाः संभवेनान्यतरत्वादिनिवेशप्रयुक्तगौरवस्यानुपादेयत्वादिति हेतुत्वेनेति हेतुरूपतयेत्यर्थः हेतुत्वसंभावना हे
तुरूपतासंभावना फलत्वेनफलरूपतया एवमग्रेपिबोध्यं अथोदाहृतासूत्प्रेक्षासु बोधःप्रकारःप्रदर्श्यते तत्रधूमस्तोममित्यादौ कोकांगनावि
रहानलसंबंधिधूमस्तोमाभिन्नतमोविषयासंभावनेतिबोधः नामार्थयोरभेदान्वयात् एवंमुखंचंद्रंमन्यइत्यादावपि नूनंमुखंचंद्रइत्यादौतुचं
द्रप्रकारकसंभावनाविषयोमुखमितिबोधः मुखविषयाचंद्रप्रकारिकावसंभावनातादात्म्यसंसर्गिकैव तथानुभवात्चमत्कारप्रयोजकस्य
संसर्गांतरस्याभावाच्च नत्वेवंचंद्रत्वप्रकारिका तस्यचंद्रोपसर्जनत्वात् एवंध्रुवेवादिशब्दसमभिव्याहारेपिबोध्यं लिंपतीवेत्यनुक्तविषयोत्प्रेक्षोदा
हरणेतुलिंपतिनासाध्यवसानलक्षणयालेपनव्यापनोभयसाधारणेनसांद्रमलिनीकारकत्वादिनारूपेणोपस्थापितेतमोव्यापनेलेपनसंभावनान्व
यात् सांद्रमलिनीकारकंतमःकर्तृकांगकर्मकलेपनप्रकारकसंभावनाविषयइतिबोधः व्यंजनयोपस्थितेव्यापनेतादृशसंभावनान्वयइतिप्रदीप
कृतः एवंवर्षतीत्यादावपिबोध्यं विक्षेपणात् ध्रुवमित्यादिहेतूत्प्रेक्षोदाहरणेहेतुःपंचम्यर्थः तत्रचाभेदेनप्रकृत्यर्थान्वयः हेतोश्चस्वप्रयोज्याश्र
यत्वसंबंधेनरक्तत्वविशिष्टेतस्यप्रकारतासंबंधेनसंभावनायांतस्याश्चविषयतयाचरणयोरन्वयः तथाचभूम्यधिकरणकविक्षेपणाभिन्न
हेतुकरक्तप्रकारकसंभावनाविषयावंघ्रीइतिबोधः नचतादात्म्यसंबंधेनहेतुविधेयकत्वाभावान्नेयंहेतूत्प्रेक्षास्यात्किंतुतादात्म्येनतथाविधर
क्तस्वरूपोत्प्रेक्षैवेतिवाच्यं विवक्षितविवेकेनविक्षेपणेहेतुभेदस्योत्प्रेक्षणीयतया विक्षेपणंप्रतिविशेष्यभूतस्यापिहेतोर्विधेयत्वोपगमात् मुख

चं०
३२

चंद्र इत्यादिरूपक इवानुयोगित्वमुखस्याभेदस्य विक्षेपणसंसर्गत्वाभ्युपगमे नच विक्षेपणे हेत्वभेदभानसंभवात् हेतुविशिष्टस्वरूपोत्प्रेक्षायामुखतः प्रतीतावपि विवक्षावशेन हेतूत्प्रेक्षात्वेनैव व्यपदेशः यथा दध्नाजुहोतीत्यत्र मुखतो दधिविशिष्टहोमप्रतीतावपि विवक्षितविवेकेन होमे दधिविधित्वव्यपदेश इति बोध्यं नच स्वप्रयोज्यत्वसंबंधेन स्वप्रयोज्याश्रयत्वसंबंधेन वा हेतुरूपधर्मोत्प्रेक्षैव रक्ता दोस्त्वी क्रियतां कृतमीदृशकल्पनाक्लेशेनेति वाच्यं धर्मोत्प्रेक्षांगीकारे दूषणस्य प्रागेवावेदितत्वात् अतएव हर्षाल्लिग्नामन्ये ललिततनुते पादयोः पद्मलक्ष्मीरिति हेतूत्प्रेक्षामुदाहृतवतः प्रकाशकृतोपि तत्र हर्षहेतुकलगनतादात्म्यसंभावनमेव स्वाभावाविके लगनेऽभिमतं अस्मदुक्तरीत्या तु लक्ष्मीरूपे विषये यथोक्तहर्षहेतुकलगनतादात्म्यसंभावनमुचितं लगनस्य धर्म्युपसर्जनत्वेन संभावनायामन्वयायोगादिति ध्येयं एवं त्वन्मुखाभेच्छयेत्यसिद्धविषयहेतूत्प्रेक्षायामपि बोध्यं विषयसिद्धत्वासिद्धत्वाभ्यां बोधविशेषाभावात् मध्यः किमित्यादि फलोत्प्रेक्षास्थले फलं चतुर्थ्यर्थः तत्र चाभेदेन प्रकृत्यर्थान्वयः पूर्ववत् फलस्य च प्रयोजकत्वसंसर्गेण बद्धत्वे तत्द्वारकेण तेनैव बद्धे वान्वयस्तत्तादात्म्यसंसर्गकसंभावनायां मध्ये विषयतया एवं च कुचधरणाभिन्नफलककनकदामकरणकबद्धत्वाश्रयसंभावनाविषयो मध्य इति बोधः एवं प्रायोङ्कमित्यादावपि फलं तुमुनोर्थ इति पूर्ववदेव बोधः फलोत्प्रेक्षात्वं चोपदर्शितरीत्योपपादनीयमिति बहुवक्तव्येपि विस्तरभयादुपरम्यते ॐ ५ ६ १

बालेंदुवक्राणीति नविद्यते विकासोयेषां तान्यविकासानि तेषांभावात् विकासरहितत्वाद्धेतोः बालेंदुवत् द्वितीयाचंद्रवत् वक्राणि तथातिशयेन लोहितानि आरक्तानि पलाशानि पलाशकुसुमानि वसंतेननायकेन समागमं प्राप्तानां वनस्थलीनामंगनानां सद्यस्तत्कालसंभूतानि नरवक्षतानी

बालेंदुवक्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि सद्योवसंतेनसमागतानां नखक्षतानीव वनस्थलीनां अत्र पलाशकुसुमानां वक्रत्वलोहितत्वेन संबंधेन निमित्तेन सद्यःकृतनखक्षततादात्म्यसंभावनाउक्तविषयास्वरूपोत्प्रेक्षा पूर्वोदाहरणे निमित्तभूतधर्मसंबंधोगम्यः इहतूपात्त इतिभेदः नन्विवशब्दस्य सादृश्यपरत्वेनप्रसिद्धत्वादुपमैवास्तु लिंपतीवेत्युदाहरणेलेपनकर्तुरुपमानत्वार्हस्यक्रियोपसर्जनत्ववदिह नखक्षतानामन्योपसर्जनत्वस्योपमाबाधकस्याभावात् उच्यते उपमायायत्र क्वचित्स्थितैरपि नखक्षतैः सहवक्तुंशक्यतया वसंतनायकसमागतवनस्थलीसंबंधित्वस्य विशेषणस्यानपेक्षितत्वादिहतदुपादानं पलाशकुसुमानां नखक्षततादात्म्यसंभावनायामिवशब्दमवस्थापयति तथात्वएव तद्विशेषणसाफल्यात् अस्तिवसंभावनायामिवशब्दः दूरेतिष्ठन् देवदत्त इवाभातीति

वबभुः शुशुभिरे इत्यन्वयः पूर्वेति धूमस्तोममित्यत्रेत्यर्थः ननु लोके संभावनायामिवशब्दोनदृष्टइत्यतआह अस्तिचेति

पिनष्टीवेति समुद्रस्तरंगाणामग्रभागैः फेनरूपंचंदनं पिनष्टीव इंदुस्तत्फेनचंदनमादाय करैः किरणैर्दिक्‌रूपा अंगनाः लिंपतीव अनुलिंपतीवे त्यर्थः समुद्रोपांतेति समुद्रस्योपांतेतटेयत्फेनचंदनं तत्कर्तृकं यत्तासां दिशां लेपनं तत्त्वेनेत्यर्थः उभयत्रउभयोरुत्प्रेक्षयोः येषां अलंकारसर्वस्व

पिनष्टीवतरंगाग्रैः समुद्रः फेनचंदनं तदादायकरैरिंदुर्लिंपतीवदिगंगनाः अत्रतरंगाग्रैः फेनचंदनस्यप्रेरणंपेषणतयोत्प्रेक्ष्यते समुद्रादुत्थितस्यचंद्रस्यप्रथमंसमुद्रपूरेप्रसृतानांकराणांदिक्षुव्यापनंचसमुद्रोपांतफेनचंदनकृतलेपनत्वेनोत्प्रेक्ष्यते उभयत्रक्रमेणसमुद्रप्रांतगतफेनचंदनपुंजीभवनंदिशांधवलीकरणंचनिमित्तमितिफेनचंदनप्रेरणकिरणव्यापनयोर्विषययोरनुपादानादनुक्तविषयेस्वरूपोत्प्रेक्षे एषांतूपात्तयोः समुद्रचंद्रयोरेव तत्कर्तृकपेषणलेपनरूपधर्मोत्प्रेक्षेतिमतं तेषांमतेपूर्वोदाहरणेधर्मिणिधर्म्यंतरतादात्म्योत्प्रेक्षा इहतुधर्मिणिधर्मसंसर्गोत्प्रेक्षेतिभेदोवगंतव्यः रात्रौरवेर्दिवाचंद्रोरभावादिवसःप्रभुः भूमौप्रतापयशसीसृष्टवान्सततोदिते रात्रौरवेर्दिवाचंद्रस्याभावःसन्नपिप्रतापयशसोःसर्गेनहेतुरिति तस्यतद्धेतुत्वसंभावनासिद्धविषयाहेतूत्प्रेक्षा

कारादीनां रात्राविति सप्रक्रांतः प्रभुर्भूपतिर्भूमौरात्रौरवेरभावाद्धेतोरिवदिवाचंद्रोरभावाद्धेतोरिवसततंनिरंतरमुदितेप्रतापयशसीसृष्टवान्निर्मितवानित्यर्थः रक्ताविस्युदाहरणेभावरूपोहेतुरिहत्वभावरूपइतिभेदः ६५ ६६ ६७

३५

विवस्वतेति विवस्वता सूर्येण स्वस्य गोसहस्रेण किरणसहस्रेण संमिश्राः मिश्रिताः जनानां नेत्रापरनामधेया गावोपि अनायिषतेव नीताइव यथा गोपालेन परकीयाभिर्गोभिर्मिश्राः स्वीया गावो नीयंते तथा गोपदवाच्यत्वसाजात्येन मिश्रिता विवस्वता पिनीताइवेत्यर्थः खलु संभावनायां तेन नयनेन हेतुनाइदमांध्यं नत्वंधकारैरित्यन्वयः गोः स्वर्गेच वलीवर्दे रश्मौ च कुलिशे पुमान् स्त्री सौरभेयीदृक्बाणदिग्वाग्भूष्वप्सु

विवस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समंजनानां गावोपि नेत्राप
रनामधेयास्तेनेदमांध्यं खलु नांधकारैः अत्र विवस्वताकृतं स्वकिरणैः सहज
नलोचनानां नयनमसदेव रात्रावांध्यं प्रति हेतुत्वेनोत्प्रेक्ष्यत इति असिद्धविषया हेतूत्प्रेक्षा

भूम्नि चेति मेदिनी अत्र चानायिषतेवेति विषयोत्प्रेक्षणपूर्वकं तस्य हेतुत्वेनोत्प्रेक्षणमिति पूर्वस्माद्भेदः एवं पूर्वत्र इच्छयेति गुणरूपो हेतुरिह तु क्रियारूप इत्यपि द्रष्टव्यं अत्र चोत्प्रेक्षाद्वयसत्वेपि हेतूत्प्रेक्षायाः प्राधान्यात्तत्वेनैव व्यपदेशो न तु स्वरूपोत्प्रेक्षात्वेन तस्या अंगत्वात् एवमन्यत्रापि बोध्यं ॥

७ ६७ ९

पूरमिति अयंविधुश्चंद्रः पयोधेः पूरंवर्द्धयितुंएणांकमणिंचंद्रकांतंकियंतिलोकोक्त्या अपरिमितानिपयांसिदोग्धीतिशंके तथाप्रियैः पतिभिर्विप्रयोगे वियोगेसतिसशोकानांकोकांगनानांनयनेकर्मभूतेकियंतिपयांसिदोग्धीतिशंकइत्यन्वयः दुहेर्द्विकर्मकत्वादेणांकमणिमितिद्वितीया एवंनयनेइत्यत्रापि मध्यः किमित्यत्रैकस्यबद्धत्वस्यफलत्वेनकुचध्नतेरुत्प्रेक्षणमिहतुद्रावणस्त्रावणयोर्द्वयोः फलत्वेनपूरवर्धनस्यतद्दितिभेदः बृंहणंवर्द्धनं

पूरंविधुर्वर्द्धयितुंपयोधेःशंकेयमेणांकमणिंकियंति पयांसिदोग्धिप्रियविप्रयोगेसशोककोकीनयने
कियंति अत्रचंद्रेणकृतंसमुद्रस्यबृंहणंसदेवतदातेनकृतस्यचंद्रकांतद्रावणस्यकोकांगनाबाष्पस्त्रावणस्य
चफलत्वेनोत्प्रेक्ष्यतइतिसिद्धविषयाफलोत्प्रेक्षा रथस्थितानांपरिवर्तनायपुरातनानामिववाहनानां
उत्पत्तिभूमौतुरगोत्तमानांदिशिप्रतस्थेरविरुत्तरस्यां अत्रोत्तरायणस्याश्वपरिवर्तनमसदेवफलत्वेनो
त्प्रेक्ष्यतइतिअसिद्धविषयाफलोत्प्रेक्षा

तदावर्द्धनकाले तेनचंद्रेण रथस्थितानामिति रविःरथेस्थितानांनियुक्तानां पुरातननानांवाहनानांअश्वानांपरिवर्तनायेवतुरगोत्तमानांउत्पत्तिभूमावुत्तरस्यांदिशिप्रतस्थइत्यन्वयः प्रायोत्प्रेक्षमित्यत्रैक्यस्यगुणस्यफलत्वेनोत्प्रेक्षणमिहतुपरिवर्तनक्रियायाइतिभेदः ॐ ६९ ६९ ६९

कुवल० ३५

नन्वलंकारसर्वस्विकारादिभिरन्येषामपिजात्यादिभेदानामुक्तत्वात्कुतस्तेनप्रदर्शिताइत्याशंक्याह एताएवेति उक्तभेदाएवेत्यर्थः उत्प्रेक्षाइत्यनंतरंचमत्
कारविशेषप्रयोजिकाइतिशेषः तथाचजात्यादिभेदानांचमत्कारविशेषानाधायकत्वादप्रदर्शनमितिभावः इत्युत्प्रेक्षेति इत्यनेनोत्प्रेक्षाबोधक-
त्वेनेत्यर्थः त्वत्कीर्तिरिति अत्रानुपात्तस्वर्गगमनविषयास्वर्गंगाप्रवेशतादात्म्योत्प्रेक्षाविशेषणीभूतभ्रमणश्रांतत्वरूपहेतूत्प्रेक्षावाप्रतीय

एताएवोत्प्रेक्षाः मन्येशंके ध्रुवंप्रायोनूनमित्येवमादिभिः उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपिताद्दशाइत्युत्प्रेक्षाव्यंजकत्वे
नपरिगणितानांशब्दानांप्रयोगेवाच्याः तेषामप्रयोगेगम्योत्प्रेक्षायथा त्वत्कीर्तिर्भ्रमणश्रांताविवेशस्वर्गनिम्नगां
रूपकातिशयोक्तिःस्यान्निगीर्याध्यवसानतः पश्यनीलोत्पलद्वंद्वान्निःसरंतिशिताःशराः ५

नइतिबोध्यं ७ इतिश्रीमत्तत्सदुपाख्यवैद्यनाथकृतायामलंकारचंद्रिकायांश्रीमत्कुवलयानंदीयटीकायामुत्प्रेक्षाप्रकरणं ७
अतिशयोक्तिंलक्षयति रूपकातिशयोक्तिरिति ७ ७ ३१

च०

ग्रहणं उपस्थापनं विषयिरूपतयेति विषयिणो रूपमस्यतस्यभावस्तत्तातयेत्यर्थः रूपंचाभेदताद्रूप्यान्यतरत् तस्मिन्सतीति सप्तमीसमर्थात्तसिरित्यभिप्रायेण एवंचानु पात्तविषयधर्मिकाहार्यनिश्चयविषयीभूतंविषय्यभेदताद्रूप्यान्यतरत् रूपकातिशयोक्तिरितिलक्षणंबोध्यं अत्ररूपकवारणायानुपात्तेति अयमेवच रूपकादस्यां विशेषोऽतिशय इत्युच्यते भ्रांतिवारणायाहार्येति उत्प्रेक्षावारणाय निश्चयेति नीलोत्पलेति अत्रनीलोत्पलपदात्साध्यवसानलक्षणयाश्रा क्यलक्ष्योभयानुगतकांति विशेषादिपुरस्कारेणोपस्थितेकामिनीनयनेशक्त्युपस्थितस्यनीलोत्पलत्वविशिष्टस्याभेदसंसर्गेणान्वयः शक्त्युपस्थितयोः कृ

विषयस्यस्वशब्देनोल्लेखनंविनाविषयिवाचकेनैवशब्देनग्रहणं विषयनिगरणंतत्पूर्वकं विषयस्यविषयिरूपतयाध्यवसान माहार्यनिश्चयस्तस्मिन्सतिरूपकातिशयोक्तिः यथानीलोत्पलशरशब्दाभ्यांलोचनयोः कटाक्षाणां चग्रहणपूर्वकंतद्रूपता ध्यवसानं ॥

तीष्टसाधनतयोरिवशक्तिलक्षणाभ्यामुपस्थितयोरप्येकपदार्थयोस्तात्पर्यवशेनान्वयांगीकारेबाधकाभावात् एवंचनीलोत्पला भिन्नकांतिविशेषवद्दृशादितिबोधादियमभेदातिशयोक्तिरित्युच्यते नचैवंसतिरूपकादवैलक्षण्यमितिवाच्यं रूपकेविषयिभेदव्याप्यस्यविषयताव च्छेदकस्यभानेनवैलक्षण्यस्यस्फुटत्वात् यदात्वभेदभानेनतात्पर्यं किंतुभेदभानेतदाकांतिविशेषादिरूपताद्रूप्यस्यैवबोधात्ताद्रूप्यातिशयोक्तिर्वक्ष्यतेइतिबोध्यं

वापीति मध्यभागमारभ्य मुखपर्यंतं नायिकांगवर्णनमिदं गगने सूक्ष्मतया तद्वद्दुर्लक्ष्ये मध्ये कापि अनिर्वचनीयशोभा वापी तद्वद्गंभीरा नाभिः स्फुरति
शोभते तत्परं तदूर्ध्वभागे ऐंद्रनीली इंद्रनीलघटिता सूक्ष्मपद्या सरणिस्तद्वत् त्वया रोमावली स्फुरतीत्यनुषज्यते किंभूता कांचननिर्मितां सोपानपं
क्तिं तत्सदृशीं त्रिवलीमधिगतवती प्राप्तवती तथा अग्रे तदूर्ध्वदेशे शैलौ तद्वत्तुंगविशालौ कुचौ स्फुरत इति विभक्तिपरिणामेन संबध्यते कीदृशौ सुकृ

यथा वा वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्या सोपानालीमधिगतवती कांचनीमैंद्रनीली अग्रे शैलौ सुकृतिसुग
मौ चंदनछन्नदेशौ तत्रत्यानां सुलभममृतं सन्निधानात्सुधांशोः अत्र वाप्यादिशब्दैर्नाभिप्रभृतयो निगीर्णाः अत्रा
तिशयोक्तौ रूपकविशेषणं रूपके दर्शितानां विधानामिहापि संभवोस्तीत्यतिदेशेन प्रदर्शनार्थं तेनात्राप्यभेदातिशयो
क्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यं द्रष्टव्यं तत्राप्याधिक्यन्यूनताविभागश्चेति सर्वमनुसंधेयं ❀ ७

तिनां पुण्यकृतां सुगमौ सुलभगमनौ सुलभौ च पुनः कीदृशौ चंदनतरुभिश्चंदनपंकेन वा छन्नौ व्याप्तौ देशौ ययोस्तथाभूतौ तत्रत्यानां तदाश्लिष्टा
नां च सुधांशोस्तद्वदाल्हादकस्य मुखस्य सन्निधानादमृतं तद्वदास्वाद्यमधरमाधुर्यं सुलभमित्यन्वयः विधानां भेदानां इतीत्यस्य प्रदर्शनार्थ

मित्यनेनान्वयः अतिदेशेनेति सादृश्येनेत्यर्थः मुख्यरूपकाभेदस्यातिशयोक्तावभावाद्रूपकपदं रूपकसदृशपरं षण्मासमग्निहोत्रंजुहुतीत्यत्राग्निहो
त्रपदवद्धर्मातिदेशकमित्याशयः आधिक्यन्यूनतेत्यत्रानुभयोक्तेरुक्तोदाहरणेषुप्रसिद्धतरत्वादनुपादानं बोध्यं यत्त्वत्रकैश्चिदुक्तं विषयिवाचक
पदस्यविषयेसाध्यवसानलक्षणायाः शक्यतावच्छेदकमात्रप्रकारकलक्ष्यविशेष्यकबोधत्वंकार्यतावच्छेदकं एवंचनिगरणेसर्वत्रविषयतावच्छे
दकधर्मरूपेणैवविषयस्यभानं नविषय्यभिन्नत्वेनेतिस्थितेऽभेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरितिद्वैविध्यमयुक्तमिति तत्प्रौढिविलसितं
शक्यतावच्छेदकस्यलक्ष्येपूर्वमप्रतीतत्वेनतद्विशिष्टतयालक्षणायाअसंभवात् यद्धर्मविशिष्टेशक्यसंबंधग्रहस्तद्धर्मप्रकारकलक्ष्योपस्थि
तेः समानप्रकारकशाब्दबोधेहेतुत्वात् लक्षणापरिहार्यायाअनुपपत्तेस्तदवस्थत्वाच्च एवमपितात्पर्यवशात्तादृशबोधांगीकारेतद्वशादेव
शक्याभेदप्रकारकबोधेपिबाधकाभावान्मात्रपदेनविषयतावच्छेदकस्यैवव्यावर्तनादितिदिक् ॥ छ छ

सुधाबद्धेति विद्धशालभंजिकाख्यायां नाटिकायां स्फटिकप्राकारशिखरगतां मृगांकावलीमालोकयतो राज्ञो विदूषकं प्रत्युक्तिरियं प्राकाराग्रसमीपेनय नेप्रहिणुप्रेरय मनाकद्र्ष्त्तर्कय अनाकाशेअनंतरिक्षेकोयंशीतकिरणश्चंद्र इति मुखेचंद्रगताल्हादकारित्वरूपताद्रूप्याध्यवसानं कीदृशः गलित-श्चुतोहरिणोयस्मात्तथाभूतः तेननिःकलंकत्वयोत्कर्षाभिव्यक्तिः पुनःकीदृक् सुधायांबद्धःग्रासस्तदभिलाषोयैस्तैरुपवनसंबंधिभिश्चकोरैरनुसृतांल

यथा वा सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां किरन्ज्योत्स्नामच्छांलवलिफलपाकप्रणयिनीं उप
प्राकाराग्रं प्रहिणुनयनेतर्कयमनागनाकाशेकोयंगलितहरिणःशीतकिरणइत्यत्रकोयमि
त्युक्त्याप्रसिद्धचंद्राद्भेदस्ततउत्कर्षश्चगर्भितः

वल्याःफलपाकस्यप्रणयिनींसदृशीं अच्छांस्वच्छांज्योत्स्नांतत्वेनाध्यवसि
तांकांतिंप्रभांकिरन्प्रसारयन्नित्यर्थः लवलीलताविशेषोहरफारेवडीतिभाषाप्रसिद्धः प्राकारोवरणःशालइत्यमरः समाबद्धग्रासैरितिक्वचित्पाठस्त
त्राप्युक्तएवार्थः नवलवलीतिपाठेनवश्चासौलवलिपाकश्चेत्यन्वयोबोध्यः नन्विहाभेदविवक्षैवकिंनस्यादतआह अत्रेति कोयमित्यनेनानिर्ज्ञातत्व
प्रकाशनात्प्रसिद्धस्यनिर्ज्ञातत्वात्तद्वैलक्षण्यावगतिरितिभावः गर्भितः गलितेत्यादिविशेषणव्यंग्यत्वेनाभिप्रेतः ६९ ६९

अन्यत्रापीति अनुच्छिष्टो देवैरपरिदलितो राहुदशनैः कलंकेनाश्लिष्टो नखलु परिभूतो दिनकृता कुहूभिर्नोलुप्तो नच युवतिवक्त्रेण विजितः कलानाथः कोयं कनकलतिकायामुदयत इत्यादावित्यर्थः अथवान्यत्रापिन्यूनतायामपीत्यर्थः कोयंभूमिगतश्चंद्र इत्यादावदिव्यत्वरूपन्यूनताप्रकाशनमूहनीयमितिभावः ननूक्तोदाहरणेष्वयमितिविषयस्योपादानात्कथमतिशयोक्तिरितिचेत् अत्राहुः इदंत्वस्य विषयिनिशेषणत्वेनविवक्षायामतिशयोक्तिरेव यदातुविष

एवमन्यत्राप्यूहनीयं यद्यपह्नुतिगर्भत्वंसैवसापह्नवा मता त्वत्सूक्तिषु सुधा राजन्भ्रांताः पश्यं तितांविधौ अत्रत्वत्सूक्तिमाधुर्यमेवामृतमित्यतिशयोक्तिः चंद्रमंडलस्थममृतंनभवतीत्यपह्नुतिगर्भा यथावा

यविशेषणत्वविवक्षातदारूपकमितिव्यवस्था अतएवप्रकाशकृतादशमेरूपकातिशयोक्त्यादिसंदेहसंकरेनयनानंददायींदोर्बिंबमेतत्प्रसीदती तुदाहृतमिति एनांविभजते यद्यपह्नुतीति अपह्नुतिगर्भत्वंपर्यस्तापह्नुतिगर्भत्वं सैव रूपकातिशयोक्तिरेव तथाचसापह्नवत्वनिरपह्नवत्वभेदेनद्विविधातिशयोक्तिरितिभावः ॐ

मुक्तेति तान्यनुभवैकवेद्यानिइमानि वस्तूनि ते इमे जनाः विकल्पयंति सदसद्वेति विकल्पविषयाणि कुर्वंति येषां जनानां साप्रकांता सुंदरी दृक्पथे लोचनमार्गे नासीदित्यन्वयः तादृशसुंदरीदर्शनशालिनस्तु विकल्पयंतीतिभावः तानि कानि वस्तूनि तत्राह मुक्ता मौक्तिकं विद्रुमं प्रवालं चांतरा अनयोर्मध्ये मधुरसः अंतरांतरेणयुक्ते इति द्वितीया पुष्पं परं केवलं धूर्वहं भारवाहकं न तु मधुरसयुक्तं तयोर्मुक्ताविद्रुमयोः खलु निश्चितं प्रालेयद्युतिमंडले चंद्रमंडले

मुक्ताविद्रुममंतरामधुरसः पुष्पं परं धूर्वहं प्रालेयद्युतिमंडले खलु तयोरेकासिका नार्णवे तच्चोदंचति शंखमूर्ध्नि न पुनः पूर्वाचलाभ्यंतरे तानीमानि विकल्पयंति तइमे येषां न सा दृक्पथे अत्राधररस एव मधुरस इत्याद्यतिशयोक्तिः पुष्परसो मधुरसो न भवतीत्यपह्नुतिगर्भा अलंकारसर्वस्वकृता स्वरूपोत्प्रेक्षायां सापह्नवत्वमुदाहृतं ७ ७.

एकासिका एकस्मिन्नासिका अवस्थितिः ऐकाधिकरण्यमित्यर्थः न खर्णवे समुद्रे तच्च चंद्रमंडलं च शंखस्य मूर्ध्नि मस्तके उदंचति उदयं प्राप्नोति न पुनः पूर्वाचलस्योदयगिरेरभ्यंतरे उदंचति अत्र मुक्ताविद्रुममधुरसप्रालेयद्युतिमंडलशंखशब्दैः क्रमेण दंताधरतन्माधुर्यमुखकंठानि गीर्णाः पूर्वोदाहरणे भ्रांतत्वोक्त्यास्पष्टोपह्नवः इह तु परं धूर्वहमित्युक्त्या गूढ इति भेदः प्रालेयं मिहिका चेत्यमरः ७ ❀ ७.

गतास्विति पुरेभवाः पौर्यस्तासु विलासिनीषु तिमीनां मत्स्यानां संघट्टनेन ससंभ्रमं सभयं तीरं प्रति गतासु सतीषु यत्र नगर्यां शिप्रा नदी उल्लसंतीनां फेननततीनां छलेन मुक्तः कृतः अट्टहासः उद्धतहास्यं यथा तथाभूतेव विभातीत्यन्वयः इतीति इत्यत्रेत्यर्थः इंदुमंडलादावित्यादिपदात् पुष्परसादिपरिग्रहः सूक्त्यादिष्विति सूक्तिमाधुर्यादिष्वित्यर्थः आदिना अधरमाधुर्यपरिग्रहः निवेशनात् अभेदाध्यवसानात् जाने इति दमयंतीवर्ण

गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु यत्रोल्लसत्फेनततिछलेन मुक्ताट्टहासेव विभाति शिप्रा ततस्त्रियानत्र भेदः एतत्तु शुद्धापह्नुतिगर्भ यत्र फेनततित्वमपह्नुत्य तत्रैवाट्टहासत्वोत्प्रेक्षणादिह तु पर्यस्तापह्नुतिगर्भत्वमिंदुमंडलादावपह्नुतस्यामृतादेः सूक्त्यादिषु निवेशनात् इदं च पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभवति तत्र स्वरूपोत्प्रेक्षायां यथा जानेतिरागादिदमेव बिंबं बिंबस्य च व्यक्तमितोऽधरत्वं द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोभूदनयोर्जनानां अत्र प्रसिद्धफले बिंबतामपह्नुत्यातिरागेण निमित्तेन दमयंत्यधरे तदुत्प्रेक्षा पर्यस्तापह्नुतिगर्भा हेतूत्प्रेक्षायां तद्गर्भत्वं प्राक् लिखिते हेतूत्प्रेक्षोदाहरणे एव द्रष्टव्यं तत्र चांधकारे ष्वांध्यहेतुत्वमपह्नुत्यान्यत्र तन्निवेशितं फलोत्प्रेक्षायां यथा

यतो नलस्योक्तिः अतिशयिता द्राग

लोहित्यादिदमधरस्वरूपमेव बिंबमिति जाने न तु बिंबफलमित्येवकारार्थः बिंबस्य बिंबफलस्यातोस्मादोष्ठादधरत्वं निकृष्टत्वं व्यक्तं स्फुटं कथं तर्हि विपरीतालोके प्रसिद्धिस्तत्राह द्वयोरनयोर्विशेषस्य तारतम्यस्यावगमे बोधेऽक्षमाणामसमर्थानां जनानां नाम्नि भ्रमो विपर्यासः अभूदिति अन्यत्रेति सूर्यकर्तृकेनेत्रापरपर्याय गोनयने इत्यर्थः निवेशितं उत्प्रेक्षितं ॥

३९

रवीति रविणा संतप्तो गजः तस्य रवेर्गृत्या नु पश्चात्त्वं धूनितियावत् ध्रुवं प्रायो बाधितुं सरः प्रविशति न तु स्नातुं स्नानार्थं हि यस्माद्गजस्य स्नानं निष्फलं निःप्रयोजनमित्यन्वयः प्रसक्तानुप्रसक्त्येति अतिशयोक्तेः सापह्नवत्वकथनप्रसंगादलंकारसर्वस्वकृदुक्तस्वरूपोत्प्रेक्षायां शुद्धापह्नुतिगर्भत्वं दर्शितं तदनुप्रसक्त्या च त्रिविधास्वप्युत्प्रेक्षासु पर्यस्तापह्नुतिगर्भत्वमित्यर्थः भेदकेति तस्यैव तज्जातीयस्यैव अन्यत्ववर्णनं तज्जातीयभिन्नत्वेन वर्णनं तच्चाहार्यं बो

> रवितप्तो गजः पद्मान्तकृत्यान्बाधितुं ध्रुवं सरो विशति न स्नातुं गजस्नानं हि निष्फलं अत्र गजस्य सरःप्रवेशं प्रतिफले स्नाने फलत्वमपह्नुत्य पद्मबाधने तन्निवेशितं अलमनया प्रसक्तानुप्रसक्त्या प्रकृतमनुसरामः भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनं अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः अत्र लोकप्रसिद्धगांभीर्याद्यभेदेऽपि भेदो वर्णितः यथा वा अन्येयं रूपसंपत्तिरन्या वैदग्ध्यधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः

ध्यं एवमग्रेऽपि तेन भ्रांतो नातिव्याप्तिः इदं च लोकोत्तरत्वप्रतिपत्त्यर्थं अन्यदेवेति अस्य महीपतेर्गांभीर्यं अन्यदेव प्रसिद्धगांभीर्यभिन्नमेवेत्यर्थः अन्येयमिति रूपं सौंदर्यं वैदग्ध्यं चातुर्यं धोरणी परिपाटी एषा नलिनपत्राक्षी विधेः साधारणी सृष्टिः नैवेत्यन्वयः अत्रोत्तरार्धे नञ्भंग्याऽन्यत्ववर्णनं

विशेषः

संबंधेति अयोगेअसंबंधेयोगकल्पनं संबंधवर्णनं संबंधश्चाभेदभिन्नत्वेसत्यन्यत्वाद्यनिरूपिताद्यात्मः तेनरूपकातिशयोक्त्यादिप्रभेदेपुनातिव्याप्तिः सौधेति सौधोस्त्रीराजसदनमित्यमरः नन्वत्रैवस्पृशंतीवेंदुमंडलमितीवपदप्रयोगेउत्प्रेक्षाप्रतीतेस्तद्प्रयोगेगम्योत्प्रेक्षात्वमुचितं इवादिसत्वेयावाच्योत्प्रेक्षासैवेवाद्यभावेगम्योत्प्रेक्षेतिनियमाद् अन्यथात्वत्कीर्तिर्भ्रमणश्रांतेत्यादिपूर्वोदाहृतेपद्येपिगम्योत्प्रेक्षानस्याद्विशेषाभावादितिचेन्नैवं उपदर्शितनियमस्यालंकारांतराविषयएवाभ्युपगमात् अन्यथानूनंमुखंचंद्रइत्यादौनूनमित्यप्रयोगेगम्योत्प्रेक्षापत्तेः एवंचप्रकृतेसंबंधसंबंध

संबंधातिशयोक्तिःस्यादयोगेयोगकल्पनं सौधाग्राणिपुरस्यास्यस्पृशंतिविधुमंडलं यथावा कतिपयदिवसैःक्षयंप्रयायात्कनकगिरिःकृतवासरावसानः इतिमुदमुपयातिचक्रवाकीवितरणशालिनिवीररुद्रदेवे अत्रचक्रवाक्याःसूर्यास्तमयकारकमहामेरुक्षयसंभावनाप्रयुक्तसंतोषासंबंधेपितत्संबंधोवर्णितः

वर्णनरूपातिशयोक्त्यलंकारविषयेनगम्योत्प्रेक्षावसरः त्वत्कीर्तिरित्युदाहरणेतुभ्रमणश्रांतत्वरूपहेत्वंशेगम्योत्प्रेक्षाभिप्रेतानतुस्वर्गगाप्रवेशांश इतिसर्वमवदातं असंदिग्धमुदाहरणांतरमाह यथावेति कतिपयेति वीररुद्रदेवाख्येनृपेवितरणशालिनिदानशालिनिसतिचक्रवाकी इतिमुदंसंतोषमुपयातिप्राप्नोति इतिकिं कृतंवासरस्यावसानंनाशोयेनसःकनकगिरिःसुमेरुःकतिपयैरल्पैर्दिवसैःक्षयंप्रयायादिति संभावनायांलिङ् ७ ७

योगेपीति योगेसत्यप्ययोगवर्णनमित्यर्थः स्वर्गस्थाद्रुमाः कल्पवृक्षादयः स्वर्द्रुमेष्विति विषयसप्तमी स्वर्द्रुमविषयेयआदरस्तस्यसंबंधेपिअर्थादर्थिषु यद्वा अर्थिषुस्वर्द्रुमविषयादरसंबंधाभावप्रतीतौ तत्समानवित्तिवेद्यतयास्वर्द्रुमेष्वप्यादरविषयत्वाभावावगमाद्यथाश्रुतमेवसाधु अनयोरिति अनवद्यानिनिर्दुष्टान्यंगानियस्यास्तथाभूतेइतिसंबोधनम् जृंभमाणयोर्वर्द्धमानयोस्तयोस्तनयोस्तवबाहुलतयोरंतरेमध्येपर्याप्तःअवकाशोनास्तीत्यन्वयः

योगेप्ययोगोऽसंबंधातिशयोक्तिरितीर्यते त्वयिदातरिराजेंद्रस्वर्द्रुमान्नाद्रियामहे अत्रस्वर्द्रुमेष्वादरसंबंधेपितद
संबंधोवर्णितइतिअसंबंधातिशयोक्तिः यथावा अनयोरनवद्यांगिस्तनयोर्जृंभमाणयोः अवकाशोनपर्याप्तस्तवबा
हुलतांतरे अक्रमातिशयोक्तिःस्यात्सहत्वेहेतुकार्ययोः आलिंगंतिसमंदेवज्यांशराश्चपराश्चते अत्रमौर्व्यांयदाशर
संधानंतदानीमेवशत्रवःक्षितौपतंतीतिहेतुकार्ययोःसहत्वंवर्णितं

अत्रबाहुलतयोरंतरेस्तनपर्याप्तावकाशसंबंधेपितदसं
बंधउक्तः अक्रमेति क्रमःपौर्वापर्यंतदभावोऽक्रमस्तद्रूपस्यातिशयस्योक्तिरित्यर्थः सहत्वेसमकालत्वे आलिंगंतिसमंयुगपत्ज्यांमौर्वींपृथ्वींच
पराःशत्रवः॥ ५ ६ ७

मुंचतीति हंमीरसंज्ञकस्य वीरस्य खड्गे कोशं पिधानं मुंचति सति अरीणां वर्गः समूहोपि कोशं भांडारं मुंचति तथा खड्गे प्रकंपमुल्लासनं भजति स
ति सः प्रकृष्टं कंपं भजति एवं खड्गे क्ष्मां क्षांतिं त्यजति सति सोपि क्ष्मां पृथ्वीं त्यजतीत्यर्थः कोशोस्त्री कुड्मले खड्गे पिधानेऽर्थौघदिव्ययो रित्यमरः अत्र श
ब्दप्रत्ययभंग्या यौगपद्यवर्णनं विशेषः धनगृहेति धनसंबंधिगृहेत्यर्थः चपलेति हेतोः प्रसक्तिज्ञानं तज्जन्ये कार्ये सतीत्यर्थः यास्यामीति उदि
ते उक्ते प्रियेणेति शेषः तन्व्याऊर्मिका अंगुलीयकं वलयः कंकणमभवदित्यर्थः ऊर्मिकात्वंगुलीये स्याद्वस्त्रभंगतरंगयोरिति विश्वः कार्यमुखेने

यथा वा मुंचति मुंचति कोशं भजति च भजति प्रकंपमरिवर्गः हंमीरवीरखड्गे त्यजति त्यजति क्ष्मामाशु अत्र खड्गस्य कोशत्यागादि

काल एव रिपूणां धनगृहत्यागादि वर्णितः चपलातिशयोक्तिस्तु कार्ये हेतु प्रसक्तिजे यास्यामीत्युदिते तन्व्या वलयो भवदूर्मिका

अत्र नायकप्रवासप्रसक्तिमात्रेण योषितोति कार्श्यं कार्यमुखेन दर्शितं यथा वा आदातुं सकृदीक्षितेपि कुसुमे हस्ताग्रमालोहि

तं लाक्षारंजनवार्तयापि सहसा रक्तं तलं पादयोः अंगानामनुलेपनस्मरणमप्यत्यंतखेदावहं हंताधीरदृशः किमन्यदलकामोदोपि भारायते
ति अंगुलीयकस्य कंकणपदप्राप्तिरूपकार्यवर्णनद्वारेणेत्यर्थः आदातुमिति सहजसौकुमार्यवत्याः विरहदशायां तदतिशयवर्णनमिदं हंतेति खेदे
आदातुं गृहीतुं सकृदेकवारमपि कुसुमे ईक्षिते सति अधीरदृशः हस्ताग्रमालोहितं भवतीति शेषः अपि नाकिमु गृहीते इति गम्यते लाक्षयायत्रंज
नं तद्वार्त्तयापि सहसा अकस्मात् पादयोस्तलं रक्तं भवति किमु रंजनेनेति पूर्ववत् एवमंगानां चंदनादिना यदनुलेपनं तत्स्मरणमपि अत्यंतखेदकरं किमु

तानुलेपनं किमन्यद्वाच्यमिति शेषः अलकानामगरुधूपाद्यामोदोपि भारायते भार इवाचरतीत्यर्थः कर्तरि क्यङ् अत्रादानादिरूपहेतुप्रसक्ति-
मात्रेण हस्तायल्लोहित्यादिरूपकार्योत्पत्तेः साक्षादेव वर्णनं न तु कार्यमुखेनेति पूर्वस्माद्भेदः हेतुकार्ययोरिव हेतुप्रसक्तिकार्ययोरपि समका-
लत्वं संभवतीति सूचयितुं उदाहरणांतरमाह यामीति धवे दयिते यामि नयामीति वदति सति तत्क्षणेन तत्कालमेव तन्वंग्याः पुरोवलयानि अग्र

यामि न यामीति धवे वदति पुरस्तात्क्षणेन तन्वंग्याः गलितानि पुरोवलयान्यपराणि तथैव दलितानि अ
त्यंतातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे अग्रे मानो गतः पश्चादनुनीता प्रियेण सा यथा वा कवींद्राणामासन्प्र
थमतरमेवांगणभुवश्चलद्भृंगासंगाकुलकरिमदामोदमधुराः अमी पश्चात्तेषामुपरि पतितारुद्रनृपतेः क
टाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः एतास्तिस्रोप्यतिशयोक्तयः कार्यशैघ्र्यप्रत्यायनार्थाः ७ ७

मकंकणानि पुरः प्रथमं गलितानि अपराण्यपि तथैव तत्कालमेव दलितानि भग्नानीत्यन्वयः पुरोऽग्रे प्रथमे चस्यादिति विश्वः अत्र वदति गलितानीति श
तृप्रत्ययेन समकालतावगतिः अत्यंतेति अत्र हेतुकार्ययोरित्यनुवर्तते तत्पौर्वापर्यं तिक्रमित्याद्यः साधुरेव व्यतिक्रमोऽत्र वैपरीत्यं अग्रे प्रथमं अ

नुनीतासमाहिता कवींद्राणामिति कविश्रेष्ठानामंगणसंबंधिन्यो भूमयः प्रथमतरमेव प्रथममेव चलतांचपलानां भृंगाणां भ्रमराणामासंगेनाकु
लानां करिणां मदजलस्यामोदेन परिमलेन मधुरा रमणीया आसन् अभवन् पश्चादनंतरं तेषां कवीनामुपरि रुद्रसंज्ञकस्य नृपतेः अमी दृश्यमानाः
कटाक्षाः पतिताः कीदृशाः क्षीरमुदकं यस्य तथाभूतस्य क्षीरार्णवस्य प्रसरंतीनामुरुवीचीनां बृहत्तरंगाणां सहचरास्तत्सदृशा इत्यर्थः उदकस्यो
दः संज्ञायामित्युदादेशः अत्र यथोक्तकटाक्षरूपकार्यमुखेन नृपतिप्रसादरूपहेतुकथनं पूर्वस्माद्विशेषः एताः अव्यवहितोक्ताः अथोक्ते
षु प्रभेदेषु अनुगतप्रवृत्तिनिमित्ताभावात्कथमतिशयोक्तिपदप्रयोग इति चेत् अत्राहुः तावत्प्रभेदान्यतमत्वमेव सर्वानुगतमतिशयोक्तिपदप्रवृ
त्तिनिमित्तं तदेव च सामान्यलक्षणमिति नव्यास्तु निगीर्याध्यवसानमेवातिशयोक्तिः प्रभेदांतरं त्वनुगतरूपाभावादलंकारांतरमेव न चान्यत्वादिप्र
भेदेषु अन्यत्वादिभिरभेदादीनां निगरणं संभवतीति वाच्यं अन्यत्वादिभिरभिन्नवस्तुप्रतीतेरेव चमत्कारित्वेनानुभवसिद्धतयान्यत्वादिभिरभेदप्रती
त्यंगीकारेऽनुभवासंगतेः अन्यतमत्वं तु नालंकारविभाजकोपाधितां भजते चमत्काराप्रयोजकत्वादिति वदंति वस्तुतस्तु रूपकभिन्नत्वे सति चम
त्कृतिजनकाहार्यारोपनिश्चयविषयत्वमेवातिशयोक्तिसामान्यलक्षणं रूपकवारणाय सत्यंतं भ्रांतिवारणायाहार्येति उत्प्रेक्षानिरासाय निश्चये
ति रूपकातिशयोक्तावभेदस्य द्वितीयप्रभेदेऽन्यत्वस्य तृतीये संबंधस्य चतुर्थे असंबंधस्य पंचमे सहत्वस्य षष्ठे हेतुप्रसक्तिजन्यत्वस्य सप्तमे पूर्वापरत्वयोश्च
तथाविधारोपविषयत्वसत्त्वात्सर्वत्र लक्षणसमन्वयः नन्वेवंविधारोपस्य रूपकस्वभावोक्तिभिन्नेषु प्रायशः सर्वालंकारेषु सत्त्वादतिप्रसंग इति वाच्यं इष्टाप

(५२)

नेः अलंकारांतराणां चमत्कारे प्रधानतया तदंगत्वेनावस्थितायाः अतिशयोक्तेरप्राधान्येन व्यपदेशानर्हत्वात् प्राधान्येन व्यपदेशा भवंतीति न्यायात् अलं
कारांतराणामेव प्रधानत्वेन व्यपदेशार्हत्वात् अत एव काव्यप्रकाशकृता विशेषालंकारप्रसंगेऽभिहितं सर्वत्रैवंविधे विषयेऽतिशयोक्तिरेव प्राणत्वेनावति
ष्ठते तां विना प्रायेणालंकारत्वाभावात् अत एवोक्तं सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते यत्नोऽस्यां कविभिः कार्यः कोऽलंकारोऽनया विनेति इंडि
नाप्युक्तं अलंकारांतराणामप्येकमाहुः परायणं वागीशमहितामुक्तिमिमामतिशयाह्वयामिति इति श्रीमत्तत्सदुपाख्य वैद्यनाथकृतायामलं
कारचंद्रिकायां श्रीमद्रंगराजाध्वरींद्रसूनुश्रीमदप्पदीक्षितकृतकुवलयानंदटीकायामतिशयोक्तिप्रकरणं संपूर्णं ❀ तुल्ययोगितां लक्षयति

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता संकुचंति सरोजानि स्वैरिणीवदनानि च

वर्ण्यानामिति वर्ण्यत्वेन प्रस्तुतानामित्यर्थः इतरेषां अप्रस्तुतानां एतच्चोभयमपि सावधारणं वर्ण्यानामेव इतरेषामेव वेत्यर्थः बहुवचन
मनेकार्थकं द्वयोर्धर्मैक्यस्यापि संग्राह्यत्वात् धर्मैक्यं धर्मस्यैक्यं एकत्वं एको धर्म इति यावत् स च चमत्कारकारी बोध्यः एवं चानेकप्रस्तुतमा
त्रसंबद्धैकचमत्कारिधर्मानेकाप्रस्तुतमात्रसंबद्धैकधर्मान्यतरत्वं लक्षणं बोध्यं मुखं विकसितस्मितमित्यादावतिप्रसंगवारणायानेकेति अत्र
च मुखप्रेक्षितादिरूपानेकवर्ण्यसंबंधी नैको धर्म इति तन्निरासः दीपकवारणाय मात्रेति प्रस्तुताप्रस्तुतप्रभेदसाधारण्यायान्यतरत्वनिवेशः ७

त्वदंगेति प्रियांप्रतिदयितोक्तिः तवांगस्यमार्दवेसौकुमार्येदृष्टेसतिकस्यचित्तेमालत्यादीनांकठोरतानभासते अपितुसर्वस्यैवेत्यर्थः शशांबिभर्तीतिशश
भृच्चंद्रस्तस्यलेखाकला गुणक्रियारूपेति एतच्चतथाविधधर्मस्यप्रायशोगुणक्रियारूपत्वमित्यभिप्रेत्योक्तं नतुलक्षणेतेनरूपेणधर्मस्यनिवेशः गौर

त्वदंगमार्दवेदृष्टेकस्यचित्तेनभासते मालतीशशभृल्लेखाकदलीनांकठोरता प्रस्तुतानामप्रस्तुतानांवागुणक्रियारूपै
कधर्मान्वयस्तुल्ययोगिता संकुचंतीतिप्रस्तुततुल्ययोगितायाउदाहरणं तत्रप्रस्तुतचंद्रोदयकार्यतयावर्णनीयानांस
रोजानांप्रकाशभीरुस्वैरिणीवदनानांचसंकोचरूपैकक्रियान्वयोदर्शितः उत्तरश्लोकेनायिकासौकुमार्यवर्णनेप्रस्तुतेः
प्रस्तुतानांमालत्यादीनांकठोरतारूपैकगुणान्वयः यथावा संजातपत्रप्रकरान्वितानिसमुद्वहंतिस्फुटपाटलत्वं
विकस्वराण्यर्ककराभिमर्शाद्दिनानिपद्मानिचवृद्धिमीयुः ६

वात्प्रयोजनाभावाच्च यत्तुकैश्चिदेतद्ग्रंथदूषणलालसैर्धर्मस्यगुण
क्रियारूपत्वेनलक्षणेनिवेशइत्याशयमारोप्याभिहितं तदेतदापाततः शासतित्वयिहेराजन्नखंडावनिमंडलं नमनागपिनिश्चिंतेमंडलेशत्रुमि
त्रयोरित्यत्राभावरूपधर्मस्यैवान्वयादिति तदिदमापाततोपिनमनोरमं तथाहिशासतीतित्वदुदाहृतपद्येनिश्चिंतेनेति निश्चिंतभेदः शत्रुमित्र

कुवल० ४२

मंडलधर्मतयोपात्तः सत्वगुणस्वरूपएव चिंताभावबद्धैदस्यचिंतानतिरिक्तत्वात् अन्यथाचिंताभावाभावस्याप्यतिरिक्तत्वापत्तेः अथतत्रापिवैपरी त्यादिष्टापत्तिमालंबसेभवत्सेवंतुष्यतुभवान् एवमप्यभावस्यकथंगुणबहिर्भावः जातिक्रियाद्रव्यातिरिक्तस्यैवचतुष्टयीशब्दानांप्रवृत्तिरितिवदद्भिर्वै याकरणैस्तदनुसारिभिश्चालंकारिकैर्गुणत्वांगीकारात् अतएवजातिगुणयोर्विरोधेप्रकाशकृद्भिरुदाहृतं गिरयोप्यनुन्नतियुजइति तथाविद्यानाथे नापि अभवः सार्वभौमोपीति वस्तुतस्तुलक्षणेनतेनरूपेणधर्मस्यनिर्देशोभिमतइत्यावेदितमतोनकाप्यनुपपत्तिरिति स्वैरिणी स्वेनईरितुंशीलम स्याःसाद्दशीव्यभिचारिणीतियावत् स्वादीरेरिणोरितिवृद्धिः स्वैरिणीपांसुलाचस्यादित्यमरः संजातेति दिनानिपद्मानिचवृद्धिमीयुःप्रापुः कीदृशानि संजातैःपत्त्राणांप्रकरैःसमूहैरन्वितानि पूर्वपत्राणांवसंतेनविगलनात् तथास्फुटाविकासिताः पाटलावृक्षविशेषायेषुतानितेषांभावस्तत्वं समु द्वहंतीतिशाश्वतं दधानानीत्यर्थः पद्मपक्षेतु स्फुटानिविकसितानिचतानिपाटलानिपाटलवर्णानितेषांभावस्तत्त्वमित्यादिपूर्ववत् एवमर्कस्यकरैःकिरणैरभि मर्दनाद्धिकस्वराणिभासुराणिदिनानि पद्मानितुविकासशालीनि ॥

७ ८

यं० १ ४३

नागेंद्रेति नागेंद्राणांगजश्रेष्ठानां हस्ताः शुंडाः कदलीविशेषाश्च परिणाहोविशालतातच्छालिरूपंस्वरूपंलब्ध्वापियथाक्रमंत्वग्विकर्कशत्वात्कगेरत्वादेकांते ननियमेनशैत्याच्चहेतोर्लोके तस्याः पार्वत्याः ऊर्वोः उपमानाह्याःत्याः उपमानत्वरहिताजाताइत्यन्वयः तदीयत्वेनेति तत्कालिकत्वेनेत्यर्थः ग्रीष्मकालिकवस्तु वर्णनस्यैवग्रीष्मवर्णनरूपत्वादितिभावः एकक्रियेति वृद्धिप्राप्तिरूपैकक्रियान्वयइत्यर्थः एकगुणेति उपमानबाह्यत्वरूपैकगुणेत्यर्थः हिताहि

नागेंद्रहस्तास्त्वचिकर्कशत्वादेकांतशैत्यात्कदलीविशेषाः लब्ध्वापिलोकेपरिणाहिरूपंजातास्तदूर्वोरुपमान
बाह्याः अत्रग्रीष्मवर्णनेतदीयत्वेन प्रस्तुतानांदिनानांप्रमानांचैकक्रियान्वयः ऊरुवर्णनेअप्रस्तुतानांकरिकराणां
कदलीविशेषाणांचैकगुणान्वयः हिताहितेवृत्तितौल्यमपरातुल्ययोगिता प्रदीयतेपराभूतिर्मित्रशात्रवयोस्त्वया।

तेइति हिताहितविषयेइत्यर्थः वृत्तितौल्यमिति वृत्तिर्वर्तनंव्यवहरणमितियावत्तस्यतौल्यंसाम्यं अपरापूर्वोक्तविलक्षणा प्रदीयतइति परा उत्कृष्टाभूतिः संपत्तिरेव परःभूतिः पराभवः शत्रूणांसमूहःशात्रवं तस्यसमूहइत्यण् ॐ ६२ ६२

पराभवदानस्येति त्वाब्रुसंबंधिपराभवसंपादनस्येत्यर्थः पराभवस्यमुख्यदानासंभवात् अतएवसंप्रदानत्वासंभवान्मित्रशात्रवयोरितिसंबंधसा
मान्येषष्ठी श्लेषेण पराभूतिपदश्लेषेण यथावेति अत्रचशब्दाअप्यर्थाविरोधद्योतकाः अत्रेति योपिनिंबंपरशुनाछिनत्तियोप्येनंमधुयुक्तेनस
र्पिषाआज्येनसिंचतियोप्येनंगंधमाल्याद्यैरर्चतिइतिक्रमेणेत्यर्थः उक्तप्रकारस्यतुल्ययोगितापदवाच्यत्वेदृष्टसंमतिंदर्शयति इयमिति

अत्रहिताहितयोर्मित्रशात्रवयोरुत्कृष्टभूतिदानस्यपराभवदानस्यचश्लेषेणाभेदाध्यवसायाद्वृत्तितौल्यं यथावा यश्च
निंबंपरशुनायश्चैनंमधुसर्पिषा यश्चैनंगंधमाल्याद्यैःसर्वस्यकटुरेवसः अत्रछश्चतिसिंचत्यर्चतिइत्यध्याहारेणवा
क्यानिपूरणीयानि पूर्वोदाहरणंस्तुतिपर्यवसायि इदंतुनिंदापर्यवसायीतिभेदः इयंसरस्वतीकंठाभरणोक्तातुल्ययोगिता

तथाचवृद्धव्यवहारान्नानार्थस्तुल्ययोगिताशब्दइतिभावः अत्रकेचिदाहुः नेयंतुल्ययोगितापूर्वोक्ततुल्ययोगितानोभेदमर्हति वर्ण्यानामितरेषां
वेत्यादिपूर्वोक्तलक्षणाक्रांतत्वात् एकानुपूर्वीबोधितवस्तुकर्मकदानमात्रत्वस्यपरंपरयाताद्दशशब्दस्यवाधर्मस्यैक्यात् यश्चनिंबमित्यत्रापिकटु
त्वविशिष्टनिंबस्यैवपरंपरयाछेदकसेचकपूजकधर्मत्वसंभवादिति तदेतदपेशलं तथाहि यत्रानेकान्वयित्वेनज्ञातोधर्मस्तेषामौपम्यगमकत्वेन

चमत्कृतिजनकस्तत्रपूर्वोक्तिप्रकारः यत्रतु हिताहितोभयविषयकशुभाशुभरूपैकव्यवहारस्यव्यवहर्तृगतस्तुतिनिंदान्यतरद्योतकतयाचमत्कृतिजनकत्वंतत्रापरइतिभेदात् नत्वत्रपराभूतिशब्दस्यतदर्थकर्मदानस्यवा परंपरयाशत्रुमित्रगतत्वेनभानमपितुश्लेषबलादेकत्वेनाध्यवसितस्यतादृशदानस्यराजगतत्वेनैवेतिकथंपूर्वोक्तलक्षणाक्रांतत्वं एतेनयश्चनिंबमित्यत्रकटुत्वविशिष्टनिंबस्यैवपरंपरयाछेदकसेचकपूजकधर्मत्वमितिनिरस्तं वस्तुगत्यातद्धर्मत्वस्यालंकारतासंपादकत्वाभावात् अन्यथासंकुचंतिसरोजानीत्येतावतैवतुल्ययोगितालंकारापत्तेः किंत्वनेकगतत्वेनज्ञायमानधर्मत्वस्यैवतुल्ययोगिताप्रयोजकत्वमितितदभावेतदंतर्गतिकथनमसमंजसमेव अथाप्युक्तोदाहरणयोस्तथाभानमस्तीत्याग्रहस्तथापिनपूर्वोक्तलक्षणस्यात्रसंभवः धर्मोर्थइवपूर्णश्रीस्त्वयिराजन्विराजतइतिप्रकृतयोरुपमायामतिव्याप्तिवारणार्थमनेकानुगतधर्मत्वपर्याप्तविषयितासंबंधावच्छिन्नावच्छेदकताकचमत्कृतिजनकताश्रयज्ञानविषयधर्मत्वमितिविवक्षायास्तत्रावश्यकत्वात्प्रकृतेचहितत्वाहितत्वादेर्विषयस्याधिकस्यानुप्रवेशादितिविभावनीयं

गुणोत्कृष्टैरिति गुणैरुत्कृष्टाः श्रेष्ठास्तैरित्यर्थः समीकृत्य साम्यं विवक्षित्वा वचइति वचनंवचः प्रतिपादनमितियावत् अर्थात्तत्साधारणधर्मस्य अन्येति धर्मस्यवर्ण्यावर्ण्यगतत्वादुक्तविलक्षणेत्यर्थः पाशोऽस्यास्तीतिपाशीवरुणः प्रचेतावरुणःपाशीत्यमरः श्रीदःकुबेरः शक्रइंद्रः लोकपालप दंचेंद्रादिषुरूढं राज्ञितुयोगमात्रेणप्रयुक्तं संगतानीति संगतानिसंगमाः तडित्तांविद्युतांविलसितानि घनंनिविडंयथास्यात्तथाआरब्धानी-

> गुणोत्कृष्टैःसमीकृत्यवचोन्यातुल्ययोगिता लोकपालोयमःपाशीश्रीदःशक्रोभवानपि अत्र वर्णनीयोराजाशक्रादिभिर्लोकपालत्वेनसमीकृतः यथावा संगतानिमृगाक्षीणांतडिद्विलसितान्यपि क्षणद्वयंनतिष्ठंतिघनारब्धान्यपिस्वयं पूर्वत्रस्तुतिरिहतुनिंदा इयंकाव्यादर्शेदर्शिता इमांतुल्ययोगितांसिद्धिरितिकेचिद्व्यवजह्रुः

तिसंगमपक्षे घनैर्मेघैरारब्धानीतिचतडिद्विलसितपक्षेऽर्थः काव्यादर्शएतन्नामकदंडिकृतग्रंथे दर्शिता तुल्ययोगितापदवाच्यत्वेननिर्दिष्टां केचित् आलंकारिकाः व्यवजह्रुः व्यवहृतवंतः ७

रव्यातेषु गुणत्वेनप्रसिद्धेषु युवामेवेति इह भूलोके बलैःसैन्यैः अत्रचसैन्यजलयोःप्रसरणशीलत्वादिसादृश्याद्बिंबप्रतिबिंबभावेनाभेदमा-
श्रित्य धर्मैक्यंबोध्यं मतांतरेष्विति बहुवचनेनबहुसंमततया दंड्युक्ततुल्ययोगितायामस्वरसोध्वन्यते सचदीपकतुल्ययोगितयोर्भेदकथना
वसरेव्यक्तीभविष्यतीतिसंक्षेपः इतिश्रीमतूतत्सदुपारव्यवैद्यनाथकृतायामलंकारचंद्रिकारव्यायांकुवलयानंदटीकायांतुल्ययोगिताप्रक

यदाहजयदेवः सिद्धिः रव्यातेषुचेन्नामकीर्त्यतेतुल्यतोक्तये युवामेवहिविरव्यातौत्वंबलैर्जलधि
र्जलैः इतिमतांतरेषत्रवक्ष्यमाणंदीपकमेव ७ वदंतिवर्ण्यावर्ण्यानांधर्मैक्यंदीपकंबुधाः मदे
नभातिकलभः प्रतापेनमहीपतिः प्रस्तुताप्रस्तुतानामेकधर्मान्वयोदीपकं यथाकलभमहीपालयोः
प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः

रणं ७ दीपकंलक्षयति वदंतीति वर्ण्यावर्ण्यान्वितैकचमत्कारिधर्मोदीपक
मित्यर्थः उपमादिवारणायात्रापिपूर्ववल्लक्षणपरिष्कारोबोध्यः कलभःकरिशावकः भानक्रियेति क्रियारूपैकधर्मान्वयइत्यर्थः अत्रापिक्रि
याविशेषणीभूतयोर्मदप्रतापयोर्बिंबप्रतिबिंबाभावोबोध्यः ※ ७ ७ ७

(46)

यथावेति शाणेननिकषपाषाणेनोल्लीढउल्लिखितोमणिः तथाहेतिभिरायुधैर्निहतः क्षतक्षतः समरे संग्रामे विजयशीलोयोद्धा मदेनक्षीणोनागोह स्तीशरत्कालेश्यानानिशुष्कानिपुलिनानिजलनिर्मुक्ततटानियासांताः सरितोनद्यः कलामात्रावशिष्टश्चंद्रः सुरतेमृदिताचुंबनालिंगनाद्युपमर्दम्लापि

यथावा मणिः शाणोल्लीढः समरविजयीहेतिदलितोमदक्षीणोनागः शारदिसरितः श्यानपुलिनाः कलाशेषश्चंद्रः सुरतमृदिताबालवनिता तनिम्नाशोभंतेगलितविभवाश्चार्थिषुनृपाः अत्रप्रस्तुतानांनृपाणामप्रस्तुतानांमण्यादीनांच शोभैकधर्मान्वयः प्रस्तुतैकनिष्ठः समानो धर्मः प्रसंगादन्यत्रोपकरोति प्रासादार्थमारोपितोदीपइव रथ्यायामितिदीपसाम्याद्दीपकं संज्ञायांचेतिइवार्थेकन्प्रत्ययः यद्यपिसुवर्णपुष्पांपृथिवींचिन्वंतिपुरुषास्त्रयः शूरश्चकृतविद्यश्चयश्चजानातिसेवितुमित्यत्रप्रस्तुतानामप्रस्तुतानांयुगपद्धर्मान्वयः तथापिप्रासंगिकत्वंनहीयते वस्तुगत्याप्रस्तुतोद्देशेनप्रसक्तस्यैववर्णनस्याप्रस्तुतेऽन्वयात्

तांगीबालानवयौवनावनितास्त्री एवमर्थिषुयाचकेषुगलितः संक्रांतोविभवः समृद्धिर्येषांते नृपाश्चतनिम्ना तनोः कृशत्वभावस्तनिमाकार्श्यंतेनशोभंतइत्यन्वयः शाणस्तुनिकषःकषइत्समरः शोभैकेति शोभारूपैकधर्मेत्यर्थः पूर्वोदाहरणेआदिदीपकंइहत्वंतदीपकमिति

भेदः प्रस्तुताप्रस्तुतसाधारणधर्मस्यदीपकपदवाच्यतायांबीजमाह प्रस्तुतैकेत्यादि प्रस्तुतैकनिष्ठः प्रस्तुतैकपरः प्रस्तुतान्वयविवक्षयाभिहित इति-
यावत् रथ्यायामिवेत्यनंतरमुपकरोतीत्यनुषज्यते इतीतिचाध्याहार्यं इतिदीपकसादृश्यात्समानो धर्मोदीपकमुच्यतइतिशेषः यत्र धर्मस्यपूर्वंप्रस्तु
तेन्वयः पश्चादन्यत्रयथोक्तोदाहरणयोस्तत्रैवेतरत्र प्रसंगोपकारित्वमित्याशयेनशंकते यद्यपीति सुवर्णेति सुवर्णमिवपुष्पंयस्याइतिविग्रहः
त्रयः गुणत्रयान्यतमयुक्ताः भूरस्त्वेत्यादि प्रत्येकंचकारोनैरपेक्ष्यद्योतकः स्तुतविद्यः प्रख्यातविद्यः एतच्चप्रासंगिकंपद्यंयदायत्प्रसंगेपठ्यतेत
दातस्यप्रस्तुतत्वमितरयोस्त्वप्रस्तुतत्वमितिबोध्यं युगपदिति त्रयश्चिन्वंतीति त्रिष्वपियुगपदन्वयइत्यर्थः चिन्वंतीतिबहुवचनांतस्यप्रस्तुतम
त्रेणैकवचनांतेनपूर्वमन्वयायोगादितिभावः समाधत्ते तथापीति प्रासंगिकत्वं प्रसंगोपकारित्वं नहीयतइति तथाचधर्मस्यपश्चादन्वयोनतत्र
प्रयोजकइतिभावः किंतर्हिप्रयोजकंतत्राह वस्तुगत्येति प्रस्तुतोद्देशेन प्रस्तुतोद्देश्यकान्वयबोधेच्छया प्रयुक्तस्यैवपदाभिहितस्यैव वर्णनस्यकर्मच्युतस्त्यात
द्विषयधर्मस्य तथाचचमत्कारायप्रस्तुताप्रस्तुतान्वितस्वार्थंबोधयत्वितीच्छयोच्चरितपदाभिहितधर्मस्योभयत्रान्वयेप्युद्देश्यताख्येच्छाविषयता
प्रस्तुतएव नत्वप्रस्तुते किंतु विशेषणताख्यविषयतैवेति तथाविधोद्देश्यताविरहएवप्रासंगिकत्वेबीजमित्याशयः एतदेवोपपादयति ५

नहीति प्रासंगिकत्वमिति दीपसूपयोरथ्यातिथिविषये प्रसंगोपकारित्वमित्यर्थः तथाचत्वन्मतेतस्यप्रासंगिकत्वं नस्यादितिभावः इ
दमुपलक्षणं जामातृविषयेप्रासंगिकत्वापत्तिरपिबोध्या एतदेवतुल्ययोगितातोभेदकमित्याह तुल्ययोगितायांत्विति ननूद्देश्यत्वा
नुद्देश्यत्वयोश्चमत्काराप्रयोजकत्वान्नालंकारभेदप्रयोजकत्वंयुक्तमित्यस्वरसादाह अयंचेति अयं वक्ष्यमाणः अनयोःदीपकतुल्य

नहिदीपस्यरथ्याप्रासादयोर्युगपदुपकारत्वेनजामात्रर्थंश्रपितस्यसूपस्यातिथिभ्यः प्रथमपरिवेषणेनच प्रासंगिकत्वंही
यते तुल्ययोगितायांत्वेकंप्रस्तुतमन्यदप्रस्तुतमितिविशेषाग्रहणात्सर्वोद्देशेनैव धर्मान्वयइतिविशेषः अयंचानयोरपरो
विशेषः उभयोरनयोरुपमालंकारस्यगम्यत्वाविशेषेप्यत्रप्रस्तुतमुपमानंप्रस्तुतमुपमेयमितिव्यवस्थितउपमानोपमेयभा
वस्तत्रतुविशेषाग्रहणादैच्छिकःसइति

योगितयोः अत्रदीपके उपमानोपमेयभावइत्यनंत
रंगम्यइतिशेषः तत्र तुल्ययोगितायांविशेषाग्रहणात् प्रस्तुताप्रस्तुतत्वरूपव्यवस्थापकाभावात् ऐच्छिकःअव्यवस्थितःसः उपमानोपमेयभा
वः नव्यास्तुनैतावतापितुल्ययोगितातोदीपकस्यपृथग्भावउचितः धर्मस्यसकृद्वृत्तिमूलायाविच्छित्तेरविशेषात् अन्यथातुल्ययोगितायामपि
धर्मिणांकेवलप्रकृतत्वस्यकेवलाप्रकृतत्वस्यचविशेषस्यसत्वादलंकारद्वैतापत्तेः तस्मात्तुल्ययोगितायाएवत्रैविध्यमुचितमित्याहुः इत्यलंकार

चंद्रिकायांदीपकप्रकरणं ७९

त्रिविधमिति दीपकस्यावृत्तौ आवृत्तिदीपकंभवेत्तच्चत्रिविधमित्यर्थः वर्षतीति शर्वरीरात्रिः वर्षवत्सर इवाम्बरतीत्यर्थः कदंबानिकदंब
कुसुमानिउन्मीलंतिविकसंति कुटजोद्गमाः कुटजकलिकाः स्फुटंतिविकसंति दृप्ताश्चातकामाद्यंतिमत्ताभवंति शिखावलामयूराश्च
माद्यंतीत्यन्वयः त्रैविध्यमुपपादयन्नेवव्याचष्टे दीपकस्येति क्रमेणेति आद्येर्द्वर्षतीतिशब्दावृत्तिः अलंकारसंपादकत्वाच्चनकथितप

त्रिविधंदीपकावृत्तौभवेदावृत्तिदीपकं वर्षत्यंबुदमालेयंवर्षत्येषाचशर्वरी उन्मीलंतिकदंबानिस्फुटंतिकुटजोद्गमाः
माद्यंतिचातकास्तृप्तामाद्यंतिचशिखावलाः दीपकस्यानेकोपकारार्थतयादीपस्थानीयस्यपदस्यार्थस्योभयोर्वावृत्तौत्रि
विधमावृत्तिदीपकं क्रमेणार्थत्रयेणोदाहरणानिदर्शितानि यथावा उत्कंठयतिमेघानांमालावर्गंकलापिनां यूनांचो
त्कंठयत्यद्यमानसंमकरध्वजः ७ ६१ ६१

दत्वंदोषः द्वितीयेविकासरूपस्यार्थस्यावृत्तिः उन्मीलंतिस्फुटंतीतिशब्दभेदेनतस्यैवबोधनात् तृतीयेतुद्वयोरावृत्तिःस्फुटैवेति उत्कंठय
तीति मेघानांमालापंक्तिः कलापिनांमयूराणांवर्गंसमूहं उत्कंठयतिऊर्ध्वकंठोयस्यतादृशंकरोति तथामकरध्वजः कामःयूनांतरुणानांमा
नसमुत्कंठयत्युत्सुकंकरोतीत्यर्थभेदेपिशब्दावृत्तिः ७ ७ ६१

शमयतीति जलधरस्यमेघस्यधारापंक्तिश्चातकतरुणानांचिरकालमुपनतांप्राप्तांतृषंपिपासांशमयति वधूलोचनयोर्जलधाराअ
श्रुपंक्तिश्चकामिनांप्रवासेछांक्षपयतीत्येकएवनाशरूपो र्थः शब्दभेदेनोक्तइत्यर्थावृत्तिः वदनेनेति पाथसांजलानां अत्र निलीयतेश
ब्दस्यतदर्थस्यतिरोधानस्यचावृत्तिः ननुप्रस्तुतार्थसकृदुपात्तस्यप्रसंगादप्रस्तुतोपकारित्वेदीपकमित्युक्तं नचावृत्तौतत्संभवतीतिकथ-
मावृत्तिदीपकमुक्तमित्याशंक्याह एवंचेति दीपस्थानीयशब्दार्थयोरावृत्तौचेत्यर्थः प्रस्तुताप्रस्तुतेति अंबुदमालादीनांविरहोद्दीपकत

शमयतिजलधरधाराचातकयूनांतृषंचिरोपनतां क्षपयतिचवधूलोचनजलधाराकामिनांप्रवासरुचिं वदनेननिर्जितं
तवनिलीयतेचंद्रबिंबमंबुधरे अरविंदमपिचसुंदरिनिलीयतेपाथसांपूरे एवंचावृत्तीनांप्रस्तुताप्रस्तुतोभयविषयत्वाभा
वेपिदीपकछायापत्तिमात्रेणदीपकव्यपदेशः

याकेवलप्रस्तुतत्वात् चंद्रबिंबारविंदयोश्चकेवलाप्रस्तुतत्वादितिभावः दीपकछाये
ति दीपकसादृश्येत्यर्थः तच्चप्रस्तुताप्रस्तुतोपकारयोग्यत्वंवर्षतीत्यादौश्लेषवशेनास्तीतिभावः मात्रपदेनदीपकात्पृथगेवायमलंकारोनतुतद्
भेदइतिसूचितं अतएवदंडिना अर्थावृत्तिःपदावृत्तिरुभयावृत्तिरित्यपि दीपकस्थानमेवेष्टमलंकारत्रयंयथेत्युक्त्वाविकसंतीत्याद्युदाहृ
तं दीपकस्थानं स्थानापन्नंसदृशमितियावत् इत्यलंकारचंद्रिकायांआवृत्तिदीपकप्रकरणं ७

सद्धद्धर्मोक्तिप्रसंगादसद्धद्धर्मोक्तिगम्यवाक्यार्थसादृश्यकं प्रतिवस्तूपमालंकारं लक्षयति वाक्ययोरिति द्विवचनमनेकाभिप्रायं मा
लानुरोधादितिबोध्यं एकसामान्ये एकस्मिन्समानधर्मेसति सूरः सूर्यः लक्षणं व्याचष्टे यत्रेति उपमानोपमेयेतिभावप्रधानं उपमानोपमेय
भावपरयोरित्यर्थः पृथगिति भिन्नशब्देनेत्यर्थः अयमेवचवस्तुप्रतिवस्तुभावइत्युच्यते स्थिरेति शैली सद्वृत्तं रत्नमेवदीपोरत्नदीपः अत्रपू

वाक्ययोरेकसामान्येप्रतिवस्तूपमामता तापेनभ्राजतेसूर्यः शूरश्चापेनराजते यत्रोपमानोपमेयवाक्ययो
रेकः समानोधर्मः पृथक्निर्दिश्यतेसा प्रतिवस्तूपमा प्रतिवस्तुप्रतिवाक्यार्थमुपमासमानधर्मोस्यामितिव्यु
त्पत्तेः यथात्रैवभ्राजतेराजतइत्येकएवधर्मउपमानोपमेयवाक्ययोः पृथग्भिन्नपदाभ्यां निर्दिष्टः यथावा
स्थिराशैलीगुणवतां खलबुध्यानबाध्यते रत्नदीपस्यहिशिखा वात्ययापिननाश्यते ७ ७

र्वार्द्धमुपमेयवाक्यं उत्तरार्धमुपमानवाक्यं उभयत्र चनाशाभावरूपः समानधर्मः शब्दभेदेनोपात्तः सामान्याभावमात्रबोधकस्यापिवाधतेरत्रना
शरूपविशेषपरत्वात् अयमेवचपूर्वोदाहरणाद्भेदः ७ ७ ७

तवेति ईश्वरंप्रतिभक्तस्योक्तिः अमृतप्रस्रवणशीले तवपादपंकजे निवेशितआत्मांतःकरणंयेन तादृशो भक्तः अन्यदमृतातिरिक्तंफलंकथमिछतिन कथमपीत्यर्थः अमृतंचात्र ब्रह्मानंदरूपंहि निश्चितं मधुव्रतो भ्रमरः मकरंदेनरसेन निर्भरेव्याप्तेऽरविंदे स्थितेसति इक्षुरसंनवीक्षत इक्षुपमानवाक्यं अवर्जनीयस्येति अनिष्टेपिस्वसामग्रीवशाज्जायमानस्येत्यर्थः इछापूर्वकेति तथाचवीक्षतेरिछापूर्वकवीक्षणेलक्षणेतिभावः इछापर्यवसितइति सविशेषणेहीतिन्यायादितिभावः उन्मीलंतिकदंबानीतिपूर्वोदाहृतायामर्थावृत्तावतिव्याप्तिमाशंक्याह अर्थावृत्तिरित्यादि शब्दावृत्तौतु

यथावा तवामृतस्यंदिनिपादपंकजे निवेशितात्मा कथमन्यदिछति स्थितेरविंदेमकरंदनिर्भरेमधुव्रतोनेक्षुरसंसमीक्षते अत्र यद्यपिउपमेयवाक्येअनिछाउपमानवाक्ये अवीक्षेतिधर्मभेदः प्रतिभाति तथापिवीक्षणमात्रस्यावर्जनीयस्य प्रतिषेधानर्हत्वात् इछापूर्वकवीक्षाप्रतिषेधोयं अनिछापर्यवसितएवेतिधर्मैक्यमनुसंधेयं

धर्मस्यैकेनैवशब्देनावृत्याबोधनान्नभिन्नशब्दबोध्यत्वमिति नातिव्याप्तिरतोर्थावृत्तिपर्यंतानुधावनं एवंचभिन्नशब्दबोध्यैकधर्मगम्यं प्रस्तुताप्रस्तुतवाक्यार्थसादृश्यं प्रतिवस्तूपमेतिलक्षणंबोध्यं दृष्टांतालंकारेतिव्याप्तिवारणायभिन्नशब्दबोध्येति तत्रतुबिंबप्रतिबिंबभावापन्नधर्मगम्यंसादृश्यमितिनातिव्याप्तिः द्विविभातियथाभानुस्तथात्वंभ्राजसेभुवीत्यादिवाक्यार्थोपमायामतिव्याप्तिवारणायगम्यमिति ॐ

७ ८ ९

अर्थावृत्तिवारणायप्रस्तुताप्रस्तुतेति आननंमृगदृशावाक्ष्यावीक्ष्यलोलालकावृतं भ्रमद्भ्रमरसंकीर्णंस्मरामिसरसीरुहमितिस्मरणालंकारेतिव्याप्ति
वारणायवाक्यार्थेति अत्रहिदिविभातीतिवाक्यार्थोपमायांगगनाधिकरणकशोभाश्रयभानुसदृशोभूम्यधिकरणकशोभाश्रयस्त्वमितिप्रतीतिवत्र
स्मर्यमाणतादृशसरोरुहसदृशंतथाविधमाननमितिप्रतीतिर्येनवाक्यार्थगतोपमागम्यास्यात् किंतुस्मरणासंपृक्तातादृशसरोरुहसदृशंतादृ

अर्थावृत्तिदीपकंप्रस्तुतानामप्रस्तुतानांवा प्रतिवस्तूपमातुप्रस्तुताप्रस्तुतानामितिविशेषः
आवृत्तिदीपकंवैधर्म्येणनसंभवतिप्रतिवस्तुपमातुवैधर्म्येणदृश्यते ७ ७

शमाननमितिपदार्थगतोपमैवेतितद्वारणमितिदिक् प्रस्तुताप्रस्तुतत्वयोश्चप्रकृतिविशेषाप्रयोजकतयानालंकारभेदप्रयोजकत्वमित्यस्वर
सादाह अयंचेति वक्ष्यमाणइत्यर्थः ॐ... — ॥७॥ ॥७॥ ॥७॥

विद्वानेवेति यद्यप्यन्ययोगव्यवच्छेदार्थेनैवकारेण विद्वान्नजानातीति पूर्ववाक्यार्थस्तस्य च नहि वंध्येत्युत्तरवाक्यार्थः सधर्मैव तथापि रूपवत्से
वाकाशइत्यादिप्रयोगवारणाय भावान्वयस्याप्यावश्यकतया विद्वानजानातीति वाक्यार्थस्यापि प्रतीतेस्तदभिप्रायेण वैधर्म्योदाहरणत्वं बोध्यं
ननु वैधर्म्येणोपमेति व्याहृतं तस्याः साधर्म्यरूपत्वादिति चेत्सत्यं वैधर्म्येणोपन्यस्तेन नहि वंध्येति वाक्यार्थेनाक्षिप्तस्यापितु प्रसविव्य
थजानातीति वाक्यार्थस्योपमानत्वेन विवक्षणात् मुखतो वैधर्म्यप्रतीतावपि साधर्म्य एव पर्यवसानान्नदोषः वैधर्म्येणेत्यस्य च वैधर्म्यद्वा

यथा विद्वानेव हि जानाति विद्वज्जनपरिश्रमं नहि वंध्या विजानाति गुर्वीं प्रसववेदनां
यदि संति गुणाः पुंसां विकसंत्येव ते स्वयं नहि कस्तूरिकामोदः शपथेन विभाव्यते ६

रइत्यर्थः यदि संतीति एवकारो भिन्नक्रमः स्वयमेव विकसंति प्रकाशंत इत्यर्थः अत्रापि गुणाः स्वयं प्रकाशंत इति भावान्वयविधर्मा कस्तूरि-
कामोदः शपथेन नज्ञायत इति वाक्यार्थस्तदाक्षिप्तेन किंतु स्वयमेव प्रकाशत इति वाक्यार्थेन चौपम्यं गम्यमिति पूर्ववद्वैधर्म्योदाहरणत्वसंगतिः
यत्तत्र केश्चिदुक्तं विद्वानेवेति पद्यं भवतु नाम कथंचिद्वैधर्म्योदाहरणं यदि संतीति तु न युक्तं वैधर्म्योदाहरणं हि प्रस्तुतधर्मिविशेषोपारूढार्थ

दार्ष्टान्तिकयस्याक्षिप्तस्य व्यतिरेकसमानजातीयस्य धर्म्यंतरारूढस्याप्रकृतार्थस्य कथनं यथा वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः नहि तुंबीफ
लविकलो वीणादंडः प्रयाति महिमानमित्यादौ अत्र हि संगविशेषेण पूज्यते इति प्रस्तुतार्थाक्षिप्तस्य संगविशेषेण विना न पूज्यत इति स्वव्यतिरेकस्य
सजातीयो नहि तुंबीफलविकल इत्याद्यप्रकृतार्थो निबद्ध इति वैधर्म्योदाहरणत्वं यदि संतीत्यत्र तु स्वयंप्रकाशंते न परेणेत्यस्य प्रस्तुतस्यैव सजा
तीयोऽप्रकृतोर्थः शपथेन न विभाव्यते किंतु स्वयमेवेति प्रकृतार्थानुरूपतयैव पर्यवसानादिति नत्रेदं वक्तव्यं वंशभवइत्यादिभवदुदाहृतप
द्येपि कथं वैधर्म्योदाहरणत्वं नहीत्यादेस्तुंबीफलविकलो महिमानं न प्रयात्यपि तु तद्युक्त इति प्रकृतार्थानुरूपतयैव पर्यवसानादिति किं बहुना
सर्वत्रैव वैधर्म्योदाहरणे साधर्म्यपर्यवसानं विना नोपमानिर्वाह इति तदुच्छेदप्रसंगः अथापातप्रतिपन्नेनाप्रकृतवाक्यार्थेन वैधर्म्यात्तदुदाहरण
त्वं तर्हि प्रकृतेपि तदस्तीति तुल्यं यदपि प्रस्तुतेत्यादि वैधर्म्योदाहरणत्वनिर्वचनं तदयुक्तं भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांस
वइति वैधर्म्यदृष्टांतव्यापनात् नह्यत्र प्रस्तुतवाक्यार्थः स्वव्यतिरेकमाक्षिपति किंत्वप्रकृतवाक्यार्थ एवेति दिक् इत्यलंकारचंद्रिका
यां प्रतिवस्तूपमालंकारप्रकरणं ❀ ७ ७ ७

(५१)

दृष्टांतालंकारं लक्षयति चेदिति वाक्ययोरित्यनुवर्तते धर्मयोरित्यध्याहार्यं तदिति तच्छब्देत्यर्थकं अर्थतोव्याचष्टे यत्रेति यत्र काव्ये तथाचोपमा
नोपमेयवाक्यार्थघटकधर्मयोर्बिंबप्रतिबिंबभावोदृष्टांतइतिलक्षणं काममिति अनेन प्रकृतराजविशेषेण राजन्वती शोभनराजवती राजन्वा
न्सौराज्ये इति निपातः नक्षत्राण्यश्विन्यादीनिसप्तविंशतिः तारास्तदितराः गोबलीवर्दन्यायात् ग्रहाभौमादयः संकुलाव्याप्ता ज्योतिष्मतीति

चेद्बिंबप्रतिबिंबत्वं दृष्टांतस्तदलंकृतिः त्वमेवकीर्तिमान्राजन्विधुरेवहिकांतिमान् यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव
धर्मौ बिंबप्रतिबिंबभावेननिर्दिष्टौ तत्र दृष्टांतः त्वमेवकीर्तिमानित्यत्रकीर्तिकांत्योर्बिंबप्रतिबिंबभावः यथावा काममंनृपाः
संतिसहस्रशोन्येराजन्वतीमाहुरनेनभूमिं नक्षत्रताराग्रहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः ❁ ७

प्राशस्त्येमतुप् अत्रराजन्वतीज्योतिष्मतीत्यनयोर्बिंबप्रतिबिंबभावः पूर्वोदाहरणेकीर्तिकांत्योर्बिंबप्रतिबिंबभावप्रयोजकं मनोहारित्वरूपंसा
दृश्यमात्रंइह तुराजज्योतिषोः प्राशस्त्यरूपं तच्छाब्दमितिभेदः ७ ७ ७

देवीमिति देवींवाचंसरस्वतींबहवउपासतेहिसेवंतएवहि हिशब्दस्यैदकारार्थत्वात् तुपरंसरस्वतींसंबंधिसारं असौप्रसिद्धः गुरुकुले क्लिष्टः अध्ययनश्रमवान्मुरारिनामा कविर्नितरामतिशयेनजानीते अत्रदृष्टांतमाह वानररूपैर्भटैर्योधृभिरब्धिर्लंघितएव किंतु अस्याब्धेर्गंभीरतांपाताल पर्यंतनिमग्नापीवरास्थूला तनुर्यस्यैवंविधोमंथाचलः मंदराद्रिरेवजानातीति दृष्टांतोदाहरणत्वासंगतिमाशंकते नन्विति वाक्ययोरिति

यथावा देवींवाचमुपासतेहिबहवः सारंतुसारस्वतंजानीतेनितरामसौगुरुकुलक्लिष्टोमुरारिः कविः अब्धिर्लंघित एववानरभटैः किंत्वस्यगंभीरतामापातालनिमग्नपीवरतनुर्जनातिमंथाचलः नन्वत्रोपमानोपमेयवाक्ययोर्ज्ञानमेकएवधर्मइतिप्रतिवस्तूपमायुक्ता मैवं अचेतनेमंथाचलेज्ञानस्यबाधितत्वेनतत्रजानातीत्यनेनसागराधस्तलावधिसंस्पर्शमात्रस्यविवक्षितत्वात्

सप्तमी एकधर्मइत्यनंतरंशब्दभेदेननिर्दिष्टइतिशेषः सागरस्याधस्तनोयोऽवधिरितिगंभीरतापदार्थकथनं संस्पर्शस्तु लक्षणयाजानात्यर्थइतिबोध्यं तथाचधर्मभेदान्नप्रतिवस्तूपमा किंतुसारस्वतसारज्ञानसागराधस्तलावधि संस्पर्शयोर्बिंबप्रतिबिंबभावादृष्टांतालंकारएवेत्याशयः वर्षत्यंबुदमालेयंवर्षत्येषाचशर्वरीतिवसदावृत्तिदीपकंस्यादित्याशंक्यसमाधत्ते ॥ ९

(52)

अत्रेति पूर्ववत् अर्थावृत्तिप्रतिवस्तूपमयोरिव प्रस्तुताप्रस्तुतेति दृष्टांतः प्रस्तुताप्रस्तुतविषयः पदावृत्तिस्तु तदन्यतरमात्रविषयेत्यर्थः यद्य-
प्यत्रात्मनेपदपरस्मैपदभेदेन पदभेदान्नपदावृत्तिशंकोचिता तथापि पाठपरिवर्तनेन पदाभेदेपि न पदावृत्तेरयं विषय इति बोधयितुमेवदुक्तं
अयं दृष्टांतः कृतंचेति नृपंप्रतिमंत्रिण उक्तिः हे राजन् त्वया मनोगर्वस्याभिमुखं न तु गर्वितं कृतं च किमन्यदपेक्षितमिति शेषः एवं शस्त्रप्र

अत्रोदाहरणे पदावृत्तिदीपकाद्विशेषः पूर्ववत्प्रस्तुताप्रस्तुतविषयत्वकृतो द्रष्टव्यः
वैधर्म्येणाप्ययं दृश्यते कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः
तमांसि तिष्ठंति हि तावदंशुमान्न यावदायात्युदयाद्रिमौलितां ७९ ९

योगादिकं विना नोऽस्माकं द्विषः शत्रवो निहताश्च न तु निहनिष्यंते अंशुमान् सूर्यो यावदुदयाद्रेर्मौलितां शिरोलंकारतां नायाति तावदेव तमांसि ति
ष्ठंति तस्मिंस्तु तथाभूते न तिष्ठंतीति दृष्टांतः अत्र मनोगर्वाभिमुखीकरणवैरिहननयोरंशुमदुदयाचलमस्तकानागमनतमःस्थित्योश्च यथाक्रमं
वैधर्म्येण बिंबप्रतिबिंबभावः इत्यलंकारचंद्रिकायां दृष्टांतालंकारप्रकरणं ९

निदर्शनां लक्षयति वाक्यार्थयोरिति सदृशवाक्यार्थसंबंधीय ऐक्यारोपः उपमेयवाक्यार्थे उपमानवाक्यार्थाभेदारोप इति यावत् यद्दातुरिति
दातुः सौम्यतेति यत् इति सामान्ये नपुंसकं सेयमिति विधेयाभिप्रायकं स्त्रीलिंगं यत्तद्भ्यामिति यद्यपि मुखं चंद्र इतिवत् दातुः सौम्यता पूर्णेंदोरकलं
कतेत्येतावताप्यैक्यारोपः संभवति तथापि यत्तद्भ्यां शीघ्रं स्फुटतया तदवगमात्तदुपन्यासः अरण्येति अबुधो मूर्खो जनः सेवितो यदिति गुणीभू
तसेवनक्रियापरामर्शः उत्तरवाक्यगतेन यच्छब्देन तच्छब्दाक्षेपात् तत् अरण्यरुदितं कृतमित्याद्यन्वयः उद्वर्तनं यवगोधूमादिचूर्णेन मलापक

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना यद्दातुः सौम्यता सेयं पूर्णेंदोरकलंकता अत्र दातृपुरुषसौम्यत्वस्योपमेयवाक्यार्थ
स्य पूर्णेंदोरकलंकत्वस्योपमानवाक्यार्थस्य यत्तद्भ्यामैक्यारोपः यथावा अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं स्थलेऽब्जमवरो
पितं सुचिरमूखरे वर्षितं श्वपुच्छमवनामितं बधिरकर्णजापः कृतो धृतोंधमुखदर्पणो यदबुधो जनः सेवितः अत्राबुधजनसेवाया
अरण्यरोदनादीनां यत्तद्भ्यामैक्यारोपः

र्षणं स्थले निर्जलप्रदेशे अब्जं जलजं ऊखरे अंकुरायोग्यक्षारभूभागे श्वनः पुच्छं श्वपुच्छं अवनामितं
ऋजुतासंपादनाय नम्रीकृतं बधिरस्य कर्णे जप एव जापः प्रलाप इत्यर्थः अंधस्य मुखे तत्संमुखं दर्पणो धृत इत्येवं निरर्थकत्वेन सदृशानामनेकेषां वा
क्यार्थानामबुधजनसेवनरूपप्रकृतवाक्यार्थे ऐक्यारोपः पूर्वत्रत्वेकस्यैवैक्यारोप इति विशेषः

निदर्शनांतरमाह पदार्थेति पदार्थवृत्तिं पदार्थसंबंधिनीं एके आलंकारिकाः अन्यां पूर्वोक्तविलक्षणां त्वन्नेत्रेति लीलां शोभां नीलांबुजन्मनोः नी
लोत्पलयोः वियोगइति गौडदेशगतानां नारीणां वियोगे स्वकांतवियोगकाले योगंडतले पांडिमा पांडुवर्णो भवति सः खर्जूरीणां लतानां मंजरीगर्भ
स्थेषुरेणुषु अदृश्यत दृष्टइत्यन्वयः उपमाने यथोक्तरेणुरूपे उपमेयेउपमानधर्मारोप एवपदार्थनिदर्शनायाः प्राचीनैरुदाहरणात्कथमियं

पदार्थवृत्तिमप्येके वदंत्यन्यांनिदर्शनां त्वन्नेत्रयुगुलंधत्ते लीलांनीलांबुजन्मनोः अत्रनेत्रयुगलेनीलांबुजगतली
लापदार्थारोपोनिदर्शना यथावा वियोगेगौडनारीणांयोगंडतलपांडिमा अदृश्यतसखर्जूरीमंजरीगर्भरेणुषु
पूर्वस्मिन्नुदाहरणेउपमेयेउपमानधर्मारोपः इहतूपमानेउपमेयधर्मारोपइतिभेदः उभयत्राप्यन्यधर्मस्यान्य
त्रासंभवेनतत्सदृशधर्माक्षेपादौपम्येपर्यवसानंतुल्यं इयंपदार्थवृत्तिनिदर्शनाललितोपमेतिजयदेवेनव्याहृता ५

पदार्थनिदर्शनोच्यतइतिशंकायामाह उभयत्रेति उपमेयेउपमानधर्मारोपेउपमानेउपमेयधर्मारोपेचेत्यर्थः तथाचौपम्यपर्यवसायित्वस्यैवपदार्थनिदर्शना
जीवातुत्वेनारोपविषयस्योपमेयत्वेननिवेशेप्रयोजनाभावादिहापिसायुक्तैवेतिभावः ५

७

नन्वेवं सति वाक्यार्थनिदर्शनालक्षणस्यात्रातिव्याप्तिरित्याशंक्याशयवानाह यद्यपीति वियोगकालीनगौडनारीगंडतलपाण्डिम्नः खर्जूरीमंजरीग
र्भरेणुदृष्टपाण्डिम्नश्च यत्तद्भ्यामैक्यारोपसत्त्वादिति भावः अर्थविशेषविवक्षयातिव्याप्तिं परिहरन्नेवस्वाभिमतनिदर्शनाद्वयविषयविभागं दर्शयितुं
तथापीति विशिष्टयोः बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोः एवं च वाक्यार्थशब्देनैतादृशार्थविवक्षणाद्वियोग इत्याद्युदाहरणे नातिव्या

यद्यपि वियोगे गौडनारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतः तथापि
विशिष्टयोर्धर्मयोरैक्यारोपो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यत
रधर्मारोपः पदार्थवृत्तिनिदर्शनेति व्यवस्थामाश्रित्यास्माभिरिहोदाहृतः ७, ७,

प्तिरिति भावः उपमानेत्यादि एतच्च स्वरूपकथनं न त्वेवंरूपेण लक्षणे निवेशः ताद्रूप्यरूपकातिव्याप्तिवारणायोपमाकल्पकत्वस्यारोपविशे
षणस्यावश्यकत्वे न उपमाकल्पकस्तत्तद्धर्मारोप इत्येतावत एव लक्षणस्य निर्दुष्टत्वात् तदुक्तं अभवन्वस्तुसंबंध उपमापरिकल्पक इति ताद्रू
प्यरूपके तु ताद्रूप्यावच्छिन्नाभेद एव विवक्षितो न पुनरुपमेति तद्वारणम् ॥ ७ ७,

ननु त्वयि सतीत्याद्युदाहरणे कापि निदर्शना न स्यात् अन्यधर्मस्यान्यत्रारोपात् एकवाक्यत्वेन वाक्यार्थभेदाभावाच्च पदार्थवाक्यार्थनिदर्शनयो रसंभवादित्याशंक्याह एवंचेति उक्तव्यवस्थाश्रयणेचेत्यर्थः विशिष्टयोरिति बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टयोरित्यर्थः तत्रतावत्पूर्व

एवंच त्वयि सति शिव दातर्यस्मदभ्यर्थितानामितरमनुसरंतो दर्शयंतोर्थिमुद्रां चरमचरणपातैर्दुर्ग्रहं दोग्धुकामाः करभमनुसरामः कामधेनो स्थितायां दोर्भ्यामब्धिं तितीर्षतस्तुष्टुवुस्ते गुणार्णवमित्यादिषु वाक्यभेदाभावेपि वाक्यार्थवृत्तिरेव निदर्शना विशिष्टयोरैक्यारोपसद्भावात् वाक्यार्थयोः सदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टस्वरूपयोः प्रस्तुताप्रस्तुतधर्मयोर्विवक्षितत्वादिति एवंच राजसेवा मनुष्याणामसिधारावलेहनं पंचाननपरिष्वंगो व्यालीवदनचुंबनमित्यत्र प्रस्तुताप्रस्तुतवृत्तांतयोरेकैकपदोपात्तत्वेपि वाक्यार्थवृत्तिनिदर्शनाया न क्षतिः तयोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टव्यवहाररूपत्वात्

पद्ये भोः शिव अस्मदभ्यर्थितानां दातरि त्वयि सति इतरं क्षुद्रं प्रभुमनुसरंतोर्थिनां मुद्रां चिह्नं दर्शयंतो वयं कामधेनौ स्थितायां दोग्धुकामाश्चरमयोः पाश्चात्ययोश्चरणयोः पातैर्दुर्ग्रहं दुःखेन ग्राह्यं करभमुष्ट्रशिशुमनुसराम इत्यर्थके सकल-

कामदमहेश्वरकालीनक्षुद्रधनिकानुसरणकर्तुः कामधेनुस्थितिकालीनतथाविधकरभानुसरणकर्तुश्चैक्यारोपः नत्रोपमानकोटिविशेषणयोः कामधेनुकरभयोरुपमेयकोटिविशेषणयोश्च महेश्वरक्षुद्रधनिकयोर्यथाक्रमं बिंबप्रतिबिंबभावो बोध्यः एवमनुसरणयोरपि एवं दोर्भ्यामित्यत्रापि अब्धिगुणसमूहयोर्बिंबप्रतिबिंबभावो बोध्यः नन्वियं व्यवस्थामूलविरुद्धेत्याशंक्याह वाक्यार्थयोरिति ननु वाक्यार्थशब्दस्यावांतरवाक्यार्थसाधारणानेकपदार्थपरत्वेनैवोक्तोदाहरणसंग्रहसंभवादेवंविधगुरुतरार्थपरत्वं नयुक्तमित्यत आह एवंवेति एवंविधार्थविवक्षणे चेत्यर्थः अवलेहनं जिह्वयाघट्टनं पंचाननः सिंहस्तस्य परिष्वंग आलिंगनं व्याली भुजंगी अशक्यत्वं बलवदनिष्टजनकत्वं च साधारणो धर्मः प्रस्तुतवृत्तांतो राजसेवा निदर्शनायाः तल्लक्षणस्य नक्षतिः नाव्याप्तिः तयोः प्रस्तुताप्रस्तुतवृत्तांतयोः असिधारादिभिः समं राज्ञो बिंबप्रतिबिंबभावात्तद्विशिष्टयोश्चैक्यारोपादिति भावः एवं तर्हि सदृशयोरैक्यारोपइत्येवलक्षणमस्त्वित्याशंक्याह ॥ ५ ५

अतएवेति एतादृशविशेषणविवक्षणादेवेत्यर्थः भेदोव्यावृत्तिः तथाचतदभावेरूपकेतिप्रसंगःस्यादितिभावः कथमनेनतद्वारणंतत्राहरूप-
केहीति अविशिष्टयोः बिंबप्रतिबिंबभावापन्नवस्त्वविशिष्टयोः बिंबप्रतिबिंबभावापन्नेत्यस्यव्यावृत्तिंदर्शयति अंघ्रिदंडइत्यादि बलेर्दैत्यवि
शेषस्यनिग्रहेबंधनेकर्तव्येऊर्ध्वमुत्क्षिप्तोहरेरंघ्रिदंडोवोयुष्माकंमुदेऽस्त्वितिसंबंधः कीदृशः विधेर्ब्रह्मणोविष्टरआसनंतद्रूपस्यपद्मस्यनाल

अतएवनिदर्शनायारूपकाद्भेदः रूपकेत्वविशिष्टयोरेवमुखचंद्रादिकयोरैक्यारोपः अंघ्रिदंडोहरेरूर्ध्वमु
त्क्षिप्तोबलिनिग्रहे विधिविष्टरपद्मस्यनालदंडोमुदेस्तुवइतिविशिष्टरूपकोदाहरणेपिनबिंबप्रतिबिंबभावा
पन्नवस्तुविशिष्टरूपता विधिविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मवत्तासंपादनार्थमेवतद्विशेषणोपादानात्

दंडइत्यर्थः विशिष्टरूपकेति ऊर्ध्वोत्क्षिप्तत्वविशिष्टांघ्रिदंडविधिविष्टरपद्मसंबंधित्वविशिष्टनालदंडसंबंधिरूपकेत्यर्थः विशेषणेति ऊ-
र्ध्वोत्क्षिप्तत्वरूपोपमेयविशेषणविधिविष्टरपद्मसंबंधित्वरूपोपमानविशेषणयोरित्यर्थः ७ ७ ७

एवकारसूचितबिंबप्रतिबिंबभावव्यतिरेकंस्फुटयति यद्यत्विति अभावादिति सादृश्याभावादितिभावः रूपकविशेषेऽतिव्याप्तिमाशं-
क्य परिहरति यत्रत्वित्यादिना यत्रत्वित्यस्यइतिसावयवरूपकोदाहरणेइत्यग्रेतनेनान्वयः विषयविषयिविशेषणानां आरोपविषयारो
प्यमाणसंबंधिनां विशेषणानां ज्योत्स्नेति इयंरात्रिरेवकापालिकीयोगिनीद्वीपात्द्वीपांतरंभ्रमतीत्यन्वयः एतत्प्रधानरूपकं एतदंगभूतान्य

यद्यतुःसौम्यत्वेत्यादिनिदर्शनोदाहरणेषुदात्तृपूर्णेंद्वादीनामानंदकरत्वादिनेवात्रविशेषणयोर्बिंबप्रतिबिंबभावाभावात्
यत्रतुविषयिविशेषणानांपरस्परसादृश्येनबिंबप्रतिबिंबभावोस्ति ज्योत्स्नाभस्मच्छुरणधवलाबिभ्रतीतारकास्थीन्यंतर्धा
नव्यसनरसिकारात्रिकापालिकीयं द्वीपाद्वीपंभ्रमतिदधतीचंद्रमुद्राकपालेन्यस्तंसिद्धांजनपरिमलंलांछनस्यछलेनेतिसा
वयवरूपकोदाहरणेतत्रापिविषयविषयिणोस्तद्विशेषणानांचप्रत्येकमैक्यारोपः ननुज्योत्स्नादिविशिष्टरात्रिरूपविषय
स्यभस्मादिविशिष्टकापालिकीरूपविषयिणश्चविशिष्टरूपेणैक्यारोपोस्तीति तस्माद्राजसेवामनुष्याणामित्यादावपिवा
क्यार्थवृत्तिनिदर्शनैवयुक्ता

पराणिविशेषणैः प्रतिपाद्यंते यथा ज्योत्स्नारूपेणभस्मनाच्छुरणमंगलेपस्तेनधवला तारकारूपा
ण्यस्थीनिबिभ्रती अंतर्धानस्यव्यसनेकौतुकेरसिका चंद्ररूपेमुद्राकपालेन्यस्तंलांछनस्यछलेनसिद्धांजनस्यपरिमलंचूर्णंदधतीधारयं

५८

कुवल० ५६

ती दीक्षाकालगृहीतोपकरणेषुमुद्रेपपदनाम्नापारवंडानांव्यवहारइतिचंडीदासः मुद्रापरिमलशब्दोप्रशंसार्थावित्यन्ये मुद्राचिङ्कंतद्रूपेकपा
लइतिवार्थः विषयविषयिणोःरात्रिकापालिक्योः तद्विशेषणानां तत्संबंधिनांज्योत्स्नाभस्मादीनां यथाश्रुतेरात्रिकापालिकीतिसमासस्योत्तरपदार्थ
प्रधानतयाज्योत्स्नादीनांरात्रिविशेषणत्वाभावादसंगतेः प्रत्येकमेवेति शुद्धस्वरूपेणैवेत्यर्थः नन्विति उक्तयुक्त्याविशेषणत्वाभावादितिभावः
वस्तुतोभस्मादेः कापालिकींप्रत्यपिनविशेषणत्वमपितुतत्कोटिनिविष्टत्वमेवेत्यपिबोध्यं वाक्यार्थशब्दस्यबिंबप्रतिबिंबभावापन्नवस्तुविशि

मतांतरेत्विहपदार्थवृत्त्यैवनिदर्शनयाभाव्यमिति

ष्टार्थपरत्वमंगीकृत्यराजसेवेत्युदाहरणेवाक्यार्थवृत्तिनिदर्शनात्वमुक्तमुपसंहरति तस्मादिति उक्तलक्षणस्यव्यवस्थितत्वादित्यर्थः मतांतरे
त्विति सदृशयोर्वाक्यार्थयोरैक्यारोपइतियथाश्रुतलक्षणांगीकर्तृमतेइत्यर्थः इह राजसेवेत्युदाहरणे पदार्थवृत्त्यैवेति उपमाकल्पकएकपदार्थेअ
परपदार्थतद्धर्मान्यतरारोपइतितल्लक्षणस्यतदभिमतत्वादितिभावः ७ ७ ७

चं०दी० ५६

क्रियया सत्सदर्थयोर्वोधनमपरां निदर्शनां प्राहुरिति संबंधः स
निदर्शनांतरमाह अपरामिति पूर्वविलक्षणमित्यर्थः निदर्शनामित्यनुषज्यते

उदयन्नेव सविता पद्मेष्वर्पयति श्रियं वि
अपरां बोधनं प्राहुः क्रियया सत्सदर्थयोः नश्येद्राजविरोधीति क्षीणं चंद्रोदये तमः
भावयन्समृद्धीनां फलं सुहृदनुग्रहः कस्यचित्किंचित्क्रियाविशिष्टस्य स्वक्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं यन्निबध्य
नेतदपरां निदर्शनामाहुः असदर्थबोधने उत्तरार्धमुदाहरणं तत्र नश्येदिति बोधयदिति वक्तव्ये बोधयदित्यस्य गम्यमानत्वा
त्प्रयोगः ततश्च राज्ञा चंद्रेण सह विरुध्यत्स्वयं नाशक्रियया विशिष्टं तमः स्वकीयनाशक्रियया दृष्टांतभूतया अन्योप्येवं राज
विरुद्धश्चेत्तूनश्येदित्यनिष्टपर्यवसायिनमर्थं बोधयदेव नष्टमिति निबंधनात् असदर्थनिदर्शना तथा उत्तरश्लोके सविताखो
दयसमय एव पद्मेषु लक्ष्मीमादधानः स्वया पद्मलक्ष्म्याधानक्रियया परान्प्रति समृद्धीनां फलं सुहृदनुग्रह एवेति श्रेयस्करमर्थं बोध
यन्निबद्ध इति सदर्थनिदर्शना

इसदर्थयोरिति वक्तव्ये पिछंदोऽनुरोधादित्थमभिधानं समुद्राभ्राद्धः इत्यादिसौत्रनिर्देशेन पूर्वनिपातवि
धेरनित्यत्वज्ञापनात् लक्षणं व्याचष्टे कस्यचिदिति अत्रासतः सतो वेति विभागकथनं न तु लक्षणांतर्गतं उदासीनार्थबोधने चमत्कारित्वाभावे

नैवानतिप्रसंगात् स्वक्रिययासहकारिभूतयाक्रियाविशिष्टस्यवस्तुनःसंबंधिअर्थस्यबोधनंबोधानुकूलोव्यापारोयन्निबध्यतेवर्ण्यतेसानिदर्शने
तिलक्षणं अथनिवातपद्मोदरसोदराभ्यांविलोचनाभ्यामवलोकयंती नकेवलंयूनिमनोभवेपिव्यनक्तिकंचित्तपसःप्रभावमित्यादावतिव्या
प्तिः अवलोकनक्रियाविशिष्टयाकामिन्यातपःप्रभावबोधनस्यवर्णनादितिचेन्न क्रिययेत्यनेनदृष्टांतविधयाबोधनस्यविवक्षितत्वात्
उक्तोदाहरणेचलिंगविधयाबोधकत्वेनतदभावात् इत्थंचदृष्टांततयाक्रियाविशिष्टस्यार्थबोधकत्वंवर्ण्यमानंनिदर्शनेतिपर्यवसितंनत्वयेदित्य
त्रबोधनस्यावर्णनात्कथमुदाहरणत्वमतआह तत्रेति उदाहरणइत्यर्थः लक्ष्येलक्षणंसंगमयति ततश्चेति बोधनस्यगम्यमानत्वाच्चेत्यर्थः
दृष्टांतभूतयेति दृष्टांतेस्वस्मिन्भूतयाविद्यमानयेत्यर्थः दृष्टांतोभूतःसंजातोययेतिवा एवं तमोवत् चंद्रस्यापिराजत्वंसोमोवैब्राह्मणानांराजे-
त्यादिश्रुतिप्रसिद्धं अनिष्टपर्यवसायिनमर्थं नाशरूपानिष्टसाधनंराजविरुद्धत्वरूपमर्थं ॥ ७

उन्नतमिति योलघुरल्पबुद्धिरल्पपरिमाणश्च सः उन्नतं पदं उत्कर्षउच्चस्थानं चावाप्य हेलयैव पतेदिति ब्रुवन्कथयन् शैलशेखरगतो गिरिमस्तकव
र्तीदृषद्गणः जलबिंदुसमूहश्चारुणा मंदेनापि मारुतेन धुतः कंपितः अधः पतति उत्कर्षाद्धीयते अधोदेशे च पततीत्यर्थः ध्रुवमितिपाठे बोधनस्यध्रु
र्ववद्गम्यमानत्वादप्रयोगः दृषत्कण इतिपाठे पाषाणकण इत्यर्थः चूडेति यउदयाचल आगतं देवं रविं चूडामणेः पदे स्थाने मस्तके धत्ते धारय

यथावा उन्नतं पदमवाप्य योलघुर्हेलयैव स पतेदिति ब्रुवन् शैलशेखरगतः दृषद्गणश्चारुमारुतधुतः पतत्यधः अत्र गिरि
शेखरगतो दृष्टिबिंदुगणो मंदमारुतमात्रेणापि कंपितः पतन् लघोरुन्नतपदप्राप्तिः पतनहेतुरित्यसदर्थं बोधयन्निबद्ध इत्यस
दर्थनिदर्शना चूडामणिपदे धत्ते यो देवं रविमागतं सतां कार्यातिथेयीति बोधयन् गृहमेधिनः अत्र समागतं रविं शिरसा संभा
वयन्नुदयानलः स्वनिष्ठयारविधारणक्रियया समागतानां सतामेवं गृहमेधिभिरातिथ्यं कार्यमितिसदर्थं बोधयन्निबद्ध इति सदर्थ
निदर्शना अत्र केचित् वाक्यार्थवृत्तिपदार्थवृत्तिनिदर्शनाद्वयमसंभवद्वस्तुसंबंधनिबंधनमिति तृतीयात्तु संभवद्वस्तुसंबंधनिबं
धनेति च व्यवहरंति

ति किं कुर्वन् गृहमेधिनः गृहस्थान् सता नातिथेयी कार्येति बोधयन् आतिथेयी आतिथ्यं अत्र उक्तनिदर्शनात्र
यविषये केचिदित्यस्येति व्यवहरंतीत्यनेनान्वयः ॥ ६ ६ ६

धर्मिणोरिति धर्मयोः साम्यमात्रेणचमत्कारानिष्पत्तेस्तत्कतबिंबप्रतिबिंबभावेनधर्मिणोः साम्यावगतिरितिभावः गर्भीकरोतीति स्वविशे- षणत्वेनस्वीकरोतीत्यर्थः दृष्टांततयाबोधनस्यैवतत्रविवक्षितत्वात् एतदेवोपपादयति बोधयन्नित्यादिना करीषंशुष्कगोमयंतस्यायंकारी-

तथाहि आद्यनिदर्शनायांवाक्यार्थयोरैक्यमसंभवत्तयोः साम्येपर्यवस्यति द्वितीयनिदर्शनायामपिअन्यधर्मोऽन्यत्रा संभवन्धर्मिणोः साम्येपर्यवस्यति तृतीयनिदर्शनायांतुस्वक्रिययापराप्रतिसदसदर्थबोधनंसंभवदेवसमतांगर्भीकरोति बो धयन्गृहमेधिनइत्यादौहिकारीषोग्निरध्यापयतीतिवत्समर्थाचरणेणिचः प्रयोगः ततश्चयथाकारिषोग्निः शीतापन यनेनबटून ध्ययनसमर्थान्करोति एवंवर्ण्यमानः पर्वतः स्वयमुपमानभावेनगृहमेधिनः उक्तबोधनसमर्थान्कर्तुंक्षमते य थायंपर्वतः समागतंरविंशिरसासंभावयतिएवंगृहमेधीसमागतंसंतमुचितपूजयासंभावयेदिति अतः संभवतिबोधनसंबंधइति

षः समर्थाचरणेसमर्थकरणेसामर्थ्योत्सादनइतियावत् भावप्राधान्यात् उपमानभावेन दृष्टांतत्वेन एवंप्रदर्शितेनिदर्शनात्रयेनिदर्शनापदप्र वृत्तिनिमित्तस्यैकस्याभावान्नानार्थएवनिदर्शनाशब्दइतिबोध्यम् इत्यलंकारचंद्रिकायांनिदर्शनाप्रकरणं ७

व्यतिरेकं लक्षयति व्यतिरेक इति विशेषो वैलक्षण्यं उपमेयस्याधिक्यं उत्कर्षः पल्लवत इति पंचम्यर्थे तसिल् कल्पतरोः पल्लवतः पल्लवादेष वक्ष्यमाणस्ते तव करस्य विशेष इति संबंधः एकः पल्लवः परो हस्तः कर्णराधेयं तिरस्कुरुते दानातिशयेनेति भावः अत्रोपमेयस्य करस्योत्कर्षः पूर्वोदाहरणे उन्नतत्वे नौपम्यं शाब्दं इह तु रक्तत्व कोमलत्वादि प्रयुक्तं तद्गम्यमिति भेदः तन्न्यूनत्वेति उपमेयन्यूनत्वेत्यर्थः

व्यतिरेको विशेषश्चेदुपमानोपमेययोः शैला इवोन्नताः संतः किंतु प्रकृति कोमलाः अयमुपमेयाधिक्य पर्यवसायी व्यतिरेकः यथावा पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते तन्न्यूनत्वपर्यवसायी यथा रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि

रक्तस्त्वमिति अशोकवृक्षं प्रति विरहिणः कस्यचिदुक्तिः हे अशोक आवयोः सर्वं तुल्यं समानं अहं केवलं धात्रा विधात्रा सशोकः शोकसहितः कृतः त्वं तु शोकरहित इत्यशोक पदश्लेषादवगम्यते किं तत्सर्वं समानं तत्राह रक्त इत्यादि त्वं नूतनैः पल्लवैः रक्तः रक्तवर्णः अहमपि प्रियायाः श्लाघनीयैर्गुणैः सौंदर्यादिभिः रक्तोऽनुरक्तः अर्थात्प्रियायां हे सखे त्वां प्रति शिलीमुखा भ्रमरा आयांति मां प्रत्यपि स्मरेण धनुषा मुक्ताः प्रेरिताः शिलीमुखा बाणा आयांति

एवंकांतायाःपादतलस्याघातोयथातवमुदेसंतोषायतद्वत्तथाममापिसंतोषायेत्यर्थः कामिनीपादाघातेनाशोकस्यपुष्पोद्गमइतिकविप्रसिद्धिः अत्रोपमेयस्यसशोकत्वेनापकर्षः अनुभयपर्यवसायी उपमेयोत्कर्षापकर्षान्यतरपर्यवसानरहितः दृढतरेति कृपणस्यकृपाणस्यखड्गस्य च आकारतः दीर्घाऽवर्णात्आकृतेश्चकेवलंभेदोवैलक्षण्यंप्रकारांतरेणतुसाम्यमेवेत्यर्थः कथंतत्राह दृढतरेत्यादि दृढतरंनिबद्धोमुष्टिर्येनेतिकृपणपक्षे धनव्ययवैमुख्येनमुष्टिमोचनाभावात् खड्गपक्षेतुदृढतरंनिबद्धःसंबद्धोमुष्टिर्मुष्टिग्राह्यभागोयस्येत्यर्थः कोशोभांडारगृहं

कांतापादतलाहतिस्तवमुदेतद्वन्ममाप्यावयोःसर्वंतुल्यमशोककेवलमहंधात्रासशोकःकृतः अनुभयपर्यवसायी यथा दृढतरनिबद्धमुष्टेःकोशनिषण्णस्यसहजमलिनस्य कृपणस्यकृपाणस्यचकेवलमाकारतोभेदः

तत्रनिषण्णउपविष्टः कृपणःकोशेपिधानकेनिषण्णःस्थितइतिखड्गपक्षे सहजमलिनःस्वभावमलिनः मलिनवेषत्वात्कृपणःखड्गस्तुकृष्णवर्णत्वादिति एवंचकिंचिद्धर्मप्रयुक्तसाम्यवत्तयाप्रतीयमानयोःकिंचिद्धर्मप्रयुक्तवैलक्षण्यंव्यतिरेकशरीरं वैलक्षण्यंतु क्वचिदुपमेयस्योत्कर्षेक्वचिच्चतदपकर्षेपर्यवसन्नं क्वचित्तुतदन्यतरपर्यवसानविरहेपिस्ववैचित्र्यविश्रांतमात्रमितिबोध्यं एतेनचरमभेदइयतदुदाहरणदूषणंकस्यचिदापातरमणीयमिवभासमानंप्रत्युक्तंवेदितव्यं अत्यंतासारतयातुनानुवादमर्हतीत्युपरम्यते इत्यलंकारचंद्रिकायांव्यतिरेकप्रकरणं

७

सहोक्तिरिति लक्ष्यनिर्देशः सहभावइत्यादिलक्षणं सहभावः साहित्यं जनरंजनः सहृदयजनाल्हादकः एवंचमत्कृतिजनकं साहित्यं सहोक्तिरि तिलक्षणं दिगंतमिति तस्यराज्ञः कीर्तिः प्रत्यर्थिभिः शत्रुभिः सहदिगंतमगमदित्यन्वयः अत्रच तृतीयायानिरूपितत्वार्थकतया प्रत्यर्थिनिरू-

सहोक्तिः सहभावश्चेद्भासतेजनरंजनः दिगंतमगमत्तस्यकीर्तिः प्रत्यर्थिभिः सह यथावा छायासं श्रयतेतलंविटपिनांश्रांतेवपांथैः समंमूलं यातिसरोजलस्यजडताग्लानेवमीनैः सह आचामत्यहिमां शुदीधितिरपस्तप्तेवलोकैः समंनिद्रागर्भगृहंसहप्रविशतिक्लांतेवकांताजनैः जनरंजन इत्युक्तेरनेन सार्द्धविहरांबुराशेरित्यादौनसहोक्तिरलंकारः विनोक्तिश्चेद्विनाकिंचित्प्रस्तुतंहीनमुच्यते विद्यावृ द्यापिसावद्याविनाविनयसंपदं यथावा यश्चरामंनपश्येत्तुयंचरामोनपश्यति निंदितः सभवेल्लोके स्वात्माप्येनंविगर्हते अत्रचरामदर्शनेनविनाहीनत्वंविनाशब्दमंतरेणैवदर्शितं

पितसाहित्यवती कीर्तिर्गमनाश्रयइ

तिबोधे एकधर्मान्वयित्वरूपसाहित्यबलात्प्रत्यर्थिनामपिगमनान्वयप्रतीतिः तदुक्तं सासहोक्तिः सहार्थस्यबलादेकंद्विवाचकमिति छायेति

ग्रीष्मर्तौ मध्याह्नवर्णनमिदं छायापांथैरध्वगैः समं सार्धं विटपिनां तरूणां तलं मूलप्रदेशं संश्रयते कुत इत्याकांक्षायामुत्प्रेक्षते श्रांते वेति श्रमश्चात्रातपा
तिशयहृतो बोध्यः एवमग्रेऽपि जडता शीतलता ग्लानेव सरोजलस्य मूलमधोदेशं मीनैर्मत्स्यैः सह याति गच्छति ग्लानिर्बलापचयः तथा अहिमाउ
ष्णा अंशवः करा यस्यैवंभूतस्य रवेर्दीधितिस्त्समेव संतप्तेव सती लोकैः समं अपः जलानि आचामति पिबति दीधितिः स्त्रियामित्यमरः निद्राक्लां
तेव सती कांता जनैः सह गर्भगृहं अभ्यंतरगृहं प्रविशतितत्रैव तदुद्भवात् क्लांतिस्तेजोहानिः सौकुमार्यातिशयेन तत्सौलभ्यात्कांतोपादानं
इत्यादाविति इंदुमतीस्वयंवरे रघुवंशे अनेनसार्द्धं विरहांबुराशेस्तीरेषु तालीवनमर्मरेषु द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरु
द्भिरिति पद्यं अत्र सहोक्तिरन्वमत्कारित्वान्नालंकाररूपेत्यर्थः इत्यलंकारचंद्रिकायां सहोक्तिप्रकरणं विनोक्तिरिति किंचि
द्विनाप्रस्तुतं वर्ण्यहीनं दुष्टमुच्यते चेत्तदा विनोक्तिर्नामालंकार इत्यर्थः विद्येति विनयसंपत्तिं विना या विद्या सा त्वद्यामनोहरापि दुष्टेत्यन्वयः अत्रप्र
स्तुताया विद्याया विनयं विना दुष्टत्वमुक्तं यश्चेति यः पुरुषः स्वात्मा स्वांतःकरणं विगर्हते निंदति रामदर्शनं विनेति रामकर्मकं रामकर्तृकं च दर्श
नं विनेत्यर्थः अंतरेणापीति विनापीत्यर्थः तथा च विनोक्तिरित्यर्थग्रहणं न तु शब्दग्रहणमिति भावः ७ ७

प्रकारांतरमाह तच्चेदिति तत्प्रस्तुतं किंचिद्विनारम्यं चेत्सापि विनोक्तिः कथ्यत इत्यन्वयः इत्थं च किंचिद्व्यतिरेकेण प्रस्तुतस्य रम्यत्वारम्यत्वान्यतरवर्णनं विनोक्तिरिति प्रकारद्वयसाधारणं सामान्यलक्षणं बोध्यं यत्तु लद्वयो विनार्थसंबंध एव विनोक्तिः तद्वयत्वं च विनाकृतस्य वस्तुनो रमणीयत्वारमणीयत्वाभ्यां भवतीत्यर्वाचीनैरुक्तं तदयुक्तं कारणं विना कार्योत्पत्तिकथनरूपे विभावनालंकारेतिव्याप्तेर्वारणाय विनार्थसंबंधप्रयुक्तप्रस्तुतगतरमणीयत्वादेरपि लक्षणे निवेशस्यावश्यकत्वादिति आविर्भूतइति मानवतीविषये नायकस्य परामर्शोयं इयं वरतनुरंतः अंतःकरणे मोहेन मानावेशेन मुक्तकल्या

तच्चेत्किंचिद्विनारम्यं विनोक्तिः सापि कथ्यते विना खलैर्विभात्येषा राजेंद्र भवतः सभा यथावा आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा मोहेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगा रोधःपतनकलुषा गृह्णतीव प्रसादं अत्र तमःप्रभृतीन्विना निशादीनां रम्यत्वं विनाशब्दं तरेण दर्शितं

ईषत्न्यून मुक्ता लक्ष्यते केव पूर्वं रोधसस्तटस्य पतनेन कलुषा अनंतरं कालुष्यापगमात्प्रसादं नैर्मल्यं गृह्णती आश्रयंतीगंगेव तथा शशिनि चंद्रे आविर्भूते उदिते सति तमसा मुच्यमाना रात्रिरिव एवं छिन्नो नष्टः भूयिष्ठो धूमो यस्या एवंभूता निशि भवस्य हुतभुजो वह्नेरर्चिः शिखेवेति दर्शितमिति अर्थतो बोधितमित्यर्थः इत्यलंकारचंद्रिकायां विनोक्तिप्रकरणं ॥ ६९

(61)

समासोक्तिं लक्षयति समासोक्तिरिति प्रस्तुते वर्ण्यमाने अप्रस्तुतस्य अप्रस्तुतवृत्तांतस्य परिस्फूर्त्तिश्चेत्तदा समासोक्तिरित्यन्वयः अयमिति इंद्रस्येयमैंद्री प्राची मुखमादिभागः वदनं च रक्तो रक्तवर्णः अनुरक्तश्च चुंबनं संबंधः वक्त्रसंयोगविशेषश्च यथाश्रुतलक्षणस्य वक्ष्यमाणे असावुदयमारूढः कांतिमान्रक्तमंडलः राजा हरति सर्वस्य हृदयं मृदुलैः करैरित्यादिप्रकृताप्रकृतश्लेषेऽतिव्याप्तेराह विशेषणसाम्यबला

समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः यत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तुतवृत्तांतस्यापि परिस्फूर्त्तिस्तत्र समासोक्तिलंकारः

दिति विशेषणमात्रसाम्यबलादित्यर्थः एवं च विशेषणमात्रसाम्यगम्याप्रस्तुतवृत्तांतत्वं लक्षणं बोध्यं उदाहृतश्लेषे चाप्रकृतनृपवृत्तांतस्य विशेष्यवाचिनाश्लिष्टेन राजपदेनाप्यवगमान्नातिव्याप्तिः संज्ञाप्रवृत्तिनिमित्तमवयवार्थं दर्शयति आः ६

समासेनेति वचनात् प्रतिपादनात् लक्ष्ये लक्षणं संगमयति अत्रेति प्रारंभः आदिभागः साधारण्यात् श्लिष्टत्वात् यद्यपि चुंबतीत्यत्र न श्लेषस्तथाप्यर्थै-
क्यबोधकत्वमात्रेण तस्य साधारण्योक्तिः उपस्कृतादिति साधारण्यादित्यस्य विशेषणं तत्र चंद्रमः शब्दगतेन पुल्लिंगेन नायकत्वाभिव्यक्त्या उपस्कृ-

समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तांतयोर्वचनात् उदाहरणमयमैंद्रीति अत्र हि चंद्रस्य प्राचीप्रारंभलक्षणमुखसंबंध-
लक्षणे उदये वर्ण्यमाने मुखशब्दस्य प्रारंभवदनसाधारण्यात् रक्तशब्दस्यारुणकामुकसाधारण्यात् चुंबतीत्यस्य प्रस्तु-
तार्थसंबंधमात्रपरस्य शक्यार्थांतरसाधारण्याच्च चंद्रमः शब्दगतपुल्लिंगेन ऐंद्रीशब्दगतस्त्रीलिंगेन तत्प्रतिपाद्येंद्रसं-
बंधित्वेन चोपस्कृतादप्रस्तुतपरवनितासक्तपुरुषवृत्तांतः प्रतीयते यथा वा व्यावल्गत्कुचभारमाकुलकचं व्यालोलहा-
रावलि प्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदि वक्त्रांबुजं शश्वद्दत्तकरप्रहारमधिकश्वासं रसादेतया यस्मात्कंदुक सादरं सु-
भगया संसेव्यसे यत्कृती अत्र कंदुकवृत्तांते वर्ण्यमाने व्यावल्गत्कुचभारमित्यादिक्रियाविशेषणसाम्यात् विपरीतरता-
सक्तनायिकावृत्तांतः प्रतीयते पूर्वत्र विशेषणानि श्लिष्टानि इह साधारणानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते ७

रः ऐंद्रीति स्वरूपपरं तद्गतेन स्त्रीलिंगेन तदर्थस्य नायिकात्वाभिव्यक्त्या ऐंद्रीशब्दप्रतिपाद्येनेंद्रसंबंधित्वेन च परकीयत्वाभिव्यक्त्येति बोध्यं वृत्तां-

कुवल० ६२

तः व्यवहारोमुखचुंबनरूपः व्याबल्गादिति नायिकानुरक्तस्यकस्यचित्क्रीडालंबनंकंदुकंप्रत्युक्तिरियं हेकंदुकसुभगयासुंदर्याएतयानायिक
यारसात्प्रीतिविशेषात्सादरमादरसहितंयथास्यात्तथायत्यस्मात्संसेव्यसेतत्तस्मात्त्वकृतीधन्योसीत्यन्वयः कथमित्याकांक्षायांसंसेवनक्रियांविशि
नष्टिव्यावल्गादित्यादिना व्यावल्गात्विशेषतआसमंताच्चलन्कुचभारोयत्रतथा आकुलाःक्रीडावेशेनेतस्ततःपर्यस्ताःकचाःकेशायत्र ए
वंव्यालोलादोलायिताहारावलिर्यत्र तथाप्रेंखद्भ्यांचंचलाभ्यांकुंडलाभ्यांशोभायुक्तंगंडयुगलंयत्र एवंप्रस्वेदयुक्तंवक्त्रांबुजंयत्र शश्व
न्निरंतरंदत्तःकरेणप्रहारोयत्र तथाअधिकःश्वासोयत्र तथेतिवृत्तांतः विपरीतरतरूपः अत्रापिकंदुकशब्दगतपुल्लिंगेननायकत्वाभिव्य-
क्तिर्बोध्या श्लिष्टानीति श्लेषमूलकाभेदाध्यवसायविषयाणीत्यर्थः साधारणानीति श्लेषंविनैवप्रकृताप्रकृतवृत्तांतयोरनुगतानीत्यर्थः
तथाचलक्षणेसाम्यशब्देनश्लेषकृतंस्वारसिकंचसाम्यंविवक्षितमितिभावः सारूप्यात् सादृश्यात् ७ ७

चं०टी०

पुरेति उत्तरचरिते सीतात्यागानंतरं कदाचिद्वनं प्रतिगतस्य भगवतो रामचंद्रस्येयमुक्तिः पुरा वनवासकाले सरितां नदीनां स्रोतः प्रवाहो यत्र प्रदेशे आसीत्तत्राधुना पुलिनं अस्तीति शेषः तथा क्षितिरुहां तरूणां घनविरलभावः विपर्यासं वैपरीत्यं यातः प्राप्तः सांद्राणां विरलता विरलानां शाखापल्लवादिवृद्ध्या सांद्रता जातेत्यर्थः तथा च बहोर्भूयसः कालादनंतरं दृष्टमिदं वनपरमन्यदिव मन्ये परंतु शैलानां पर्वतानां निवेशः विन्यासवि

यथा वा पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति अत्र वनवर्णने प्रस्तुते तत्सारूप्यात् कुटुंबिषु धनसंतानादिसमृद्ध्यसमृद्धिविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तांतः प्रतीयते अत्र च प्रस्तुताप्रस्तुतसाधारणविशेषणबलात्सारूप्यबलाद्वाः प्रस्तुतवृत्तांतस्य प्रत्यायनं तत्प्रस्तुते विशेष्ये तत्समारोपार्थं सर्वथैव प्रस्तुतानन्वयिनः कविसंरंभगोचरत्वायोगात् ततश्च समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः

शेषः तदेवेदं वनमिति बुद्धिं प्रत्यभिज्ञारूपां द्रढयति दृढीकरोतीत्यर्थः तत्सारूप्यादिति वनसादृश्यादित्यर्थः ग्रामादेः किं वनसादृश्यमित्याकांक्षायां तद्गर्भं विशेषणमाह कुटुंबिष्वित्यादि कुटुंबिषु कुटुंबिगतो यो धनसमृद्ध्य

समृद्ध्योर्विपर्यासस्त्वं प्राप्तस्येत्यर्थः तत्समाश्रयस्य तादृशकुटुंबिसमाश्रयस्य तथाचसमृद्ध्यसमृद्धिविपर्यासवदाश्रयत्वंसादृश्यमितिभावः किम
स्यसादृश्यस्योपस्थापकमितिचेत् घनविरलेतिविपर्यासमितिच ताभ्यामुक्तसादृश्यगर्भीकरणात् एतेनैषासादृश्यगर्भविशेषणोत्थापितसादृश्यमूला
समासोक्तिरितिमूलग्रंथानवबोधस्तद्विरोधश्चेतिदूषणमलग्नकंवेदितव्यं अथात्राप्रस्तुतवृत्तांतस्यविशेषणसाम्यगम्यत्वाभावादुक्तलक्षणस्याव्याप्ति
रितिचेन्न विशेषणसाम्यगम्यसादृश्यगम्यत्वेपिविशेषणसाम्यगम्यत्वानपायात् प्राधान्यात्तुपरंसारूप्यस्यगमकत्वोपदर्शनंसारूप्यादितिग्रंथेन एवम
ग्रेपिविशेषणसाम्यात्सादृश्याद्वेतिविकल्पोक्तिरपिप्राधान्याभिप्रायैवेतिनिरवद्यं एवमलंकारंनिरूप्यतद्बोधप्रकारमुपदर्शयितुंभूमिकामारचयति अत्रचे
ति अत्र एषुउदाहरणेषु अप्रस्तुतवृत्तांतस्येति अप्रकृतजारादिसंबंधिनश्चुंबनादिव्यवहारस्येत्यर्थः विशेष्येचंद्रादौ सर्वथा आरोपानारोपान्य
तरविधया प्रस्तुतानन्वयिनः प्रकृतान्वयशून्यस्य यद्वासर्वथैवेत्यस्यकवीत्यादिनान्वयः कविसंरंभेति स्वप्रतीत्युद्देश्यकशब्दसंदर्भरूपकवि
व्यापारेत्यर्थः ::::::

७ ७ ७

अप्रस्तुतवृत्तांतस्यचुंबनादेरिवाप्रस्तुतस्यजारादेरपिचंद्रादौसमारोपइतिमतंनिराकरोतिनत्विति अप्रस्तुतरूपेतिअप्रस्तुतस्वरूपेत्यर्थः कु तस्तत्राह मुखमित्यादि तादात्म्येनचंद्रारोपेतादात्म्यस्यापिसंसर्गविधयाआरोपविषयत्वात्तस्यचचंद्रत्वानतिरेकाच्चंद्रत्वारोपेत्युक्तिः नतु प्रकारतयाचंद्रत्वारोपउक्तइति भ्रमितव्यं चंद्रइतिशब्देनचंद्रविशेषणत्वेनोपस्थितस्यचंद्रत्वस्यमुखे विशेषणतयाऽरोपासंभवात् एवं

नतुरूपकइवप्रस्तुतेअप्रस्तुतरूपसमारोपोस्ति मुखंचंद्रइत्यत्रमुखेचंद्रत्वारोपहेतुचंद्रपदसमभिव्याहारवत्तूरक्तश्चुं-बतिचंद्रमाइत्यादिसमासोक्त्युदाहारणेचंद्रादौजारत्वाद्यारोपहेतोस्तद्वाचकपदसमभिव्यवहारस्याभावात् निरीक्ष्यवि द्युन्नयनैःपयोदोमुखं नि शायामभिसारिकायाः धारानिपातैःसहकिंनुवांतश्चंद्रोयमित्यार्ततरंररासेइत्येकदेशविव र्तिरूपकोदाहरणइवप्रस्तुतेअप्रस्तुतरूपसमारोपगमकस्याप्यभावात् जारत्वेत्यत्रापिबोध्यं तद्वाचकेति जारवाचकेत्य र्थः ननुजारादिपदसमभिव्याहाराभावात्श्रोतारोपासंभवेप्यार्थोजाराद्यारोपोस्तुनहितत्रापितादृशसमभिव्याहारोहेतुःरूपकध्वनेरुच्छे दापत्तेरित्याशंक्याह निरीक्ष्येति पयोदोमेघोविद्युत्स्वरूपैर्नयनैर्निशायामभिसारिकायामुखंवीक्ष्यधारानिपातैःसहवांतः किंत्वयंचंद्रइतिम-त्वाआर्ततरंयथास्यात्तथाररासेआक्रंदनंकृतवानित्यर्थः उदाहरणइवेतिव्यतिरेकदृष्टांतः अत्रयथाममकमस्तितादृशस्यसमासोक्त्युदाहरणे

६५

अभावादित्यर्थः तथाचार्थारोपोप्यनाशंक्य इति भावः ननुविद्युन्नयनैरित्यत्रकिमप्रस्तुतारोपगमकं यद्भावात्समासोक्तो तदभावइत्यनोगमकंद
र्शयितुमाह नत्रेति आनुगुण्यात् आनुकूल्यात् उपमितसमासस्यपूर्वपदार्थप्रधानतया नयनसदृशविद्युत्करणकत्वस्य निरीक्षणेऽसंभवात्
प्रतिकूलत्वमितिभावः अनुक्तमपि अश्रौतमपि रूपणंआरोपः नचेहेति इहसमासोक्त्युदाहरणे तथानिरीक्षणवत् नयनकरणकनिरीक्ष

तत्रहि विद्युन्नयनैरित्यत्रनिरीक्षणानुगुण्यादुत्तरपदार्थप्रधानरूपमयूरव्यंसकादिसमासव्यवस्थितावुत्तरप
दार्थभूतनयनान्वयानुरोधात् पयोदेअनुक्तमपिद्रष्टृपुरुषत्वरूपणंगम्यमुपगम्यते नचेहतथानिरीक्षणवत्
त्वय्यागतेकिमितिवेपतएषसिंधुरितिश्लोकेसेतुकृत्वादिवच्चाप्रस्तुतासाधारणवृत्तांतउपात्तोस्ति नापिश्लिष्ट
साधारणादिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तांतयोरप्रस्तुतवृत्तांतस्य विद्युन्नयनवत्प्राधान्यमस्ति ६

णवत् सेतुकृत्वादीत्यादिनामथनकारित्वपरिग्रहः नन्विहापिपरनायिकामुखचुंबनरूपस्याप्रस्तुतवृत्तांतस्याप्रस्तुतासाधारण धर्मत्वाद्प्रस्तुतारो
पगमकत्वंस्यादित्याशंक्यपरिहरति नापीति साधारणादीत्यादिनासादृश्य गर्भविशेषणसंग्रहः वृत्तांतयोरितिनिर्धारणषष्ठी वृत्तांतयोर्मध्येइत्य
र्थः विद्युन्नयनवदिति प्रस्तुताप्रस्तुतयोर्विद्युन्नयनयोर्मध्येयथानयनस्यउत्तरपदार्थप्रधानसमासात् प्राधान्यंतथानास्तीत्यर्थः

सेतुमंथक्कदितिपाठः सेतुबंधक्वदितित्वपपाठः कथंचिदर्थतोऽनुवादत्वेनव्याख्येयः उपसंहरति तस्मादिति मात्रपदेनाप्रस्तुतारोपव्यवच्छेदः वि
धुन्वयनवत्समासक्वनश्रौतप्राधान्याभावेपिविशेषणसामर्थ्यावगतस्याप्रस्तुतवृत्तांतस्यार्थतः प्राधान्यमस्तीतिशंकते यद्यपीति नन्वप्रस्तुत
वृत्तांत्ताभिन्नत्वेनावगतस्यप्रस्तुतवृत्तांतस्यप्रस्तुतविशेष्येणान्वयात्कथमप्रस्तुतवृत्तांतस्यप्राधान्यमितिशंकानिरासायाह विशेष्येणैवेति ननु

येनतदनुरोधात्तत्वंसेतुमंथक्कदित्यत्रेवप्रस्तुतेनुक्तमप्यप्रस्तुतरूपसमारोपमभ्युपगच्छेम तस्माद्वि
शेषणसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिहचारुताहेतुः यद्यपिप्रस्तुताप्रस्तुतवृत्तांतयोरि
हश्लिष्टसाधारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिवविशेष्येणैवसाक्षादन्वयाद
स्तिसमप्राधान्यं तथाप्यप्रस्तुतवृत्तांत्तान्वयानुरोधान्नप्रस्तुतेअप्रस्तुतरूपसमारोपोंगीकार्यः

तद्विशेषणीभूतप्रस्तुतवृत्तांतेनेत्येवकारार्थः समाधत्ते तथापीति अयमाशयः नात्रश्लिष्टादिविशेषणैःसमर्पितः परनायिकामुखचुंबनादिरू
पोऽप्रस्तुतवृत्तांतः प्रागेवकयापियुक्त्याप्रस्तुतगतत्वेनभासते यद्बलादप्रस्तुतजाराद्यारोपावगतिःस्यात् अपितुताटस्थ्येनावगतेतस्मिन्प्र
स्तुतासंबद्धस्यकविसंरंभगोचरत्वायोगात्प्रस्तुतसमारोपितत्वेनपर्यवसानमिति

कुवल॰ ६५

नन्वेवं तर्हि प्रस्तुतवृत्तांतस्याप्यप्रस्तुतवृत्तांताश्रये धर्मिण्यन्वयोस्तु असंबद्धाभिधानप्रसंगपरिहारस्य तुल्यत्वादित्याशंक्याह तथाहीत्यादि एवंचेत्य

तथाहि यथा प्रस्तुतविशेष्येऽप्रस्तुतवृत्तांतस्यान्वयायोग्यता तथैवाप्रस्तुतेपि जारादौ नास्ति प्रस्तुतवृत्तांतस्यान्वययोग्यता एवंच सम प्रधानयोः प्रस्तुताप्रस्तुतवृत्तांतयोरन्यतरस्यावश्यमारोपेभ्युपगंतव्ये श्रुत एव प्रस्तुतेऽप्रस्तुतस्यारोपश्चारुताहेतुरितियुक्तं नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्य गम्यत्वं समासोक्तिः विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनां अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यत इत्यादीनि प्राचीनानां समासोक्तिलक्षणानि न संगच्छेरन् प्रस्तुतेऽश्लिष्टसाधारणादिविशेषणसमर्पितानुरागपूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तांतसमारोपमात्रस्य चारुताहेतुत्वाभ्युपगमेन विशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यंजनानपेक्षणादिति चेत् उच्यते स्वरूपतोऽप्रस्तुतवृत्तांतस्यारोपो न चारुताहेतुः किंत्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्य तस्यारोपः तथाभूतस्यैव रसानुगुणत्वात्

त्यनारूपविनिगमकविरहे च मास्तु तर्हि कस्याप्यन्वयस्तत्राह अवश्यमिति अन्यथाऽसंबद्धाभिधानप्रसंगापत्तेरिति भावः किं तर्हि विनिगमकं तत्राह श्रुत एवेति तथा च श्रुतप्रस्तुतार्थोपस्कारकतया चमत्कारहेतुत्वमेव विनिगमकमिति भावः अप्रस्तुतस्य अप्र

स्तुतवृत्तांतस्य नन्वेवमिति एवमप्रस्तुतसमारोपानंगीकारे विशेषणानामित्यादि विद्यानाथोक्तं लक्षणं प्रस्तुतवर्तिनां विशेषणानां साम्येनेत्यः न्वयः प्रस्तुते समारोपार्थं अप्रस्तुतधर्मिव्यंजनानपेक्षायामपि समारोप्यमाणवृत्तांतविशेषणत्वार्थे तदपेक्षणान्न लक्षणासंगतिरित्याह खलु पत इत्यादि स्वरूपतः अप्रस्तुतसंबंधित्वेनाज्ञायमानस्य नन्वपेक्षासत्वेपि विशेषणसाम्यस्य तद्व्यंजनासामर्थ्याल्लक्षणासंगतिताद्वस्थ्यमि

नचतावदवगमने विशेषणपदानां सामर्थ्यमस्ति अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वदनचुंबनादिना तत्संबंधिनि कामुकादावभिव्यक्ते पुनस्तदीयत्वानुसंधानं तत्र भवति यथा स्वरूपतो दृष्टे नराजाश्वादिना तत्संबंधिनि राजादौ स्मा रिते पुनरश्वादौ तदीयत्वानुसंधान मिति विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यास्त्यपेक्षा अतएव श्लिष्ट विशेषणायामिव साधारणविशेषणायामप्यप्रस्तुतव्यवहारसमारोप इत्येव प्राचीनानां प्रवादः कंदुके व्यावल्गत्कुचभा रत्वादिविशिष्टवनितासेव्यत्वस्य कामुकसंबंधित्वेनैव समारोपणीयत्वात्

त्याशंक्य साक्षादसामर्थ्येपि वृत्तांताभिव्यक्तिद्वारा तत्सं भवान्न दोष इत्याह नचेत्यादि तदीयत्वानुसंधानं कामुकसंबंधित्वानुसंधानं तत्र मुखचुंबनादौ अनुसंधानं तद्वदिति पाठः अनुसंधानव दिति पाठे यथेत्यस्यासंगतेः अतएव अप्रस्तुतव्यंजनस्यापेक्षणादेव नन्वप्रस्तुतधर्मिव्यंजनानपेक्षणे ईदृशः प्रवादः कुतो न युक्तस्तत्राह कंदुक इति

८८

विशिष्टत्वस्यसेव्यत्वेनान्वयः संबंधित्वेनैवेत्येचकारोक्तमेवार्थंसोपपत्तिकमाह स्वरूपतइति अप्रस्तुतकामुकसंबंधित्वानालिंगित रूपेणेत्यर्थः तथाचारोपासंभवात्तादृशप्रवादानुपपत्तिरितिभावः श्लिष्टविशेषणायामयमैंद्रीत्यादौमुखचुंबनादेः स्वरूपतोप्यारोपस्यैवस-त्वात्साधारणविशेषणायामुपष्टंभकत्वेनप्रवादोपन्यासः ननुतत्रापितादृशवनितासेव्यत्वस्यतादृशवनिताकृतविपरीतरतपात्रस्वरूपस्याप्रस्तुतवृत्तांतरूपस्यस्वरूपतोप्यारोपस्यैवसंभवान्नतादृशप्रवादानुपपत्तिरतआह किंचेति युक्तमिति वत्सामान्यादितरेपुतथात्वमितिन्याया

स्वरूपतः कंदुकेपितस्यसत्वेनासमारोपणीयत्वात् किंचसारूप्यनिबंधनत्वेनोदात्ततायांसमासोक्तावप्रस्तुतवृत्तांतस्याश ब्दार्थस्याप्रस्तुतवृत्तांतरूपेणैवगम्यतया तेनरूपेण तत्रसमारोपसिद्धेः अन्यत्रापितथैवयुक्तमितियुक्तमेवप्राचीनानांल क्षणमितिविभावनीयं

दितिभावः लक्षणमितिजातावेकवचनं तदेवमुक्तरीत्याः यमैंद्रीमुखंपश्यरक्तश्चुंबतिचंद्रमाइत्यत्रशक्तिव्यंज नाभ्यांप्राचीप्रारंभसंबंधाश्रयश्चंद्रोजारसंबंधिसानुरागपरनायिकामुखचुंबनाश्रयइतिबोधः अप्रस्तुतवृत्तांताभिन्नत्वेनाध्यवसितस्यप्रस्तुत वृत्तांतस्यतादात्म्येनाप्रस्तुतारोपविषयेप्रस्तुतधर्मिण्यन्वयइतिमतेतुसानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयोगाश्रयोजाराभिन्नश्चं द्रइतिबोधः एवमुदाहरणांतरेप्यनेनैवप्रकारेणबोधप्रकाराऊहनीयाः इत्यलंकारचंद्रिकायांसमासोक्तिप्रकरणं ७

गुणीभूतव्यंग्यमनेदभूत्समासोक्त्यलंकारप्रसंगात्तद्भेदं परिकरालंकारं लक्षयति अलंकारइति अलंकारत्वोक्तीर्तनंच दोषाभावेनैवगतार्थत्वभि
तिशंकानिरासार्थं तत्प्रपंचनंचाग्रेकरिष्यते साभिप्राये प्रकृतार्थोपपादकार्थविषयकाभिप्रायपूर्वकं तथाभूतार्थव्यंजकइतियावत् इत्थंच प्रकृता
र्थोपपादकार्थव्यंजकविशेषणत्वंलक्षणंबोध्यं ध्वनावतिव्याप्तिवारणाय प्रकृतार्थोपपादकेति हेत्वलंकारवारणायबोधकत्वंविहाय व्यंजकत्वनि

अलंकारः परिकरः साभिप्राये विशेषणे सुधांशुकलितोत्तंसस्तापंहरतुवः शिवः
अत्रसुधांशुकलितोत्तंस इति विशेषणंतापहरणसामर्थ्याभिप्रायगर्भं ६

वेशः वक्ष्यमाणपरिकरांकुरालंकारवारणाय विशेषणेति तत्रतु विशेष्यं तथेति नातिप्रसंगः सुधांश्विति सुधांशुनाकलितः कृतउत्तंसः शेख
रोयेनस इति हरविशेषणं उत्तंसः कर्णपूरेस्यात् शेखरेचावतंसवदितिविश्वः सामर्थ्याभिप्रायं सामर्थ्यव्यंजकं ६

६

कुवल०
६७

तवेति इंद्रंप्रतिकामस्योक्तिः तवप्रसादात्कुसुमायुधोप्यहंमधुंवसंतमेवैकंमुख्यंसहायंलब्ध्वापिनाको धनुर्विशेषः पाणौयस्यतादृशस्यापिहर स्यधैर्यच्युतिंधैर्यस्खलनंकुर्यां अन्येधन्विनोधनुर्धराममपुरःके अगणनीयाइत्यर्थः कुसुमायुधइतिविशेषणंचेत्यन्वयः अर्थलभ्येति कुर्या मित्युत्तमपुरुषाक्षिप्तेत्यर्थः अभिप्रायगर्भं अभिप्रायपूर्वकं अतएवावयवार्थमात्रविश्रांतत्वाद्धरपदेननपौनरुक्त्यमपि सर्वेति सर्वेषामशुची

चं०

यथावा तवप्रसादात्कुसुमायुधोपिसहायमेकंमधुमेवलब्ध्वा कुर्यांहरस्यापिपिनाकपाणेर्धैर्यच्युतिं केममधन्विनोऽन्ये अत्रपिनाकपाणेरितिहरविशेषणंकुसुमायुधइत्यर्थलभ्याहमर्थविशेषणंचसारासा रायुधत्वाभिप्रायगर्भं यथावा सर्वाशुचिनिधानस्यकृतघ्नस्यविनाशिनः शरीरकस्यापिकृतेमूढाः पापानि कुर्वते अत्रशरीरविशेषणानितस्यहेयत्वेनासंरक्षणीयत्वाभिप्रायगर्भाणि ७ ७

नांरक्तपूयरेतोविण्मूत्रादीनांनिधानस्यस्थानभूतस्य कृतघ्नस्य उत्तमान्नपानादिकृतोपकारनाशकस्य शरीरकस्येतिनिंदायांकप्रत्ययःकृते त दर्थं तत्संरक्षणार्थमितियावत् विशेषणानिपूर्वार्धोक्तानि तस्य शरीरस्य ७ ७ ६७

व्यास्थमिति राजानंप्रतिकवेरुक्तिः हे देवराजन् त्वद्गुणानां वृंदस्य समूहस्य वर्णनं कर्तुमहं कथं शक्नुयां शक्तो भवेयमित्यन्वयः कुतस्तत्राह यतो हं एकरूपतयास्थितं वेदसमूहं न व्यास्थं अनेकशाखारूपेण न विस्तारितवान् तथाच तत्कर्ता व्यासो न भवामीति व्यज्यते एवमग्रेपि वल्मीकतो

व्यास्थं नैकतया स्थितं श्रुतिगणं जन्मी न वल्मीकतो नाभौ नाभवमच्युतस्य सुमहद्भाष्यं च नाभाषिषं चित्रार्थं निव्हह त्कथामचकथं सुत्राम्णिनासंगुरुर्देवत्वद्गुणवृंदवर्णनमहं कर्तुं कथं शक्नुयां अत्र श्रुतिगणं न व्यास्थमित्यादीनि विशेषणा नित्वस्मिन्व्यासाद्यसाधारणकार्यकर्तृत्वनिषेधमुखेन नाहं व्यास इत्याद्यभिप्रायगर्भाणि तत्राद्ययोरुदाहरणयोरेकैकं विशेषणम् समनंतरयोः प्रत्येकं बहूनि विशेषणानि तत्रापि प्रथमोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भा णि पदार्थरूपाणि च द्वितीयोदाहरणे भिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चेति भेदः एतेषु व्यंग्यार्थसद्भावे पि न ध्वनिव्य पदेशः शिवस्य तापहरणे मन्मथस्य कैमुतिकन्यायेन सर्वधन्विधैर्यभंजकत्वे शरीरसंरक्षणार्थं पापमाचरतां मूढत्वेत्वस्य वर्णनीयराजगुणकथनाशक्तत्वे च वाच्य एवोपस्कारकत्वात्

वल्मीकात् जन्माऽस्यास्तीति जन्मी न भवामीति शेषः तथाच नाहं वाल्मी

किरिति अच्युतस्यनाभौनाः भवं नोत्पन्न इत्यनेननाहंचतुर्मुखइति सुमहद्भाष्यंमहाभाष्यंचनाभाषिषंनभाषितवानित्यनेननाहंसहस्रजिह्वःशे
षइति चित्रोविचित्र अर्थोयस्यास्तांबृहत्कथांनअचकथंकथितवानित्यनेननाहंन इत्का शिवोगुणाढ्योवेति सुत्राम्णि इंद्रेगुरुरुपदेशकोनास
मित्यनेननाहं वाक्पतिरितिच व्यज्यते उक्तेषूदाहरणेषुवैलक्षण्यंदर्शयति नत्वेत्यादिना एकैकं एकस्यविशेष्यस्य एकमेवसमनंतरयोः अ
नंतरोक्तयोः प्रत्येकं एकंविशेष्यंप्रति तत्रापि तयोर्मध्येपि एकाभिप्रायगर्भाणि एकार्थाभिप्रायपूर्वकाणि वाक्यार्थैति नव्यास्थमित्यादिनि
षेधवाक्यार्थषट्कस्योक्तरीत्याहेतुत्वेनांतिमवाक्यार्थेविशेषणत्वादितिभावः तेषु उक्तोदाहरणेषुध्वनिव्यपदेशः ध्वनिव्यवहारः तत्रहेतुमाह
तापहरणइत्यादिना तापहरणेइत्यादिसप्तम्यंतचतुष्टयस्यवाच्यइत्यनेनसामानाधिकरण्येनान्वयः उपस्कारकत्वादिति तथाचापरांगरू
पगुणीभूतव्यंग्यभेदत्वान्नध्वनिव्यवहारइतिभावः ॐ

६७ ६७

नन्वेवमपि यथाश्रुतलक्षणस्य निःशेषच्युतेत्यादिध्वनावतिव्याप्तिरित्यत आह अतएवेति वाच्योपस्कारकत्वादेवेत्यर्थः परिकरत्वात् अंगत्वात् तथाच परिकरपदमहिम्ना प्रकृतार्थोपपादकत्वस्य व्यंग्यविशेषणस्य लाभान्नातिव्याप्तिरिति भावः अपुष्टार्थेति भावप्रधानं उक्तत्वादिति अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुःक्रमग्राम्या इत्यादिनाऽलंकारिकैरुक्तत्वादित्यर्थः कथं तर्हि तैरेवास्यालंकारत्वेन कथनमत आह एकनिष्ठेति ता

अतएव व्यंग्यस्य वाच्यपरिकरत्वात्परिकर इति नामास्यालंकारस्य केचित्तु निष्प्रयोजनविशेषणोपादाने अपुष्टार्थत्वदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य दोषाभावमात्रं न कश्चिदलंकारः एकनिष्ठतादृशानेकविशेषणोपन्यासे परं वैचित्र्यविशेषात्परिकर इति अलंकारमध्ये परिगणित इत्याहुः वस्तुतस्त्वनेकविशेषणोपन्यास एव परिकर इति न नियमः श्लेषयमकादिष्वपुष्टार्थदोषाभावेन तत्रैकस्यापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशेषसद्भावात्परिकरोपपत्तेः

दृशेति साभिप्रायेत्यर्थः

दोषाभावेनेति अपुष्टार्थत्वस्य दोषत्वाभावेनेत्यर्थः उद्भटालंकारसंपत्त्या सहृदयवैमुख्यरूपदूषकताबीजाभावादिति भावः विच्छित्तिश्चमत्कृतिः परिकरत्वोपपत्तेः परिकरस्यालंकारत्वोपपत्तेः तत्र दोषस्याप्रसक्त्या विच्छित्तिविशेषस्य तदभावप्रयुक्तत्वासंभवात्तत्प्रयोजकमलंकारत्वमावश्यकमिति भावः ॥ ६ ॥ ६ ॥ ६ ॥

कुवल० यमकस्थलेउदाहरन्ति यथेति निजांदेवतामतिक्रम्ययदियजेत अर्थाद्देवतांतरंपूजयेत् तदाउभयतःलोकद्वयात्च्यवते भ्रंशयतिअघं वं०
६९ पापमपिजुषतेसेवतेप्राप्नोतीतियावत् कानिजादेवतातत्राह वयंवनचताप्रशस्तवनयुक्ते नक्षितिभृतागोवर्द्धनगिरिणैवसदेवतकाःदे

यथा अतियजेतनिजांयदिदेवतामुभयतश्च्यवतेजुषतेप्यघं क्षितिभृतैवसदैवतका
वयंवनवतानवताकिमहिद्रुहा अत्रहिपुरुहूतपूजोद्युक्तान्नंदादीन्प्रतिभगवतःकृष्णस्यवाक्यंगो
वर्धनगिरिरेवचास्माकंरक्षकत्वेनदैवतमितिसएवपूजनीयः नत्वरक्षकःपुरुहूतइत्येवंपरे
वनवतेतिगोवर्द्धनगिरेर्विशेषणंकाननवत्वान्निर्झरादिमत्वाच्चपुष्पमूलफलतृणादिभिरारण्य
कानामस्माकमस्मद्धनानांगवांचायमेवरक्षकइत्यभिप्रायगर्भं ७

वतसहिताः सएवास्माकंदैवतमित्यर्थः अनवता अरक्षकेणअहिद्रुहाइंद्रेण किंप्रयोजनमितिशेषः अहिर्वृत्रासुरः अहिर्वृत्रासु
रेसर्पेइतिविश्वः ७ ७ ७ ६९

नन्वेवं सति तत्रैवालंकारतास्यान्नतु सुधांशुकलितोत्तंस इत्यादावत आह एवमिति विच्छित्तिविशेषेति दोषाभावप्रयुक्तविच्छित्तिव्यावृत्त्यर्थः ननु यमकादावपि तादृशविच्छित्तिविशेषमानाभावः विच्छित्तिसामान्यं तु पर्युदस्तदोषाभावेनाप्युपपन्नं आपत्कालपर्युदस्तस्य मृच्छौचवहीनता दोषस्याभावे नैव तदानीमपि मृच्छौचकर्तुरतिशयाधानमिति नालंकारत्वसिद्धिरित्यत आह अपिचेति भस्मोद्धूलनभद्रमस्तु भवते रु

एवमत्र साभिप्रायैकविशेषणविन्यासस्यापि विच्छित्तिविशेषवशादस्य साभिप्रायस्यालंकारत्वसिद्धौ अन्यत्रापि सुधांशुकलितोत्तंस इत्यादौ तस्यात्मलाभो न निवार्यते अपिच एकपदार्थहेतुकं काव्यलिंगमलंकार इति सर्वसंमतं तद्वदेकस्यापि विशेषणस्य साभिप्रायस्यालंकारत्वं युक्तमेव

द्राक्षमाले भुभं हासो यानपरंपरां गिरिसुताकांतालयालंकृतिः अद्याराधनतोषितेन विभुना युष्मत्स पर्या सुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामह इत्यादौ मोक्षस्य महामोहत्वे सुखालोकोच्छेदित्वं सुखालोकोच्छेदिनीत्येकपदार्थो हेतुरिति काव्यलिंगमलंकारत्वेन यथास्वीकृतं न तु निर्हेतुत्वदोषाभावमात्रतया विच्छित्तिविशेषस्यानुभवसिद्धत्वात्तथेहापीति भावः इत्यलंकारचंद्रिकायां परिकरप्रकरणम् ॐ

छ छ

साभिप्रायइति अत्रविशेषणपदस्थाने विशेष्येतिप्रक्षिप्यपूर्ववल्लक्षणंबोध्यं तच्चपरिकरे अतिव्याप्तिवारणार्थंलक्ष्येलक्षणं संगमयति अत्रं चेति यद्यपिदेवांतरव्यावर्तकतयाचतुर्भुजइतिविशेषणं तथापिनृपादिसाधारणदेवपदशक्तेर्विष्णौनियमनेनविशेष्यप्रतीत्यौपयिकतयाविशेष्यपदत्वमभिमतंबोध्यं असंदिग्धमुदाहरति फणींद्रइति राजानंप्रतिकवेरुक्तिः तवगुणान्वक्तुंफणींद्रःशेषः समर्थइत्यध्याहार्यं एवम्

साभिप्राये विशेष्येतु भवेत्परिकरांकुरः चतुर्णांपुरुषार्थानां दातादेवश्चतुर्भुजः अत्रच तुर्भुजइतिविशेष्यंपुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भं यथावा फणींद्रस्तेगुणान्वक्तुं लिखितुंहैहयाधिपः द्रष्टुमाखंडलःशक्तः क्वाहमेषक्वतेगुणाः फणींद्रइत्यादिविशेष्यपदानि सहस्रवदनाद्यभिप्रायगर्भाणि ७

त्रेपि हैहयाधिपःकार्तवीर्यः आखंडलइंद्रः उभयत्रगुणानित्यनुषज्यते एषःमर्त्यधर्मःअहं क्वतेगुणाः क्वेति क्वशब्दौमहदंतरंसूचयतः सहस्रमुखत्वादीत्यादिनासहस्रबाहुत्वसहस्रनयनत्वयोःसंग्रहः अत्रानेकेषांविशेष्यपदानांतत्तदभिप्रायगर्भत्वंविशेषः इतिपरिकरांकुरप्रकरणं ७

श्लेषं लक्षयति नानार्थेति नानार्थस्य शब्दस्य संश्रयो योजनं श्लेष इति लक्षणं वर्ण्येत्यादि विभागः वर्ण्यं चावर्ण्यं च वर्ण्यावर्ण्ये उभयं च एतत्त्रयाश्रि
तत्त्वाद्विषयद्वयमित्यर्थः सर्वेति सर्वदः समाधवः पायात् यः अगं गोवर्धनपर्वतं गां पृथ्वीं च वराहावतारे धृतवानिति विष्णुपक्षे हरपक्षे तु स उमाध

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः सर्वदो माधवः पायात्स यो गंगामदीधरत् अब्जेन त्वन्मुखं तुल्यं हरिणा
हितसक्तिना उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रकृतानेकवि
षयः अप्रकृतानेकविषयः प्रकृताप्रकृतानेकविषयश्च सर्वदेत्यादिक्रमेणोदाहरणानि तत्र सर्वदो माधव इति स्तोत
व्यत्वेन प्रकृतयोर्हरिहरयोः कीर्तनं प्रकृतश्लेषः अब्जं कमलं अब्जश्चंद्रस्तयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तन
मित्यप्रकृतश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्र समितौ शास्त्रप्रहारोत्थतद्रुधिरस्य सेनापतेरेव वर्णनं प्रकृतमिति
प्रकृताप्रकृतः श्लेषः

वः सर्वदा पायात् यो गंगां धृतवानित्यर्थः हरिणेन मृगेणांकरूपतया आहिता कृता सक्तिः संगो यस्येति चंद्रप
क्षे हरिणा सूर्येणेति कमलपक्षे उच्चरत् शस्त्रपातेरुन्नच्छत् कीलालं रुधिरं यस्य स वाहिनीपतिः सेनापतिः तथा वाहिनीनां नदीनां पतिः समुद्रश्चेति
पक्षे कीलालं जलं समितौ संग्रामे

(7)

त्रातइति येनकरुणायुक्तांतःकरणेनशेहकर्त्तापिअदरोभयभून्यःकाकस्त्रातोरक्षितः नतुहतःसंपवित्रनामा रणेरव्यातःविभूरामोमेशरणम स्त्वित्यर्थः कृष्णपक्षेतु काकोदरःकालियसर्पः पूतनायाराक्षस्यामारणेनरव्यातइतिविशेषः नीतानामिति दयितांप्रतिनायकोक्तिः नवईक्ष णेनेत्रेकमलानांपद्मानांहरिणानांचसदृशेत्सइत्यन्वयः कीदृशानां वनेजले अरण्येच वृद्धिंप्राप्तानां तथालुब्धैर्लोभशीलैर्भूरिभिःशिलीमुखैर्भ्र

यथाचा त्रातःकाकोदरोयेनदोग्धापिकरुणात्मना पूतनामारणरव्यातःसमेस्तुशरणंप्रभुः नीतानामाकुलीभावंलुब्धै भूरिशिलीमुखैः सदृशेवनरूढानांकमलानांत्वदीक्षणे असावुदयमारूढःकांतिमान्रक्तमंडलः राजाहरतिलोकस्यहृद यंमृदुलैःकरैः तत्राद्यस्तोतव्यत्वेनप्रकृतयोःरामकृष्णयोःश्लेषः द्वितीयेउपमानत्वेनाप्रकृतयोःपद्महरिणयोःश्लेषः तृती ये राजाहरतिलोकस्येतिचंद्रवर्णनप्रस्तावेप्रकृतस्यप्रत्यग्रोदितचंद्रस्याप्रकृतस्यनवाभिषिक्तस्यनृपतेःश्लेषः

मरैराकुलीभावंव्याप्ततांनी तानामितिपद्मपक्षे हरिणपक्षेतुलुब्धैर्व्याधैःकर्तृभिर्भूरिशिलीमुखैर्बाणैःकरणभूतैराकुलीभावंन्वपलतांनीतानामित्यर्थः मृगप्रभेदेकमलइतिवि श्वः असाविति उदयंशैलं अभिवृद्धिंच रक्तंरक्तवर्णं अनुरक्तंच मंडलंबिंबंदेशश्च राजाचंद्रोनृपश्च मृदुलैरभिनवैःअल्पैश्चकरैःकिरणैःग्राह्यधनैश्चप्रत्यग्रो दितेति अभिनवोदितेत्यर्थः

ननुप्रकरणेनाभिधाया नियमनादप्रकृतार्थस्य व्यंग्यत्वमेवेति कथं श्लेषइत्याशंक्याह यदिति अलंकारस्येति नचैवं शब्दशक्तिमूलवस्तुध्वनेरुच्छेदइ
तिवाच्यं शनिरशनिश्चनमुच्चैर्निहंतिकुप्यसिनरेंद्रयस्मैत्वं यत्रप्रसीदसिपुनःसभात्युदारोनुदारश्चेत्यत्रशनि विरुद्धरूपे प्रस्तुतेऽशनिशब्देनाभिधयाप्रती
यमानेपिनन्मूलकस्यविरुद्धावपित्वदनुवर्तनार्थमेकं कार्यंकुरुतइति वस्तुध्वनेरशनिशब्दव्यक्तिमूलस्यसंभवात् अलंकारस्येत्यस्योपलक्षण

यदत्रप्रकृताप्रकृतश्लेषोदाहरणेशब्दशक्तिमूलध्वनिमिच्छंतिप्रांचः तत्प्रकृताप्रकृताभिधानमूलकस्योपमादेर
लंकारस्यव्यंग्यत्वाभिप्रायं नत्वप्रकृतार्थस्यैवव्यंग्यत्वाभिप्रायं अप्रकृतार्थस्यापिशक्त्याप्रतिपाद्यस्याभिधेयत्वाव
श्यंभावेनव्यक्त्यनपेक्षणात् यद्यपिप्रकृतार्थेप्रकरणबलाज्झटितिबुद्धिस्थेसत्येवपश्चात्प्रतीतनक्षत्रधनादि
वाचिनांराजकरादिपदानामन्योन्यसन्निधानबलात्ततद्विषयशक्त्यंतरोन्मेषपूर्वकमप्रस्तुतार्थः स्फुरेत् नचैता
वतातस्यव्यंग्यत्वं शक्त्याप्रतिपाद्यमानेसर्वथैवव्यक्त्यनपेक्षणात्पर्यवसितेप्रकृतार्थाभिधानेपश्चात्स्फुरतिचेत्
कामंगूढश्लेषोभवतु अस्तिचान्यत्रापिगूढश्लेषः

लात् अन्योन्यसन्निधानबलात् परस्परार्थसंबंध्यर्थवाचकशब्दसमभिव्याहा
ररूपशब्दांतरसन्निधिबलात् नथाचाप्रकृतेप्यभिधानियामकमस्तीतिभावः एतावता पूर्वपरभावमात्रेण तस्य अप्रकृतार्थस्य गूढश्लेषइति गू
ढत्वंचाप्रकृतत्वेनद्वितीयार्थस्यशीघ्रमप्रत्ययात्

(72)

कुवल० अयमिति माघेरैवतकगिरिवर्णनं अयंगिरिस्तटीर्बिभर्तीत्यन्वयः किंभूताः अतिजरगः अत्यंतंकठिनाः प्रकामगुर्वीः अतिमहत्यः अलघुभिर्विलंबमा चं०टी
७२ नैर्मेघैर्व्याप्ताः निरंतरंप्राणिनामगम्यरूपाः परिणतास्तिर्यक्दंतप्रहारिणः दिग्गजायासुताः वृद्धवेश्यापक्षेतुजरठाजीर्णाः पयोधराःकुचाः
अगम्याःसंगमायोग्याः परिणतेप्रकटेदिक्करिकेयासांताइत्यर्थः दिक्वर्तुलंदशनक्षतं करिकानखक्षतं दिक्दष्टंवर्तुलाकारंकरिकानख

अयमतिजरठाःप्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरूपाःपरिणतदि
क्करिकास्तटीर्बिभर्ति मंदमग्निमधुरर्यमोपलादर्शितश्वयथुचाभवत्तमः दृष्टयस्तिमिरजंक्षिषेवि
रेदोषमोषधिपतेरसन्निधौ अत्रहिसमासोक्त्युदाहरणयोःप्राकरणिकेर्थेप्रकरणवशात् झटिति
बुद्धिस्थेविशेषणसाम्यादप्रकृतोपिवृद्धवेश्यावृत्तांतादिःप्रतीयते ७ ७

रेखिकेतियादवः मंदमिति ओषधीनांपत्युश्चंद्रस्यासंनिधौसति अर्यमोपलाः सूर्यकांतामंदीभूतमग्निंधृतवंतः तमःदर्शितःश्वयथुः पुष्टत्वं
येनतथाऽभवत् दृष्टयस्तिमिरजंदोषंआंध्यंसिषेविरेपक्षांतरेओषधिपतिर्वैद्यः एवंमंदाग्निस्त्वशोथतिमिराणिरोगविशेषाः वृत्तांतादिरित्यादि
पराङ्गोगिवैद्यवृत्तांतःपरिगृह्यते ७ ७२ ७३ ७४ ७२

अभंगश्लेषइति तथाचश्लेषस्थले व्यंजनाविरहादप्रक्रुते तत्स्वीकारेश्लेषव्यवहारः सर्वेषामनुपपन्नःस्यादितिभावः रम्याइति माघएवद्वारकावर्णनं
यस्यांद्वारकायांयुवानोवधूभिः समंवलभीः प्रासादोपरितनगृहाणिअसेवंतसेवितवंतः किंभूताःरम्याइतिहेतोः पताकावैजयंतीः प्रासवतीः विविक्ता-

तत्रसमासोक्तिरभंगश्लेषइतिसर्वेषामभिमतमेव एवमन्यत्रापिगूढश्लेषेध्वनिबुद्धिर्नकार्या यथावा रम्याइतिप्रास
वतीः पताकारागंविविक्ताइतिवर्द्धयंतीः यस्यामसेवंतनमल्लीकाःसमंवधूभिर्वलभीर्युवानः अत्रद्वितीयांतविशेषणस
मर्पितार्थांतराणांनशब्दसामर्थ्येनवधूभिरन्वयः विभक्तिभेदात् नचविभक्तिभेदेपितदन्वयापेक्षकंसाधर्म्यमिहनिबद्धमस्ति यतः

किजनाइतिहेतोः रागंरतिंवर्द्धयंतीः नर्मंतिवलीकानिछादनपटलप्रांतायासांताः वधूपक्षे पताकाःसौभाग्यानि पताकावैजयंत्योंस्यात्सौभाग्यनाटकां
कयोरितिमेदिनी रागमनुरागं विविक्ताःसतीत्वेनपवित्राः नमत्रिवलीकाश्चेति नचेति यतइत्यस्यइत्यत्रैवाक्षिप्तःश्लेषोभवेदित्यत्रैतनेनान्वयः

एतस्मिन्निति तत्रैव रैवतकगिरिवर्णनं एतस्मिन्गिरौ महत्यः सरस्यः वाल्मीकेर्मुनेर्गिरां साधर्म्यं सादृश्यं दधति धारयंति किंभूतानां गिरां अ
रहितौ संबद्धौ रामलक्ष्मणौ यासु तथाभूतानां सरसीपक्षे अरहिताः संयुक्ता रामाः पतयो यासां तथाभूता लक्ष्मणाः सारसवनिता यासु ता इति किंभू
ताः सरस्यः अधिकां जलशोभां वहंत्यः पवनसंभूतेन वेगेन संक्षोभं तरंगाकुलत्वं नीताः प्रापिताः वाल्मीकिगिरस्तु अधिकाः कपयो यासु ताः पवनभु

एतस्मिन्नधिकपयःश्रियं वहंत्यः संक्षोभं पवनभुवा जवेन नीताः वाल्मीकेररहितरामलक्ष्म
णानां साधर्म्यं दधति गिरां महासरस्यः इत्यत्रैवाक्षिप्तश्लेषो भवेत् सममित्येतत्तु क्रियाविशेषणं स
हार्थत्वेनाप्युपपन्नं वधूषु श्लिष्टविशेषणार्थान्वयात् प्राक् द्रागप्रतीतं साम्यं नालंबते ७

वा हनूमता वेगेन निजेन संक्षोभमुद्भटत्वं प्रापिता इति नन्वत्रापि सममित्यस्य तुल्यार्थत्वात् साधर्म्यनिबंधोस्तीति कुतो न श्लेषाक्षेपस्तत्राह सममि
ति शकृद्दीर्घं साम्यार्थं साम्यार्थकत्वं तथा चानुपपत्त्यभावात्तन्मूलक आक्षेपो न संभवतीति भावः ७ ७ ७

कथंतर्हितदवगमस्तत्राह अर्थसौंदर्येति विशेषणानांवधूभिरन्वयेचमत्कृतेरनुसंधानात्तदन्वयतात्पर्यग्रह इतिभावः तदनुश्लेषानुसंधानानंतरं

तस्मादर्थसौंदर्यबलादेवतदन्वयानुसंधानमितिगूढश्लेषः तदनुतद्बलादेवसमशब्दस्यसाधर्म्या
र्थकल्पनमितिवाच्यस्यैवोपमालंकारस्यांगमयमित्यलंप्रपंचेन तस्मात्सिद्धंश्लेषत्रैविध्यं एवंच
श्लेषःप्रकारांतरेणापिद्विविधःसंपन्नः उदाहरणगतेषुअब्जकीलालवाहिनीपत्यादिशब्देषुपर
स्परविलक्षणंपदभंगमनपेक्ष्यानेकार्थकोडीकारादभंगःसर्वदोमाधवः योगंगांहरिणाहितस्कि
नेत्यादिशब्देषुपरस्परविलक्षणंपदभंगमपेक्ष्यनानार्थकोडीकारात्सभंगःश्लेषइति तत्रसभं
गश्लेषःशब्दालंकारः अभंगश्लेषस्त्वर्थालंकारइतिकेचित् उभयमपिशब्दालंकारइत्यन्ये उ
भयमप्यर्थालंकारइतिस्वाभिप्रायः एतद्विवेचनंतुचित्रमीमांसायांद्रष्टव्यं ७ ७

तद्बलात् श्लेषबलात् साधर्म्यार्थेति साधर्म्यरूपार्थस्येत्यर्थः अर्थसाम्याभावेपिसकलकलंपुरमेतज्जातंसंप्रतिसुधांशुबिंबमिवेत्यादिवत्

(74)

ब्दसाम्यस्यसंभवादितिभावः एवकारेणव्यंग्यत्वव्यवच्छेदः तत्रनयोर्मध्ये शब्देति जतुकाष्ठन्यायेनशब्दयोरेवश्लिष्टत्वादितिभावः अर्थेनिशब्दा-
भेदादेकवृंतगतफलद्वयन्यायेनार्थयोरेवश्लिष्टत्वादितिभावः केचित् अलंकारसर्वस्वकारादयः उभयमपीति सभंगाभंगश्लेषद्वयमपीत्यर्थः श
ब्दस्यपरिवृत्त्यसहत्वेनान्वयव्यतिरेकाभ्यांतद्गतत्वावधारणादितिभावः अन्ये मम्मटभट्टाः नन्वभिप्रायस्यार्थलंकारमध्यकथनादवगतस्यापिविशे
षतःकथनमंतरेणकथमुपपत्तिरित्याशंक्याह एतदिति यद्यप्युत्प्रेक्षायंथानंतरंचित्रमीमांसानक्कापिदृश्यते तथाप्ययमाशयउन्नीयते चमत्का

अप्रस्तुतप्रशंसास्यात्सायत्रप्रस्तुताश्रया

रेर्थमुखप्रेक्षित्वादर्थालंकारत्वमिति अनुप्रासयमकादेस्तुनचमत्कारेर्थमुखप्रेक्षित्वमिति नतेषामर्थालंकारत्वमपितुशब्दवैचित्र्यात् शब्दालं-
कारत्वमेवेति इत्यलंकारचंद्रिकायांश्लेषप्रकरणं ६. अप्रस्तुतेति सा अप्रस्तुतप्रशंसा प्रस्तुताश्रया प्रस्तुतमाश्रयः प्राधान्येनत
त्पर्यविषयोयस्यास्तथाभूता प्रस्तुतपरमप्रस्तुतवर्णनमप्रस्तुतप्रशंसेत्यर्थः ॥ ६

एक इति कृती कुशलः शकुंतेषु पक्षिषु मध्ये यश्चातकः शक्रादिंद्रादन्यं न याचत इत्यर्थः कार्यइति कार्ये प्रस्तुते सति तदन्यस्य कारणस्य वचः प्रतिपाद

एकः कृती शकुंतेषु योन्यं शक्रान्न याचते यत्राप्रस्तुतवृत्तांतवर्णनं प्रस्तुतवृत्तांतावगतिपर्यवसायि तत्राप्रस्तुत
प्रशंसालंकारः अप्रस्तुतवृत्तांतवर्णनेन प्रस्तुतावगतिश्च प्रस्तुताप्रस्तुतयोः संबंधे सति भवति संबंधश्च सारू
प्यं सामान्यविशेषभावः कार्यकारणभावो वा संभवति तत्र सामान्यविशेषभावे सामान्याद्विशेषस्य विशेषाद्वा सामा
न्यस्यावगतौ द्वैविध्यं कार्यकारणभावेपि कार्यात्कारणस्य कारणाद्वा कार्यस्यावगतौ द्वैविध्यं सारूप्यात्तु एको भे
द इत्यस्याः पंचप्रकाराः यदाहुः कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंच
धेति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं एकः कृतीति अत्र अप्रस्तुतचातकस्य प्रशंसा प्रशंसनीयत्वे
न प्रस्तुते तत्सरूपे क्षुद्रेभ्यो याचनान्निवृत्तमानिनि पर्यवस्यति

नं निमित्ते कारणे प्रस्तुते सति तदन्यस्य कार्यस्य एवं सामान्ये प्रस्तुते
सति तदन्यस्य विशेषस्य विशेषे प्रस्तुते सति तदन्यस्य सामान्यस्य तुल्ये प्रस्तुते तदन्यस्य तत्सदृशस्येत्यर्थः अन्यशब्दस्य प्रतिसंबंधिपरत्वात् तत्स
रूपे तत्सदृश

आबद्धेति आबद्धाः याः कृत्रिमाः सटाः स्कंधलोमानि तैर्जटिला व्याप्ता अंसभित्तिः स्कंधदेशो यस्यैवंभूतः श्वा शुनकः मृगपतेः सिंहस्य पदवीं स्थानं यद्यारोपितः तादृशसटायुक्तत्वेन सिंहसाम्यं प्रापित इत्यर्थः तथापि मत्तानामिभानां गजानां कुंभतटस्य पाटने विदारणे लंपटस्य व्यसनिनो हरिणानामधिपस्य नादं सिंहनादं कथं करिष्यतीत्यर्थः अभिनयवत्ति अनुकुर्वतीति सप्तम्यंतं वैधेये मूर्खे मूर्खवैधेयबालिशा इत्यमरः

यथावा आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा मत्तेभकुंभतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र शुनकस्य निंदा निंदनीयत्वेन प्रस्तुते तत्सरूपे कृत्रिमवेषव्यवहारादिमात्रेण विद्वत्ताभिनयवति वैधेये पर्यवस्यति यथावा अंतश्छिद्राणि भूयांसि कंटका बहवो बहिः कथं कमलनालस्य माभूवन् भंगुरा गुणाः अत्र कमलनालवृत्तांतकीर्तनं तत्सरूपे बहिः खलेषु-जायत्सु भ्रातृपुत्रादिभिरंतःकलहं कुर्वाणे पुरुषे पर्यवस्यति

अंतरिति छिद्राणि रंध्राणि दोषस्थानानि च कंटकाः शूकाः खलाश्च भंगुराः भंगशीलाः गुणाः सौभाग्यादयः तंतवश्च अत्र स्तुतिनिंदोदासीनत्वरूपाख्यानमात्रमिति श्लिष्टविशेषणत्वमिति च भेदः ❋ ६९ ६९ ६९

एवंचेति उक्तोदाहरणेषुप्रस्तुतपरस्याप्रस्तुतवर्णनस्यत्रिरूपत्वेसतीत्यर्थः विधायेति येनराः मनुष्याः सक्रोधेऽरौशत्रौवैरंविधायोदासीनाभवं तितेकक्षेतृणेउदर्चिषमग्निंनिक्षिप्यअभिमारुतंपवनाभिमुखंशेरतेनिद्रांकुर्वंतीत्यर्थः सौहार्देति सौहार्दनिभेव्याण्येवस्वर्णरेखाइतिरूपकं

एवंचलक्ष्यलक्षणयोः प्रशंसाशब्दः स्तुतिनिंदास्वरूपाख्यानसाधारणकीर्तनमात्रपरोद्रष्टव्यः सामान्य निबंधनायथा विधायवैरंसामर्षेनरोऽरौयउदासते प्रक्षिप्योदर्चिषंकक्षेशेरतेऽभिमारुतं अत्रभागे वसामर्षेशिशुपालेरुक्मिणीहरणाद्वैरंदृढीकृतवताकृष्णेनतस्मिन्नुदासितुमयुक्तमितिवक्तव्येऽर्थेप्रस्तु तेतत्समर्थनार्थंसामान्यमभिहितं यथावा सौहार्दस्वर्णरेखाणामुच्चावचभिदाजुषां परोक्षमितिकोप्य स्तिपरीक्षानिकषोपलः अत्रयदित्वंप्रत्यक्षमिवपरोक्षेपिममहितमाचरसितदात्वमुत्तमः सुहृदितिवि शेषेवक्तव्यत्वेनप्रस्तुतेसामान्यमभिहितं

तासांपरीक्षणेनिकषोपलः परोक्षमितिसंज्ञितः कोप्यस्तीत्यन्वयः ६९

७८

 अंकेति मृगलांछनइत्युच्यतइतिशेषः निष्ठुरं क्षिप्तानि निरस्तानिमृगयूथानियेनताहशः केसरी सिंहोमृगाधिपइत्युच्यतइतिचशेषः हतेनि धृतोगं

विशेषनिबंधनायथा अंकाधिरोपितमृगश्चंद्रमामृगलांछनः केसरीनिष्ठुरक्षिप्तमृगयूथो
मृगाधिपः अत्रकृष्णंप्रति बलभद्रवाक्येमार्दवदूषणपरेपूर्वप्रस्तावानुसारेणक्रूरएवख्याति
भाग्भवतिननुमृदुरितिसामान्ये वक्तव्येतत्प्रसायनार्थमप्रस्तुतोविशेषोभिहितः एवंबृह
त्कथादिषुसामान्यतः कंचिदर्थंप्रस्तुत्यतद्विवरणार्थमप्रस्तुतकथाविशेषोदाहरणेष्वियमे
वाप्रस्तुतप्रशंसाद्रष्टव्या कारणनिबंधनायथा हृतसारमिवेंदुमंडलंदमयंतीवदनायवेध
सा कृतमध्यबिलंविलोक्यतेधृतगंभीरखनीखनीलिम अत्राप्राकरणिकेंदुमंडलगततयो
त्प्रेक्ष्यमाणेनदमयंतीवदननिर्माणार्थसारांशहरणेनतत्कार्यरूपंवर्णनीयतयाप्रस्तुतंदमयंती
वदनगतलोकोत्तरसौंदर्यंप्रतीयते

भीरायांखन्यांगर्तेखस्याकाशास्यनीलिमायेनेतिमंडलविशेषणम् ९

आश्रित्येति हेदेवप्रतिमासंभिन्ना अमृतद्युतयश्चंद्रास्ते विष्णोः पद्माकान्तामेव पदं चरणमाश्रित्य देहस्य क्षये उपनतं संपन्नं दिव्यपदस्याभिमुखत्वं
येषामेवंभूताः संतस्त्वदास्यरूपे सुहृदि मित्रे नूनं लावण्यस्वरूपस्य पुण्यस्य निचयं विन्यस्य मिहिरं सूर्यं प्रतियांतीत्यन्वयः मंत्रलिंगादिति नवोनवो

यथावा मदीयवरदराजस्तवे आश्रित्य नूनममृतद्युतयः पदं ते देहक्षयोपनतदिव्यपदाभिमुख्याः लावण्यपुण्य
निचयं सुहृदि त्वदास्ये विन्यस्य यांति मिहिरं प्रतिमासभिन्नाः अत्राप्राकरणिकचंद्रकर्तृकतयोत्प्रेक्ष्यमाणेन लावण्य
पुण्यनिचयविन्यासेन कारणेन तत्कार्यमनंतकोटिचंद्रलावण्यशालित्वं अनन्यमुखसाधारणं भगवन्मुखे वर्ण
नीयतया प्रस्तुतं प्रतीयते तथाहि चंद्रस्तावन्मंत्रलिंगाद्वृद्धिक्षयाभ्यामभेदेपि भेदाध्यवसायाद्वा प्रतिमासंभिन्नत्वेन व
र्णितः तेनातीताश्चंद्रा अनंतकोटय इति लब्धं कालस्यानादित्वात्सर्वेषां च तेषामाकाशसमाश्रयणं श्लेषमहिम्ना
भगवच्चरणसमाश्रयत्वेनाध्यवसितं भगवच्चरणं प्रपन्नानां च देहक्षयोपस्थितो परमपदप्राप्त्याभिमुख्यं तदा
नीमेव स्वसुहृद्गेस्वकीयसुकृतस्तोमनिवेशनं ६९ ६९ भवति जायमान इत्यादि मंत्रसामर्थ्यादित्य-

र्थः मंत्रस्यमानांतरसिद्धार्थानुवादकत्वादाह वृद्धीति ॥ ६७, ६८, ६७

श्रुनीति तत्सुकृतदुष्कृते विधूनुते तस्य प्रियाज्ञातयः सुकृतमुपयंति अप्रिया दुष्कृतमिति कौषीतकी श्रुतिः स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छतीति
स वायुमागच्छति स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छतीति च श्रुतौ स आदित्यमागच्छतीत्यनंतरं स आगच्छ

ततः सूर्यमंडलप्राप्तिश्चेत्येतत्सर्वं श्रुतिसिद्धमिति तदनुरोधेन तेषां देहक्षयकालस्यामावास्यारूपस्योपस्थितौ सूर्यमंडलप्राप्तेः
प्राक्प्रत्यक्षसिद्धं पुण्यत्वेन निरूपितस्य लावण्यस्य प्रहाणं निमित्तीकृत्य तस्य चंद्रसादृश्यस्वरूपोपचरितत्सौहार्दवति भगवन्मु
खे विन्यसनमुत्प्रेक्षितं यद्यपि सुहृद्द्रूत्वेतावदल्पपुण्यसंक्रमो भवति तथापि अत्र सुहृदित्येकवचनेन भगवन्मुखमेव चं
द्रस्य सुहृद्भूतं न मुखांतराणि चंद्रसादृश्यगंधस्याप्यसंभवादिति भगवन्मुखस्येतरमुखेभ्यो व्यतिरेकोपि व्यंजितः ततश्च त
स्मिन्नेव सर्वेषां स्वस्वयावल्लावण्यविन्यसनोत्प्रेक्षणेन प्राग्वर्णितः प्रस्तुतोर्थः स्पष्टमेव प्रतीयते यद्यपि श्रुतौ सूर्यमंडलप्राप्त्य
नंतरभाविविरजानदीक्रमणानंतरमेव सुहृत्सु सुकृतसंक्रमणं श्रूयते तथापि शारीरकशास्त्रे तस्यार्थवशात्प्राग्भावः स्थापित इति
तदनुसारेण विन्यस्य मिहिरं प्रतियांतीत्युक्तं

ति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुत इति श्रुतौ शारीरकेति शारीरभवः शारीरः स
एव शारीरक आत्मा तत्प्रतिपादके स्यर्थः अर्थवशात्प्रयोजनवशात् पूर्वपापादित्यागाभावेऽर्चिरादिमार्गप्राप्तिपूर्वकब्रह्मप्राप्तेरसंभवेन पाठक्रमस्य आर्थक्र

मेणबाधादिनिभावः स्थापितइति सांपरायेनर्तव्याभावात्तथात्यन्यइतितानीयाधिकरणेसिद्धांतितइत्यर्थः नाथेति हेनाथविष्णोत्वच्चरणनख
प्रक्षालनजलेगंगारूपेलग्नाः तेषांनखानांकांतिलेशकणिकाःसमुद्रंप्राप्ताः ताएवचकणिकास्तस्यजलधेर्मथनेनसांद्रतांप्राप्तानूनंसमुद्रसंबंधि

कार्यनिबंधनायथा नाथत्वदंघ्रिनखधावनतोयलग्नास्तत्कांतिलेशकणिकाजलधिंप्र
विष्टाः ताएवतस्यमथनेनघनीभवंत्योनूनंसमुद्रनवनीतपदंप्रपन्नाः भगवत्पादांबुजक्षा
लनरूपायांदिव्यसरित्यलक्तकरसादिवल्लग्नानांतयासहसमुद्रंप्रविष्टानांतन्नखकांतिलेश
कणिकानांपरिणामतयासंभाव्यमानेनसमुद्रनवनीतपदवाच्येनचंद्रेणकार्येणतन्नखकांत्युत्कर्षः
प्रतीयते यथावा

नवनीतस्यचंद्रस्यपदंप्राप्ताः चंद्ररूपेणपरिणताइत्यर्थः तयातद्वारेणतदित्यनंतरंहेतुरितिशेषः तद्धेतुर्नखकांत्युत्कर्षइत्यर्थः ⁞⁞⁞ ६,

अस्याश्चेदिति अस्याः कामिन्या गतिसौकुमार्यं दृष्टं चेदित्यध्याहारेणान्वयः एवं संलापो भाषणं यदि श्रुतं तत्तदा परभृतैः कोकिलैर्वाचंयमत्वं वनीनि तथा तस्य भावो मौनमेव व्रतं साध्यतां अकठोरता मार्दवं यदि दृश्यते तदा सा प्रसिद्धा मालती दृषच्छायैव पाषाणतुल्यैव लक्ष्यत इति कांतिर्दृष्टा चे

अस्याश्चेद्गतिसौकुमार्यमधुना हंसस्य गर्वैरलं संलापो यदि धार्यतां परभृतैर्वाचंयमत्वव्रतं अंगानामकठोरता यदि दृषच्छायैव सा मालती कांतिश्चेत्कमला किमत्र बहुना काषायमालंबतां अत्र नायिका गतिसौकुमार्यादिषु वर्णनीयत्वेन प्रस्तुतेषु हंसादिगतगर्वशांत्यादिरूपाणि औचित्येन संभाव्यमानानि कार्याणि अभिहितानि एतानि च पूर्वोदाहरण इव न वस्तुकार्याणि किंतु तन्निरीक्षणकार्याणि ॥ ७ ७

तदा कमला लक्ष्मीः काषायं वस्त्रमालंबतामाश्रयतु किमत्र बहुनोक्तेनेत्यन्वयः गत्यादिषु गतिसौंदर्यादिषु संभाव्यमानानि उत्प्रेक्ष्यमाणानि पूर्वोदाहरणाद्वैलक्षण्यमाह एतानीति कार्याणीत्यर्थः ७ ७ ७

लज्जेति तिरश्चांपश्वादीनांचेतसियदिलज्जास्यात्तदाचमर्यः गोमृगाः पर्वतराजपुत्र्यास्तंनथारमणीयंकेशपाशंप्रसमीक्ष्य वालाः केशाः प्रियायासां
तास्तथातत्वंशिथिलंकुर्युरित्यन्वयः तथैव निरीक्षणकार्यत्वमेव अर्थाक्षेप्येति दृषणायत्वरूपार्थाक्षिप्तेत्यर्थः इदमपि अप्रस्तुतबुद्धेःका
र्यत्वमपिअपिनाप्रस्तुतबुद्धेःकारणत्वंप्रागुक्तंसमुच्चीयते त्वदंगमार्दवेदृष्टेकस्यचित्तेनभासते मालतीशशभृल्लेखाकदलीनांकठोरतेति तुल्य

लज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराजपुत्र्याः तंकेशपाशंप्रसमीक्ष्यकुर्युर्वालप्रियत्वंशिथिलंचमर्य
इतिउदाहरणांतरेतथैवस्पष्टं अंगानामकठोरतेति तृतीयपादेतुवर्णनीयांगसौकुमार्यातिशयनिरीक्षणकार्य
त्वमपिनार्थाक्षेप्यमालतीकठोरत्वेविवक्षितं प्रतिप्रयोगिविशेषापेक्षकठोरत्वस्य तदकार्यत्वात् किंतुतद्बुद्धे
रेव इदमपित्वदंगमार्दवेदृष्टइत्याद्युदाहरणांतरेतथैवस्पष्टं

योगितायांप्रागुदाहृतं ननुकार्यरूपेणाप्रस्तुतेनार्थेनयत्रप्रस्तुतं
तत्कारणमवगम्यतेसाकार्यनिबंधनाअप्रस्तुतप्रशंसोच्यते नचोदाहृतेषुतत्संभवः मालतीकठोरत्वादेरप्रस्तुतस्यार्थस्याकार्यतायास्त्वयैवदर्शि
तत्वात् ७ ७ ७

(79)

कुवल॰ ७१

चं॰

एवंप्रस्तुतस्यकामिनीगतिनिष्ठसौंदर्यातिशयादेर्निरीक्षणस्यैवकारणत्वेनस्वरूपतस्तस्याकारणत्वादित्यत्तआह अर्थस्येति अयमाशयः अर्थ स्याप्रस्तुतत्वेसुतरांतद्बुद्धेरप्रस्तुतत्वात्कार्यत्वाच्चनतावदप्रस्तुतकार्यत्वांशासंभवः अर्थत्वस्यप्रयोजनाभावेनलक्षणेअनिवेशाद्व्यावर्तकत्वा- च्च नापिप्रस्तुतस्यकारणत्वांशस्यासंभवः स्वरूपतस्तस्याहेतुत्वेपिज्ञातस्यहेतुत्वादिति ननुगतिसौंदर्यदर्शनमेवहेतुर्नतुज्ञायमानंगतिसौं

अर्थस्यकार्यत्वइवबुद्धेः कार्यत्वेपिकार्यनिबंधनत्वंनहीयतइति एतादृशान्यपिकार्यनिबंध नाप्रस्तुतप्रशंसायामुदाहृतानिप्राचीनैः वस्तुतस्तुतदतिरेकेपिनदोषः नह्यप्रस्तुतप्रशंसायां प्रस्तुताप्रस्तुतयोः पंचविधएवसंबंधइतिनियंतुंशक्यते संबंधांतरेष्वपितद्दर्शनात् ७

दर्यादि तदभावेपिज्ञानमात्रात्कार्योत्पत्तेरित्यस्वरसादाह वस्तुतस्त्विति तदतिरेकेतस्याः प्राचीनोदाहृताप्रस्तुतप्रशंसायाअतिरेकेप्रकार पंचकाधिक्ये ॐ ७ ७ ७

७१

तापेति हे हरे तव निश्वासरूपमंदमारुतेन निबुसीकृतस्य बुसरहितीकृतस्य स्मितरूपस्य आध्यात्मिकादितापत्रयौषधश्रेष्ठस्य विप्रकीर्णाः कडंकरचया बुससमूहा इवैते जैवातृकस्य चंद्रस्य किरणा जगति भ्रमंतीत्यन्वयः तत्सारतारूपः किरणसारतारूपः एवमिति त्वत्तसारमि

यथा तापत्रयौषधवरस्य तवस्मितस्य निश्वासमंदमरुता निबुसीकृतस्य एते कडंकरचया इव विप्रकीर्णा जैवातृकस्य किरणा जगति भ्रमंति अत्रत्यप्रस्तुतानां चंद्रकिरणानां भगवन्मंदस्मितरूपदिव्यौषधधान्यविशेषकडंकरचयत्वोत्प्रेक्षणेन भगवन्मंद-स्मितस्य तत्सारतारूपः कोप्युत्कर्षः प्रतीयते नच धान्यकडंकरचययोः कार्यकारणभावादिसंबंधोस्ति अतः सहोत्पत्यादिकमपि संबंधांतरमाश्रयणीयमेव एवमुपमानोपमेयावाश्रित्य तत्र कविकल्पितकार्यकारणभावनिबंधने अप्रस्तुतप्रशंसे दर्शिते ततोन्यत्रापि दृश्यते

त्युदाहरणे चंद्रवदने उपमानोपमेयपदार्थावाश्रित्य चंद्रसारांशहरणस्य सतः कविप्रौढोक्तिकल्पितं कारणत्वं एवमन्येष्वपि द्रष्टव्यम् ॥

कुवल० कस्त्वमिति शाखोटकतरुंप्रतिकस्यचित्पथिकस्यप्रश्नोक्तिः कथयामीत्याद्युत्तरं वैराग्यादिववदसीतिपुनः प्रश्नः साधुविदितमितिशाखोटक चं०
८१ स्योत्तरं कस्मादिदंवैराग्यमितिपुनःप्रश्नःकथ्यतइतिपुनरुत्तरंप्रतिज्ञायशाखोटकआह वामभागेनोपलक्षितोत्रवटोस्तितंपांथोजनःसर्वा

कस्त्वंभोः कथयामिदैवहतकंमांविद्धिशाखोटकंवैराग्यादिववक्षिसाधुविदितंकस्मादिदंकथ्यते वामेनात्रवटस्तमध्वगजनःसर्वात्मिनासेवतेनछायापिपरोपकारकरिणीमार्गस्थितस्यापिमे इत्यत्रचेतनाचेतनप्रश्नोत्तरवत्तिर्यगामंत्रणस्यात्यंतमसंभावितत्वाभावात् एवंप्रस्तुतेनवाच्यार्थेनभृंगोपालंभरूपेणवक्र्याः कुलवध्वाः सौंदर्याभिमानशालिन्याः क्रूरजनपरिवृत्तिदुःप्रधर्षायांपरवनितायांविटसर्वस्वापहरणसंकल्पदुरासदायांवेश्यायांवाकंटकसंकुलकेतकीकल्पायांप्रवर्तमानंप्रियतमंप्रत्युपालंभोद्योत्यते

त्मनासमित्यत्रछायादिभिःसेवतेआश्रयति ममपुनर्मार्गेस्थितस्यापिनछायापिपरोपकारसंपादिकेति
मूलाधारत्वादितिभावः वामेनेतिमार्गेतिचश्लिष्टं अत्यंतं आरोपेणाधि परवनितायामिति वेश्यायामितिचविषयसप्तमीतद्विषयेइत्यर्थः विटानां
सर्वस्वस्यापहरणेयः संकल्पस्तेनदुःप्रापेतिवेश्याविशेषणं ॐ ९ ९

अन्येति हेभृंगअन्यास्रूपमर्दक्षमासुसुमनसांपुष्याणांलतासुतावत्यावत्नवमल्लिकायाःकलिकासंजातरजस्काभवति लोलंचपलंमनो विनोदय लोलमितिक्रियाविशेषणंवा नवमल्लिकायालताविशेषस्यबालामभिनवांअसंजातरजस्कांकलिकामकालेव्यर्थंकिमितिकद

यथावा अन्यासुतादटुपमर्दसहासुभृंगलोलंविनोदयमनःसुमनोलतासु बालामजातर जसंकलिकामकालेव्यर्थंकदर्थयसिकिंनवमल्लिकायाः अत्राप्युद्यानमध्येचरंतंभृंगंप्रत्युपा लंभइतिवाच्यार्थस्यापिप्रस्तुतत्वं इदंचप्रौढांगनासुसतीषुबालिकांरतयेक्लेशयतिकामिनि श्रृण्वतिकस्याश्चिद्विदग्धायावचनमितितंप्रत्युपालंभोद्योत्यते ७ ७

कालिंदीति नर्मदायाः समुद्रस्य च संवादोयं तत्र यमुनाभ्रांत्या समुद्रेण कालिंदीत्युक्ते कोपात्साकूतं नर्मदाया उत्तरं हे कुंभोद्भव अगस्त्य मुने ब्रूहीति ततः पुनः समुद्रस्य प्रतिवचनं अहं जलधिर्भवामि मम शत्रोर्नाम कस्माद्धेतोर्गृह्णासीति सा पुनराह नर्मदाहमित्यादि ततः समुद्रः पुनराह

यथा कालिंदि ब्रूहि कुंभोद्भव जलधिरहं नाम गृह्णासि कस्माच्छत्रोर्मे नर्मदाहं त्वमपि वदसि मे नाम कस्मात्सपत्न्याः मालिन्यं तर्हि कस्मादनुभवसि मिलत्कज्जलैर्मालवीनां नेत्रांभोभिः किमासां समजनि कुपितः कुंतलक्षोणिपालः अत्र किमासां समजनीति मालवीनां तथा रोदनस्य निमित्ते पृष्टे तत्प्रियमरणरूपनिमित्तमनाख्याय कुपितः कुंतलक्षोणिपाल इति तत्कारणमभिहितमिति कारणनिबंधना मालवान्प्रति प्रस्थितेन कुंतलेश्वरेण किं तेनाशिता इति पृष्टे तद्वधानंतरभावि जलधिनर्मदाप्रश्नोत्तररूपं कार्यमभिहितमिति अत्रैव कार्यनिबंधनापि पूर्वस्याप्रश्नः शाब्दः अस्यामार्थ इति भेदः

तर्हि कुतो मालिन्यमनुभवसीति सा पुनराह मिलत्कज्जलैर्मालवदेशांगनानां नेत्राश्रुभिरिति ततः किमासां जातमिति समुद्रस्य प्रश्नः कुंतलदेशाधिपः कुपित इति नर्मदाया उत्तरमिति इत्यलंकारचंद्रिकायामप्रस्तुतप्रशंसाप्रकरणं ७

प्रस्तुतेनेति प्रधानभूतप्रस्तुतांतराभिव्यंजकं प्रस्तुतवर्णनं प्रस्तुतांकुरालंकारः प्रस्तुतस्याभिव्यंजकत्वादंकुर इवांकुर इतिव्युत्पत्तेः किमिति हेभ्रमरमाल त्यांविद्यमानायां कंटकेद्ध्या कंटकव्याप्तया केतक्या किं प्रयोजनमिति प्रस्तुतेन भ्रमरवृत्तांतेन मयि मनोहारिण्यां सत्यां किमुद्वेगकारिण्याप

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः किं भृंग सत्यां मालत्यां केतक्या कंटकेद्ध्या यत्र प्रस्तुतेन वर्ण्यमानेनाभिम तमन्यत्प्रस्तुतं द्योत्यते तत्र प्रस्तुतांकुरालंकारः उत्तरार्द्धमुदाहरणं इह प्रियतमेन साकमुद्याने विहरंती काचिद्भृंगं प्रत्येवाहेति वाच्यार्थस्य प्रस्तुतत्वं नचानामंत्रणीयामंत्रणेन वाच्यासंभवादप्रस्तुतमेव वाच्यमिह स्वरूपप्रस्तुताव गतये निर्दिष्टमिति वाच्यं भोग्ध्यादिना भृंगादावप्यामंत्रणस्य लोके दर्शनात् यथा

रवनितयेति नायकवृत्तांतः प्राधान्येन प्रस्तुतोऽ भिव्यज्यते कथमिह भृंगवृत्तांतस्य प्रस्तुतत्वं तत्राह इहेति तथाच भृंगसंबोध्यकत्वात्तद्वृत्तांतोपि प्रस्तुत इति भावः अनामंत्रणीयामंत्रणेन संबोध्यत्वायोग्यसंबोधनेन वाच्यासंभवात् भृंगसंबोध्यकवाच्यार्थसंभवात् ॥ ६ ॥ ६,

कस्त्वमिति शाखोटकतरुंप्रतिकस्यचित्पथिकस्यप्रश्नोक्तिः कथयामीत्याद्युत्तरं वैराग्यादिववदसीतिपुनःप्रश्नः साधुविदितमितिशाखोटक स्योत्तरं कस्मादिदंवैराग्यमितिपुनःप्रश्नःकथ्यतइतिपुनरुत्तरंप्रतिज्ञायशाखोटकआह वामभागेनोपलक्षितोत्रवटोस्तितंपांथोजनःसर्वा

कस्त्वंभोः कथयामिदैवहतकंमांविद्धिशाखोटकंवैराग्यादिववक्षिसाधुविदितंकस्मादिदंकथ्यते वामेनात्रवटस्तमध्वगजनःसर्वात्मनासेवतेनछायापिपरोपकारकरिणीमार्गस्थितस्यापिमे इत्यत्रचेतनाचेतनप्रश्नोत्तरवत्तिर्यगामंत्रणस्यात्यंतमसंभावितत्वाभावात् एवंप्रस्तुतेनवाच्यार्थेनभृंगोपालंभरूपेणवक्ष्याःकुलवध्वाःसौंदर्याभिमानशालिन्याःक्रूरजनपरिवृत्तिदुःप्रधर्षायांपरवनितायांविटसर्वस्वापहरणसंकल्पदुरासदायांवेश्यायांवाकंटकसंकुलकेतकीकल्पायांप्रवर्तमानंप्रियतमंप्रत्युपालंभोद्योत्यते

त्मनासमित्यत्रछायादिभिःसेवतेआश्रयति ममपुनर्मार्गेस्थितस्यापिनछायापिपरोपकारसंपादिकेति मूलाधारत्वादितिभावः वामेनेतिमार्गेतिचश्लिष्टं अत्यंतं आरोपेणाधि परवनितायामिति वेश्यायामितिचविषयसप्तमीतद्विषयेइत्यर्थः विटानां सर्वस्वस्यापहरणेयःसंकल्पस्तेनदुःप्रापेतिवेश्याविशेषणं ॥ ७ ॥ ७

अन्येति हेभृंग अन्यासूपमर्दक्षमासुसुमनसांपुष्पाणांलतासुतावत्‌यावत्‌नवमल्लिकायाः कलिकासंजातरजस्काभवति लोलंचपलंमनो
विनोदय लोलमितिक्रियाविशेषणंवा नवमल्लिकायालताविशेषस्यबालामभिनवांअसंजातरजस्कां कलिकामकालेव्यर्थंकिमितिकद

यथावा अन्यासुतावदुपमर्दसहासुभृंगलोलंविनोदयमनःसुमनोलतासु बालामजातर
जसंकलिकामकालेव्यर्थंकदर्थयसिकिंनवमल्लिकायाः अत्राप्युद्यानमध्येचरंतंभृंगंप्रत्युपा
लंभइतिवाच्यार्थस्यापिप्रस्तुतत्वं इदंचप्रौढांगनासुसतीषुबालिकांरतयेक्लेशयतिकामिनि
शृण्वतिकस्याश्चिद्विदग्धायावचनमितितंप्रत्युपालंभोद्योत्यते ९ ९

र्थयसिपीडयसीत्यन्वयः रजःपुष्परजः स्त्रीणांरेतश्च शृण्वतीति एतद्वचनंशृण्वतिसतीत्यर्थः ॐ ९ ९

(83)

कोशेति इयं नलिनी कमलिनी कोशद्वंद्वं मुकुलयुगलं कादंबस्य हंसस्य चंच्वा क्षतं कृतक्षतं दधाति धत्ते तथेयं चूतस्याम्रस्य लता नूतनं पल्लवं पुंरूपैः कोकिलैरास्वादितं चर्वितं धत्ते इति दीर्घिकाया वाप्यास्तटे मिथः परस्परं सखीजनस्य वच आकर्ण्य सा प्रस्तुता नायिका कमलमुकुल

यथावा कोशद्वंद्वमियं दधाति नलिनी कादंबचंचूक्षतं धत्ते चूतलता नवं किसलयं पुंस्कोकिलास्वादितं इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चैलांतेन न तिरोदधे स्तनतटं बिंबाधरं पाणिना अत्रेयमिति नलिनी व्यक्ति विशेषनिर्देशेन दीर्घिकायास्तट इत्यनेन च वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं प्रस्तुतांतरद्योतनं चोत्तरार्धे स्वयमेव कविना विष्कृतं अत्राद्योदाहरणयोरन्यापदेशध्वनिमाहलोचनकारः अप्रस्तुतप्रशंसायां वाच्यार्थोऽप्रस्तुतत्वाद्वर्णनीय इति तत्राभिधायामपर्यवसितायां तेन प्रस्तुतार्थव्यक्तिरलंकारः इह तु वाच्यस्य प्रस्तुतत्वेन तत्राभिधायां पर्यवसितायामर्थसौंदर्यबलेनाभिमतार्थव्यक्तिर्ध्वनिरेवेति वस्तुतस्त्वयमप्यलंकार एव न ध्वनिरिति व्यवस्थापितं चित्रमीमांसायां

म्रपल्लवव्याजेनैतामदीयस्तनाधरक्षतवृत्तांतं कथयंतीति ज्ञात्वा चैलस्य वस्त्रस्यांतेन प्रांतेन स्तनतटं तिरोदधे बिंबरूपमधरं च पाणिना तिरोदधे आच्छादितवतीत्यन्वयः अन्यापदेशेति अन्यस्यापदेशो मिषं यत्र तादृशमित्यर्थः तदीयमेवग्रंथं दर्शयति अप्रस्तुतेत्यादि व्यवस्थापितमिति प्रस्तुतत्वेपि मुख्यतया तात्पर्याभावात्तत्राप्यभिधापर्यवसानाभावादिति-भावः

सान्यैवेति साअलंकृतिर्ध्वनेःसकाशादन्यैवेत्यर्थः प्रस्तुतत्वलंभनेनप्रस्तुतत्वप्राप्त्या रात्रिरिति हेविलोचनेशिवाकल्याणरूपाकाचनअनिर्वच
नीयप्रभावारात्रिःशिवरात्रिरित्यर्थः संनिधत्तेसंनिहिताभवतिअतःयुवांअप्रमत्तेजाग्रतंजाग्रद्रूपेभवतं कुतस्तत्राह युवयोःसकाशेसमीपेअचि

तृतीयोदाहरणस्यत्वलंकारत्वेकस्यापिनविवादः उक्तंहिध्वनिकृता शब्दार्थशक्त्याक्षिप्तोपिव्यंग्योर्थःकविनापुनः यत्राविः
ष्क्रियतेस्वोक्त्यासान्यैवालंकृतिर्ध्वनेरिति एतान्यपिसारूप्यनिबंधनान्युदाहरणानि संबंधांतरनिबंधनान्यपिकथंचिद्वाच्य-
व्यंग्ययोःप्रस्तुतत्वनिबंधनेनोदाहरणीयानि दिङ्मात्रमुदाह्रीयते रात्रिःशिवाकाचनसन्निधत्तेविलोचनेजाग्रतमप्रमत्ते
समानधर्मायुवयोःसकाशेसखाभविष्यत्यचिरेणकश्चित् अत्रशिवसारूप्यमिवतदेकदेशतयातद्वाच्यं ललाटलोचनम
पिशिवरात्रिमाहात्म्यप्रयुक्तत्वेनवर्णनीयमितितन्मुखेनकृत्स्नंशिवसारूप्यंगम्यं ७ ७ ७

रेणसमानधर्मासदृशःसखाकश्चिद्भविष्यतितृतीयंलोचनंभालेभविष्यतीत्यर्थः तदेकदेशतयेति शिवरात्रिमाहात्म्यप्रयुक्तत्वेहेतुः तच्चवर्ण्य
त्वे तद्वाच्यं उदाहृतकाव्यवाच्यं एवंचैकदेश्येकदेशभावसंबंधनिबंधनत्वमत्रदर्शितं ७ ७ ७

वहंतीति भगवत्याः सीमंतवर्णनमिदं अयिशिवे तव सीमंतसरणिः नः क्षेमं तनोत्वित्यन्वयः कीदृशी सिंदूरं वहंती किमिव प्रबलानां केशपाशरूपांधकारदीप्तीनां समूहैर्बंदीकृतं बालार्ककिरणमिव सरणिः केव त्वद्वदनसौंदर्यलहरीणां परीवाहरूपा स्रोतसः सरणिरिवेति परीवाहो जलनिर्गममार्गः जलोच्छ्वासाः परीवाहा इत्यमरः अंगेति विरहसंतापवर्णनं अंगसंबद्धं मृणालकांडं भृंगेभ्यो विशेषरहितां तत्समां रुचं कांतिमयते प्राप्नोति ना-

यथावा वहंती सिंदूरं प्रबलकबरीभारतिमिरत्विषां वृंदैर्बंदीकृतमिव नवीनार्ककिरणं तनोतु क्षेमं नस्तव वदनसौंदर्य लहरीपरीवाहस्रोतःसरणिरिव सीमंतसरणिः अत्र वर्णनीयत्वेन प्रस्तुतायाः सीमंतसरणेर्वदनसौंदर्यपरीवाहत्वोत्प्रे क्षणेन परिपूर्णतटाकवत्परीवाहकारणीभूता स्वस्थाने अमांती वदनसौंदर्यसमृद्धिः प्रतीयते सापि वर्णनीयत्वेन प्रस्तु तैव यथावा अंगासंगिमृणालकांडमयते भृंगावलीनां रुचं नासामौक्तिकमिंद्रनीलसरणिं श्वासानिलाद्दाहते दत्तेयं हिमवालुकापि कुचयोर्धत्ते क्षणं दीपतां तत्प्रायः पतितांबुवत्करतले धारांबु संलीयते

पातिशये न मलिनीभावात् नासामौक्तिकं श्वासानिलादत्युष्णाद्धेतोरिंद्रनीलमणेः पदवीं तत्साम्यं गाहते प्राप्नोति तथा कुचयोर्दत्तानिहिते यं हिमवालुका कर्पूरं क्षणं दीपरूपतां धत्ते एवं करतले धारारूपेण सिक्तं जलं तत्प्रायः पिंडपतितजलवत्संलीयते तापातिशयात् शोषं प्राप्नोतीत्यर्थः ५ ५ ५

उदाहरणद्वयेपिकार्यनिबंधनत्वंव्यक्तं नतत्रायमिति द्वयोरपिवाच्यत्वादितिभावः अयमित्युपलक्षणं अप्रस्तुतप्रशंसापिनेतिबोध्यं किंकृत
स्तर्हितत्रचमत्कारोऽतआह किंत्विति परीति रत्नावल्यांस्वविरहातुरायाःसागरिकायाःशयनमुपगतस्यराज्ञइयमुक्तिः इदंबिसिनीपत्रर
चितंशयनंकृशांग्याःसंतापवदत्यनुमापयति किंभूतं पीनस्तनजघनसंगादुभयतऊर्ध्वाधोभागयोःपरिम्लानं तनोःकृशस्यमध्यस्यपरिमिल

अत्रनायिकायाविरहासहत्वातिशयप्रकटनायसंतापवत्कार्याणिमृणालमालिन्यादीन्यपिवर्णनीयत्वेनविवक्षि
तानीतितन्मुखेनसंतापोवगम्यः यत्रकार्यमुखेनकारणस्यावगतिरपिश्लोकेनिबद्धानतत्रायमलंकारःकिंत्व
नुमानमेव यथा परिम्लानंपीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतःपरिमिलनमप्राप्यहरितं इदंव्यस्त
न्यासंप्रशिथिलभुजाक्षेपवलनैःकृशांग्याःसंतापंवदतिनलिनीपत्रशयनं ७

नंसंघर्षमप्राप्यअंतर्मध्यभागेहरितवर्णं एवंप्रकर्षेणशिथिलयोर्भुजयोराक्षेपैश्चवलनैश्चव्यस्तःविषमीकृतोन्यासोरचनायस्यतादृशमिति
इत्यलंकारचंद्रिकायांप्रस्तुतांकुरप्रकरणं ७ ७ ७

(85)

ननुप्रस्तुतकार्याभिधानमुखेनकारणस्यगम्यत्वमपिप्रस्तुतांकुरविषयश्चेत्किं तर्हिपर्यायोक्तमित्याकांक्षायामाह पर्यायोक्तमिति वचःप्रतिपादनं भंग्यंतराश्रयं भंग्यंतरप्रकारकं लक्षणंपरिष्कुरुते यदेवेति तथाचविवक्षितस्वप्रकारातिरिक्तेनचारुतरेणरूपेणव्यंग्यस्याभिधानंपर्यायोक्तमितिलक्षणं पर्यायेणभंग्यंतरेणोक्तमभिहितंव्यंग्यंयत्रेति व्युत्पत्तेः लक्षणेस्वपदंव्यंग्यपरं नचव्यंग्यस्यैववाच्यत्वंनिष्फलंविरुद्धंचेतिवाच्यं प्रकारभेदात् तदुक्तं यदेवोच्यतेतदेवव्यंग्यंयथातुव्यंग्यंनतथोच्यतइति चारुतरेणेतिविशेषणात् नमोराहुशिरश्छेदकारिणे

> पर्यायोक्तंतुगम्यस्यवचोभंग्यंतराश्रयं नमस्तस्मैकृतोयेनमुधाराहुवधूकुचौ यदेवगम्यंविवक्षितंतस्यैवभंग्यंतरेणविवक्षितरूपादपिचारुतरेणकेनचिद्रूपांतरेणाभिधानंपर्यायोक्तं उत्तरार्धमुदाहरणं अत्रभगवान्वासुदेवःस्वासाधारणरूपेणगम्यःराहुवधूकुचवैयर्थ्यकारकत्वेनरूपांतरेणसएवाभिहितः

दुःखहारिणेइत्यत्रनपर्यायोक्तप्रसंगः स्वासाधारणरूपेण वासुदेवत्वेन यत्तुराहुशिरश्छेदकारित्वरूपव्यंग्यमादायैवपर्यायोक्तंवक्तुमर्हंनतुविशेषणसामर्थ्यलभ्यं वासुदेवत्वमादायेति तदयुक्तं राहुशिरश्छेदकारित्वस्यवाच्यसिद्ध्यंगत्वेनतेनापिविवक्षितंव्यंग्यंप्रधानभूतंवासुदेवत्वंतदादायैवतत्कथनोचित्यात् राहुस्त्रीकुचनैष्फल्यकारिणेहरयेनमइत्यत्रतुराहुशिरश्छेदकारित्वमेवविवक्षितंव्यंग्यमितियुक्तंतदादायपर्यायोक्तमितिविभावनीयं

लोकमिति यस्याक्षपादस्यांघ्रिः लोकंपश्यतिअथवसः लोकः यस्यपतंजलेःशेषावतारस्यांघ्रिंनपश्यत्तिउरगत्वात् ताभ्यांअक्षपादपतंजलिभ्यां अपरिछेद्या अनाकलनीया निवेद्यतामिति नलंप्रतिदमयंत्याउक्तिः तवअल्पदयंमनः कर्तृशिरीषकलिकामृदुताभिमानमपनयंतौद्भौपा

लोकंपश्यतियस्यांघ्रिःसयस्यांघ्रिंनपश्यति ताभ्यामप्यपरिछेद्याविद्याविश्वगुरोस्तव
अत्रगोतमःपतंजलिश्चवस्वासाधारणरूपाभ्यांगम्योरूपांतराभ्यामभिहितौ यथावा निवेद्य
तांहंतसमापयंतौ शिरीषकोशम्रदिमाभिमानं पादौकियद्दूरमिमौप्रयासेनिधित्सते
तुछदयंमनस्ते अत्रकियद्दूरंजिगमिषेतिगम्यएवार्थोरूपांतरेणाभिहितः ७

दौकियद्दूरपर्यंतंप्रयासेनिधातुमिछति हंतखेदे एतन्निवेद्यतांकथ्यतामित्यर्थः ७ ७

कुवल० देवमिति देवतासार्वभौमं सकलदेवताधीश्वरं देवं वंदे कीदृशं जलधिरेव शरधिस्तूणं यस्य तथाभूतं त्रिपुरसंहारे शरीकृतस्य विष्णोर्विश्रां
८५ न्तिस्थानत्वात् तथा भुवनेषु विदिताः ख्याताः व्यासः प्रष्ठोऽग्र्यो येषां ते व्यासप्रमुखा वसिष्ठाद्याः यस्य वाहानां वाहनानां वेदानां अधिवाहाः
वाहनाधिकृता भवंति पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसरा इत्यमरः एवमधरं भुवनं पातालं भूषणपेटिका सर्पभूषणत्वात् पुष्करमा
काशं पुष्पवाटिका पुष्पस्थानीयचंद्रोद्गमाधारत्वात् शतमख इंद्रस्तत्प्रमुखा अग्न्यादयः दिक्पालाः शाटीपालनाधिकृताः दिगंबरत्वेन दि

यथावा देवं वंदे जलधिशरधिं देवतासार्वभौमं व्यासप्रष्ठा भुवनविदिता यस्य वाहाधिवाहाः भूषापेटी भुवनमध
रं पुष्करं पुष्पवाटी शाटीपालाः शतमखमुखाश्चंदनद्रुर्मनोभूः अत्र यस्य वेदा वाहा भुजंगमा भूषणानीत्यादित
द्वाक्यार्थव्यवस्थितौ वेदत्वाद्याकारेण गम्या एव वेदादयो व्यासप्रमुखविनेयत्वाद्याकारेणाभिहिताः ६९

शामेव शाटीरूपत्वात् मनोभूश्चंदनतरुः चंदनस्थानीयभस्मसंबंधित्वात् मदनभस्मना शिवेनांगानामनुलेपनस्य पुराणेषु प्रसिद्धेः अत्र लक्षणं
संगमयति अत्रेति व्यवस्थितौ विवक्षायां सत्यां अवगम्याः व्यंग्याः विनेयत्वेति शिक्षणीयत्वेत्यर्थः आदिना पातालगुप्तत्वादिपरिग्रहः अ
भिहिता इति वाहाद्यधिकृतत्वादिना व्यासादिप्रतिपत्तौ समानवित्तिवेद्यत्वेन व्यासादिविनेयत्वादेरपि तेष्ववगमादिति भावः ६९

साक्षाद्देवव्यासादिविनेयत्वाद्याकारेण किमिति न निर्दिष्टा इत्याशंक्याह परंत्विति यद्यप्युक्तविशेष्यविशेषणभावेपि देवतासार्वभौमत्वमवग
म्यते तथापि स्फुटप्रतिपत्त्यर्थं तद्वैपरीत्यं कृतमित्यर्थः चक्रेति योदेवः सुदर्शनचक्रस्याभियानेयाप्रसभं आज्ञातयैव राहुवधूजनस्य सुरतोत्स
वं आलिंगनस्य उद्दामाउद्दण्डतायेविलासास्तैर्वंध्यं रहितं चुंबनमात्रावशेषं चकारेत्यन्वयः विशिष्टेन उक्तविशेषणविशिष्टेन एवंच ईदृशो

परंतु देवतासार्वभौमत्वस्फुटीकरणाय विशेषणविशेष्यभावव्यत्यासेन प्रतिपादिताः अत्रालंकारसर्वस्वकृतापि पर्यायोक्त
स्य संप्रदायागतमिदमेव लक्षणमंगीकृतं गम्यस्यापि भंग्यंतरेणाभिधानं पर्यायोक्तमिति चक्राभिघात प्रसभाज्ञयैवेदं चकार यो राहु
वधूजनस्य आलिंगनोद्दामविलासवंध्यं रतोत्सवं चुंबनमात्रशेषमिति प्राचीनं तदुदाहरणं त्वन्यथा योजितं राहुवधूगतेना
विशिष्टेन रतोत्सवेन राहुशिरश्छेदः कारणरूपो गम्यत इति एवंच गम्यस्यैवाभिधानमिति लक्षणस्यानुपपत्तिमाशंक्याह
यद्गम्यं तस्यैवाभिधानायोगात्कार्यादिद्वारेणैवाभिधानं लक्षणे विवक्षितमिति लक्षणं क्लिष्टगत्या योजितं
दाहरणयोजनेन्च अनुपप

त्तिमिति गम्यस्य राहुशिरश्छेदस्य भंग्यंतरेणानभिधानादव्याप्तिमाशंक्येत्यर्थः अभिधानायोगादिति अयमाशयः अत्र हि राहुशिरश्छेदकारीति-
वासुदेव इति वा व्यंग्यं राहुवधूजनसंबंधितादृशरतोत्सवकारित्वेन प्रकारांतरेणाभिधीयत इति न वक्तुं शक्यं धर्मिणो वासुदेवस्य प्रक्रांतत्वे

नयच्छब्दाभिहितत्वेनच व्यंग्यत्वायोगात् व्यंग्यस्य चराहुशिरश्छेदकारित्वस्य वासुदेवत्वस्य वाधर्मस्य प्रकारांतरेणानभिधानात् तस्मात्पर्यायेणकार्यादिद्वारेणोक्तंगम्यमाक्षिप्तंवेतिलक्षणार्थइति अभिधानं आक्षेपोव्यंजनंवा पर्यायोक्तमिति क्वचित्पर्यायोक्त इतिपाठस्त्वयुक्तः व्यंग्येनोपलक्षितमुक्तमितिव्याख्यानग्रंथविरोधात् नविग्रहइति यच्छब्दाभिहितस्यापिभगवतोवासुदेवत्वादिनारूपांतरेणव्यंग्यतयाय

लोचनकृतापर्यायोक्तंयदन्येनप्रकारेणाभिधीयतइतीदमेवलक्षणमंगीकृत्यतदुदाहरणेचकार्येणशब्दाभिहितेनकारणंव्यंग्यंप्रदर्श्यतत्र लक्षणंलक्ष्यनामचक्लिष्टगत्यायोजितं वाच्यादन्येनप्रकारेणव्यंग्येनोपलक्षितंसद्यदभिधीयतेतत्पर्यायेणप्रकारांतरेणव्यंग्येनोपलक्षितमुक्तमि तिसर्वेयिंक्लेशः किमर्थइतिनविद्मः प्रदर्शितानिहिगम्यस्यैवरूपांतरेणाभिधानेबहून्युदाहरणानिचक्राभिघातप्रसभाज्ञयैवेतिप्राचीनोदाह रणमपिस्वरूपेणगम्यस्यभगवतोरूपांतरेणाभिधानसत्वात्सुयोजमेव ॥

थाश्रुतेबाधकाभावादितिभावः नचाभिधाविषयेकथंव्यंजनेतिवाच्यं वासुदेवत्वादिनाप्रतीयमानेभगवत्यभिधाविषयत्वासंभवात् तस्याःस्वावच्छेदकधर्मेणैवबोधकत्वात् अतएवोक्तं शक्यादन्येनरूपेण ज्ञातेभवति लक्षणेति इहतुलक्षणाहेत्वाभावाद्व्यंजनोपगम्यतइति ॥ ॥

ननु प्रस्तुतेन प्रादुर्भूततो स्वरूपेण कार्येण प्रस्तुतस्यैव राहुशिरश्छेदरूपकारणस्य प्रतीतौ चमत्कृतिविशेषस्तस्या अलंकारत्वं गमयति तच्चालोच्यमानमप्रस्तुतप्रशंसाया असंभवादुक्तरीत्या पर्यायोक्तरूपतयैव स्वीकर्तव्यमित्याशंक्याह यत्त्विति अलंकाराणामियत्तानियमाभावेन प्रस्तुतांकुरस्याप्यलंकारांतरत्वादेवंविधशब्दस्वारस्यभंगेन प्राचीनलक्षणव्याख्यानमयुक्तमितिभावः संक्षेपतो दर्शितमपि पर्यायोक्तविषयं विशदयति प्रस्तुतेनेत्यादिना यत्तु भगवद्रूपेणावगमनं विशेषणमर्यादालभ्यत्वेनासुंदरं पर्यायोक्तस्य विषय इति तदविचारितरमणीयं नहि पर्यायोक्ते व्यंग्य

यत्तु तत्र राहुशिरश्छेदावगमनं तत्र प्रागुक्तरीत्या प्रस्तुतांकुर एव प्रस्तुतेन च राहोः शिरोमात्रावशेषेणालिंगनवंध्यत्वाद्यापादानरूपे वाच्ये भगवतो रूपांतरे उपपादिते तेन भगवतः स्वरूपेणावगमनं पर्यायोक्तस्य विषयः

सौंदर्यकृतो विच्छित्तिविशेषः

किंतु भंग्यंतराभिधानकृत एव व्यंग्यं तु भंग्यंतराभिधानतोऽसुंदरमेव प्रायशो दृश्यते यथा इहागंतव्यमिति विवक्षिते व्यंग्ये अयं देशोऽलंकरणीयः सफलतामुपनेतव्य इत्यादावतस्तदसुंदरत्वोद्भावनमकिंचित्करमेव अलंकारसर्वस्वकारग्रंथविरोधोद्भावनं तु तच्छिक्षाकारिणं प्रति न शोभते उपजीव्यत्वोद्भावनमपि ग्रंथस्याकिंचित्करमेव युक्तिविरोध इति परोत्कर्षासहिष्णुत्वमात्रमुद्भावयितुरवगमयतीत्यलं विस्तरेण ८५

(४४)

प्रकारांतरेणपर्यायोक्तंलक्षयति पर्यायोक्तमिति रमणीयेनव्याजेनमिषेणस्वस्यपरस्यवाइष्टस्ययत्साधनंसंपादनंतदपिपर्यायोक्तं पर्यायेण व्याजरूपेणोक्तंयत्रेतिव्युत्पत्तेः संपादनेति संपादनरूपंयदिष्टंतत्साधनंतत्करणमित्यर्थः देहीति परिधानेनअधरवस्त्रेणनिगूहितमाच्छा

पर्यायोक्तलक्ष्याऊयद्याजेनेष्टसाधनं यामिचूतलतांद्रष्टुं युवाभ्यामास्यतामिह अत्रनायिकांनाय केनसंगमय्यचूतलतादर्शनव्याजेननिर्गछंत्यासख्यातत्स्वाछंद्यसंपादनरूपेष्टसाधनंपर्यायोक्तं यथावा देहिमत्कंदुकंराधेपरिधाननिगूहितं इतिविस्रंसयन्नीवींतस्याःकृष्णोमुदेस्तुनः पूर्वत्रपरे ष्टसाधनमत्रकंदुकशोधनार्थंनीवीविस्रंसनव्याजेनस्वेष्टसाधनमितिभेदः ६ ॐ ६

दितमित्यर्थः एवंचप्रकारद्वयसाधारणंतदन्यतरत्वंसामान्यलक्षणंबोध्यं इत्यलंकारचंद्रिकायांपर्यायोक्तप्रकरणम् ७

उक्तिरिति अत्र निंदास्तुतिभ्यामिति स्तुतिनिंदयोरिति चेतरेतरयोगो न विवक्षितः तथाच निंदया स्तुतेः स्तुत्या च निंदायाः स्तुत्या स्तुतेश्चोक्तिरभिव्य
क्तिर्व्याजस्तुतिरित्यर्थः प्रथमे व्याजेन स्तुतिरिति चरमयोर्व्याजरूपा स्तुतिरिति च व्युत्पत्तेः अत एव व्याजस्तुतिपदार्थानुगमाभावान्निंदया निंदाभि
व्यक्तिर्व्याजनिंदाख्यमलंकारांतरमित्यग्रे वक्ष्यते एवमाद्ये प्रकारद्वये स्तुतिनिंदयोः समानविषयत्वभिन्नविषयत्वाभ्यां प्रत्येकं द्वैविध्यमिति च

उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवं साधु दूति पुनः साधु कर्तव्यं कि
मतः परं यन्मदर्थे विलूनासि दंतैरपि नखैरपि निंदया स्तुतेः स्तुत्या निंदाया वा अवगमनं व्याजस्तुतिः कः स्वर्धुनी त्वुदा
हरणे विवेको नास्तीति निंदा व्याजेन गंगा सुकृतिवदेव महापातकादिकृतवतोपि स्वर्गं नयतीति व्याजरूपया निंदया त
त्स्वभावातिशयस्तुतिः साधु दूतीत्युदाहरणे मदर्थं महांतं क्लेशमनुभूतवत्यसीति व्याजरूपया स्तुत्या मदर्थं न गतासि
किंतु रंतुमेव गतासि धिक्त्वां दूतीकाधर्मविरुद्धकारिणीमिति निंदावगम्यते ॥

त्वारो भेदाः अंत्यस्तु भिन्नविषयस्तुतिक एक एवेति पंच भेदाः लक्षणं तु व्याजनिंदाभिन्नत्वे सति स्तुतिनिंदान्यतरपर्यवसायि स्तुतिनिंदान्यतरत्वं
सर्वानुगतं बोध्यं

कुवल० ८८

कस्तइति नृपंप्रतिकवेरुक्तिः त्वयियोद्धुमेकंसप्तिमश्वमास्थिते आरूढेसतिपरिपंथिनःशत्रवःसप्ताश्वसमारूढाभवंतीत्यन्वयः सप्तसप्तयोऽश्वा अस्येतिसूर्यःसप्तचतेसप्तयःअश्वास्तत्समारूढाइतिद्वितीयोर्थोनिंदाद्योतकः त्वयासंमुखाहताः सूर्यमंडलंभित्वा दिवमुपगताइतिस्तुतौ पर्यवसानं अर्द्धमिति शिवस्यदेहार्धंदानवानांवैरिणाहरिणाआत्तं हरिहरात्मकस्यैकस्यविग्रहस्यप्रसिद्धेः एवंगिरिजयाप्यवशिष्टार्धमा-

यथावा कस्तेशौर्यमदोयोद्धुंत्वय्येकंसप्तिमास्थिते सप्तसप्तिसमारूढाभवंतिपरिपंथिनः अ
र्द्धंदानववैरिणागिरिजयाप्यर्द्धंशिवस्यात्तंदेवेत्थंजगतीतलेस्मरहराभावेसमुन्मीलति गंगासा
गरमंबरंशशिकलानागाधिपःक्ष्मातलंसर्वज्ञत्वमधीश्वरत्वमगमत्त्वांमांचभिक्षाटनं ७

त्तं हेदेवराजन् इत्थमुक्तप्रकारेणजगतीतलेस्मरहरस्याभावेसमुन्मीलतिप्रकाशमानेसति गंगासागरंप्रत्यगमदित्याद्यन्वयः नागाधिपः शेषः क्ष्मातलंपातालं त्वामितिपूर्वान्वितं ॐ ७ ७ ७

चं० ८८

वैदुष्यादीति विद्वत्तादीत्यर्थः आदिनातपः शीलादिपरिग्रहः दारिद्र्यादीत्यादिपदेनकुटुंबबाहुल्यादिपरिग्रहः नचात्रराजवर्णनप्रस्तावेकथंस्तुते
र्व्याजरूपत्वमितिवाच्यं स्तुतिपर्यवसानविवक्षायांस्वकीयभिक्षाटनोद्घाटनस्यासंगतत्वेनस्तुतेरुक्तनिंदारूपोपालंभपर्यवसानस्यानुभवसिद्धस्या
विरुद्धत्वात् कस्त्वमिति अंगदंप्रतिकस्यचिद्राक्षसस्यप्रश्नः रामरूपस्यराज्ञोभदनेलेखार्थस्यसंदेशस्यवाहकोस्मीत्युत्तरं पुरापूर्वमागतः निर्दग्धलंका

अत्राद्योदाहरणेसप्तसप्तिपदगतश्लेषमूलनिंदाव्याजेनस्तुतिर्व्यज्यते द्वितीयोदाहरणेसर्वज्ञःसर्वेश्वरोसीतिराज्ञःस्तुत्याव्या
जरूपयामदीयवैदुष्यादिदारिद्र्यादिसर्वंजानन्नपिबहुप्रदानेनरक्षितुंशक्तोपिमह्यंकिमपिनददासीतिनिंदाव्यज्यते सर्वमिदंनिं
दास्तुत्योरेकविषयत्वेउदाहरणं भिन्नविषयत्वेनिंदयास्तुत्यभिव्यक्तिर्यथा कस्त्वंवानररामराजभवनेलेखार्थसंवाहकोयातः
कुत्रपुरागतःसहनुमान्निर्दग्धलंकापुरः बद्धोराक्षससूनुनेतिकपिभिःसंताडितस्तर्जितःसव्रीडात्तपराभवोवनमृगःकु
त्रेतिनज्ञायते अत्रहनुमन्निंदयाइतरवानरस्तुत्यभिव्यक्तिः

पुरःसहनुमान्कुत्रयातइतिपुनःपूर्वस्यप्रश्नः बद्धइत्याद्युत्तराधमंगस
स्योत्तरं राक्षसस्यरावणस्यसूनुनाबद्धइतिहेतोःकपिभिर्वानरैःसम्यक्ताडितस्तर्जितःसवनमृगःहनुमान्व्रीडयालज्जयाआत्तःप्राप्तःप
राभवोयेनतादृशःकुत्रयातइतिनज्ञायतइत्यन्वयः ७ ७ ७

यदिति हेकुरंगयद्यस्माद्धनिनांसुखंमुहुर्मुहुर्वारंवारंनेक्षसेनपश्यसि मृषामिथ्याचाटून्प्रियशब्दान्नवदसि यदितिसर्वत्रसंबध्यते एषांधनिनां गर्वयुक्तंवचनंनशृणोषि तान्धनिकान्प्रतिआशयाधनाशयानधावसि परंकेवलंकालेक्षुधासमये खादसिभक्षयसिनिद्रायाआगमेचनिद्रांप्राप्नोषि

स्तुत्यानिंदाभिव्यक्तिर्यथा यदुक्तंमुहुरीक्षसेनधनिनांब्रूषेनचाटून्मृषानैषांगर्ववचःशृणोषिनचतान्प्रत्याशयाधावसि काले बालतृणानिखादसिपरंनिद्रासिनिद्रागमेतन्मेब्रूहिकुरंगकुत्रभवताकिंनामतत्पस्तपः अत्रहरिणस्तुत्याराजसेवानिर्विण्णस्यात्मनोनिंदाऽभिव्यज्यते अयमप्रस्तुतप्रशंसाविषयइतिअलंकारसर्वस्वकारः तेनहिसारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणानंतरंवैधर्म्येणापिदृश्यते यथा धन्याःखलुवनेवाताःकाल्हाराःसुखशीतलाः राममिंदीवरश्यामंयेस्पृशंत्यनिवारिताः अत्रवाताधन्याइतिअप्रस्तुतार्थादहमधन्यइतिवैधर्म्येणप्रस्तुतोर्थःप्रतीयतइतिव्युत्पादितं इयमेवाप्रस्तुतप्रशंसानकार्यकारणनिबंधनेतिदंडी

तत्तस्मात्कुत्रतीर्थेकिंनामतपस्तप्तंतत्ब्रूहीत्यन्वयः निर्विण्णस्यखिन्नस्य तेनहीत्यस्यइतिव्युत्पादितमित्यग्रेतनेनान्वयः कल्हारंजलपुष्पविशेषः तत्संबंधिनःकाल्हाराःसुखयंतीतिसुखाश्चतेशीतलाश्चेत्यर्थः ७९

अप्रकांडे अप्रस्तावे तथाचाप्रस्तुताचासौ प्रशंसा चेति स्तुत्युत्पत्तिरिति भावः नपरसेविनोऽपरसेविनः प्रशस्यते स्तूयते मत इयेप्यस्वरसबीजं दर्शयति व
स्तुतस्त्विति अभिव्यक्तिरितियोऽप्रस्तुतप्रशंसातो वैचित्र्यस्य विषय आलंबनभूतो विशेष इत्यन्वयः अन्यथा ततो वैचित्र्येपि तदंतर्भावांगीकारे

यदाह अप्रस्तुतप्रशंसास्यादप्रकांडे तु या स्तुतिः सुखं जीवंति हरिणा वनेष्वपरसेविनः अर्थैरयत्न
सुलभैर्जलदर्भांकुरादिभिः सेयमप्रस्तुते ष्वात्र मृगवृत्तिः प्रशस्यते राजानुवर्तनक्लेशनिर्विण्णेन मनस्वि
नेति वस्तुतस्त्वत्र व्याजस्तुतिरित्येव युक्तं स्तुत्या निंदाभिव्यक्तिरित्यप्रस्तुतप्रशंसातो वैचित्र्यविशेषसद्भा
वात् अन्यथा प्रसिद्धव्याजस्तुत्युदाहरणेष्वप्यप्रस्तुताभ्यां निंदास्तुतिभ्यां प्रस्तुते स्तुतिनिंदे गम्येते इत्येता
वता व्याजस्तुतिमात्रमप्रस्तुतप्रशंसा स्यात् एवं चानया प्रक्रियया यत्रान्यगतस्तुतिविवक्षयान्यस्तुतिः
क्रियते तत्रापि व्याजस्तुतिरेव अन्यस्तुतिव्याजेन तदन्यस्तुतिरित्यर्थानुगमसद्भावात् ६९

एवंचेति अन्यगतस्तुतिनिंदाभ्यामन्यगतनिंदास्तुत्यभिव्यक्त्यो र्व्याजस्तुतित्वसिद्धौ चेत्यर्थः प्रक्रियया प्रकारेण ॐ

शिखरिणीति नायिकांप्रतिनायकस्योक्तिः हेतरुणिअसौशुकबालकः नामवितर्के कनुकस्मिन् शिखरिणिपर्वते कियत्कालंचिरंकिमभिधानं किंनामकंतपः अकरोद्येनहेतुनातवाधरवत्पाटलंरक्तवर्णंबिंबफलंदशतीत्यन्वयः इत्यलंकारचंद्रिकायांव्याजस्तुतिप्रकरणं
व्याजनिंदांलक्षयति निंदायाइति यत्रान्यनिंदयाऽन्यस्यनिंदायाअभिव्यक्तिःपर्यवस्यतिसाव्याजनिंदा इतरनिंदाव्याजेननिंदेतिव्युत्पत्तेः वि

यथा शिखरिणिकनुनामकियच्चिरंकिमभिधानमसावकरोत्तपः तरुणियेनतवाधर
पाटलंदशतिबिंबफलंशुकशावकः अत्रशुकशावकस्तुत्यानायिकाधरसौभाग्यातिशयस्तु
तिर्व्यज्यते निंदायानिंदयाव्यक्तिर्व्याजनिंदेतिगीयते विधेसनिंद्योयस्तेप्रागेकमेवाहर-
च्छिरः अत्रहरनिंदयाविषमविपाकंसंसारंप्रवर्तयतोविधेरभिव्यंग्यानिंदाव्याजनिंदा ६

धेइति हेविधेब्रह्मन् प्राक्पूर्वंतितवैकमेवशिरोयः अहरत् अछिनत् सएवार्थात् हरोनिंद्य इत्यन्वयः निंदयेत्यभिव्यंग्येत्यनेनान्वितं निंदया
भिव्यंग्याविधेर्निंदाव्याजनिंदे त्यन्वयः विषमविपाकं दारुणपरिणामं ॐ ६ ६

विधिरेवेति विशेषतोगर्हणीयः निंदनीयः हे करट काक त्वं रटरटनं कुरु योसौ विधिः आम्रवृक्षे सरलेन सौम्येन कोकिलेन सहवासं तव चक्का रेत्यन्वयः ननु केनाप्यालंकारिकेणानुक्ताया व्याजनिंदायाः कथमलंकारत्वेनांगीकरणमित्याशंक्याह प्रतिबंदीति तुल्ययुक्त्या प्रतिबंदी स्थानीयेत्यर्थः तथा च स्तुतिवन्निंदायामप्यप्रस्तुतप्रशंसातो वैचित्र्यविशेषात्तदनंतर्भावे व्याजस्तुतौ चार्थानुगमाभावादनंतर्भावे पृथगलं

यथा वा विधिरेव विशेषगर्हणीयः करट त्वं रटकस्तवापराधः सहकारतरौ न्नकारयस्ते सहवासं सरलेन कोकिलेन

अन्यस्तुत्यान्यस्तुत्यभिव्यक्तिरिति पंचमप्रकारव्याजस्तुतिप्रतिबंदीभूतेयं व्याजनिंदा ननु यत्रान्यस्तुत्यान्यस्तुतेरन्य निंद्यान्यनिंदायाश्च प्रतीतिः तत्र व्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमे स्तुतिनिंदारूपाप्रस्तुतप्रशंसोदाहरणेष्व प्रस्तुतप्रशंसा न वक्तव्या तेषामपि व्याजस्तुतिव्याजनिंदाभ्यां क्रोडीकारसंभवादिति चेदुच्यते ६ ५

कारताया औचित्यायातत्वात्प्राचीनैरनुक्तापि स्वीकर्तुमुचितेत्याशयः प्रागुक्तयोरेकः छतीशकुंते पित्वा बद्धक्षत्रिमेत्यनयोरप्रस्तुतप्रशंसोदा हरणत्वासंगतिमाशंकते नन्विति क्रोडीकारः स्वविषयीकरणं अन्यत्र लब्धात्मकस्यालंकारद्वयस्य क्वचित्संकरेपि न दोष इत्याशयेन समाधत्ते ❀ ६ ६ ६

यत्रेति एतच्च इत्यादावित्यनेनान्वितं अस्याः अप्रस्तुतप्रशंसायाः सैव अप्रस्तुतप्रशंसैव ७ ७ ७

यत्राप्रस्तुतवृत्तांतात्स्तुतिनिंदारूपात्तत्सरूपः प्रस्तुतवृत्तांतः प्रतीयते अंतश्छिद्राणि भूयांसीत्यादौ तत्र लब्धावकाशासारूप्यनिबंधनाप्रस्तुतप्रशंसा अत्रापि वर्तमाना न निवारयितुं शक्या अन्यस्तुत्याऽन्यस्तुतिरन्यनिंदयान्यनिंदेत्येवं व्याजस्तुतिव्याजनिंदेऽपि संभवतश्चेत्काममते अपि संभवेतां न त्वस्याः परित्यागः यद्यपि विधिरेव विशेषगर्हणीय इति श्लोके विधिनिंदया तन्मूलकाकनिंदया च विशेषज्ञस्य प्रभोस्तेन न्यविद्वत्समतयास्थापितस्य मूर्खस्य च निंदा प्रतीयत इति तत्र सारूप्यनिबंधनाऽप्रस्तुतप्रशंसाप्यस्ति तथापि सेव व्याजनिंदामूलेति प्रथमोपस्थिता सापि तत्र दुर्वारा एवं च व्याजनिंदामूलकव्याजनिंदारूपेयमप्रस्तुतप्रशंसेति चमत्कारातिशयः एवमेव व्याजस्तुतिमूलकव्याजस्तुतिरूपाप्यप्रस्तुतप्रशंसा दृश्यते यथा वा ७ ७ ७

लावण्येति इमां तन्वीं तन्वता सृजता वेधसा चेतसि कोऽर्थः कामनाविषयभूतः विनिहितः अभिसंहितः किं प्रयोजनमुद्दिश्येयं निर्मितेत्यर्थः

लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः स्वच्छंदं चरतो जनस्य हृदये चिंताज्वरो निर्मितः एषापि स्वगुणानुरूपरमणाभावाद्वराकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां तन्वता अत्र प्रस्तुतायास्तरुण्याः स्तुतिर्निंदाव्याजेन तन्निंदाव्याजेन च तत्सौंदर्यप्रशंसा प्रशंसनीयत्वेन कविविवक्षितायाः स्वकवितायाः स्तुतिर्निंदाव्याजेन तन्निंदाव्याजेन च शब्दार्थचमत्कारातिशयप्रशंसायां पर्यवस्यति अस्य श्लोकस्य वाच्यार्थविषये यद्यपि नात्यंतसामंजस्यं नहीमे विकल्पा वीतरागस्येति कल्पयितुं शक्यं रसाननुगुणत्वात् वीतरागहृदयस्याप्येवंविधविषयेषु प्रवृत्तेश्च नापि रागिण इति युज्यते तदीयविकल्पेषु वराकीति रूपणतालिंगितस्य हतेत्यमंगलोपहितस्य च वचसोऽनुचितत्वात्तुल्यरमणाभावादित्यस्यात्यंतमनुचितत्वाच्च स्वात्मनि तदनुरूपता संभावनायामपि रागित्वे हि पशुप्रायता स्यात्

नन्वनायासेनातिसुंदरतन्वीनिष्पत्तिरेव प्रयोजनं तदभावेपि वा लीलामात्रेण

93

न्निर्माणं स्यादत आह लावण्येत्यादि यतो लावण्यरूपस्य द्रविणस्य धनस्य व्ययो न गणितः महान्क्लेशोऽर्जितः कृतः स्वेच्छाचारिणो जनस्य उदासीनस्यापि हृदये चिंतैव ज्वरो निर्मितः एषापि वराकी दीना स्वगुणानुरूपस्य वरस्याभावाद्धतैव हतानष्टप्राया तथा च बहुायासस्साध्यत्वादनिष्टानुबंधित्वाच्च न तन्व्याः प्रयोजनत्वं नापि लीलामात्रेण तन्निर्माणं च संभवतीति भावः तन्निंदाव्याजेन तरुणीनिंदाव्याजेन तत्सौंदर्यप्रशंसा शब्दार्थचमत्कारातिशयप्रशंसायां पर्यवस्यतीत्यन्वयः तन्निंदाव्याजेन स्वकवितानिंदाव्याजेन कवितासौंदर्यरूपप्रस्तुतार्थस्यात्यंतमस्फुटत्वात्कथमस्य पद्यस्य तत्सरत्वमित्याशंकामपनेतुं भूमिकामारचयति अस्येत्यादि रसाननुगुणत्वादिति वीतरागे शृंगारस्यासंभवादिति भावः ननु शृंगारासंभवेपि तन्वीनिर्माणनिंदया शांतरसपरिपोषादस्यैव रसानुगुणत्वमत आह वीतरागेति नापि रागिण इत्यनंतरं इमे विकल्पा इत्यनुषज्यते ⁝⁝⁝ ७ ७ ७

विवक्षितेति स्वकवितासौंदर्यरूपेत्यर्थः अतएव वाच्यार्थासामंजस्यादेव वाच्यासंभवेपि वाच्यसामंजस्यासंभवेपि तथाच वाच्यार्थासामंजस्य
मेवास्फुटेप्यप्रस्तुतार्थतात्पर्यंगमयतीति भावः इत्यलंकारचंद्रिकायां व्याजनिंदाप्रकरणं आक्षेपइति स्वयमुक्तस्यार्थस्य किंचिन्नि

तथापि विवक्षित प्रस्तुतार्थतायां न किंचिदसामंजस्यं अतएवास्य श्लोकस्याप्रस्तुतप्रशंसा
परत्वमुक्तं प्राचीनैः वाच्यासंभवेप्यप्रस्तुतप्रशंसोपपत्तेरिति आक्षेपः स्वयमुक्तस्य प्रति
षेधो विचारणात् चंद्रसंदर्शयात्मानमथवास्तिप्रियामुखं अत्र प्रार्थितस्य चंद्रदर्शनस्य प्रिया
मुखसत्वेनानर्थक्यं विचार्य अथवेत्यादि सूचितः प्रतिषेध आक्षेपः

मित्तमभिसंधाय प्रतिषेध आक्षेपः सूचिते
ति पक्षांतरपरिग्रहस्य पूर्वपक्षप्रतिक्षेपनियतत्वादिति भावः नचात्र कैमर्थ्यरूपपंचमप्रतीपप्रभेदेन गतार्थत्वं शंकनीयं तस्यात्र प्रतिषेधं प्र
तिनिमित्तत्वेनाप्राधान्यात् ७ ७ ५ ६

असंदिग्धमुदाहरति साहित्येति हे कविश्रेष्ठाः साहित्यसमुद्ररूपाणां भारतादीनां मंथनादिव परिशीलनादुत्थितं उत्सन्नं कर्णयोरमृतमिवाह्लादकं काव्यं रक्षत यद्यस्मात्तस्य लुंठनार्थं दैत्या इव काव्यरूपस्यार्थस्य वित्तस्य चोराः प्रगुणीभवंति बद्धलीभवंतीत्यन्वयः गृह्णंत्विति यदिवेत्यथवेत्य

यथावा साहित्यपाथोनिधिमंथनोत्थं कर्णामृतं रक्षत हे कवींद्राः यत्तस्य दैत्या इव लुंठनाय काव्यार्थचोराः प्रगुणीभवंति गृह्णंतु सर्वे यदि वा यथेच्छं नास्ति क्षतिः कापि कवीश्वराणां रत्नेषु लुप्तेषु बहूष्वमर्त्यैरद्यापि रत्नाकर एव सिंधुः अत्र प्रथमश्लोकेन प्रार्थितस्य काव्यार्थचोरेभ्यो रक्षणस्य स्वोल्लिखितवैचित्र्याणां समुद्रगतरत्नजालवदक्षयत्वं विचिंत्य प्रतिषेध आक्षेपः निषेधाभासमाक्षेपं बुधाः केचन मन्वते नाहं दूती तनोस्तापस्तस्याः कालानलोपमः केचिदलंकारसर्वस्वकारादय इत्थमाहुः न निषेधमात्रमाक्षेपः किंतु यो निषेधो बाधितः सन् अर्थांतरपर्यवसितः किंचिद्विशेषमाक्षिपति स आक्षेपः

नेन समानार्थं लुप्तेषु अपहृतेषु स्वोल्लिखितेति स्वयमुद्भावितेत्यर्थः वैचित्र्याणां अर्थवैचित्र्याणां अर्थांतरपर्यवसितः अर्थांतरप्रतियोगिकत्वेनावस्थितः विशेषं व्यंग्यार्थविशेषं ॐ

संघटनेति संयोजनकालेउचितंयत्कैतववचनंमिथ्यावचनंतस्यपरिहारस्तेनोपलक्षितेयथार्थवादित्वे इत्यर्थः नाहंदूतीत्यत्रहिदूतीपदे नदूतीगतमिथ्यावादित्वविशिष्टंलक्ष्यतेतद्भावस्तुयद्यपिनयथार्थवादित्वंतथापितदुपलक्ष्यत्वात्तत्पर्यवसानोक्तिः नरेंद्रेति संधिकरण।

यथादूत्याउक्तौनाहंदूतीति निषेधोबाधितत्वादाभासरूपःसंघटनकालोचितकैतववचनपरिहारेण यथार्थवादित्वेपर्यवस्यन्निदानीमेवागत्यनायिकोज्जीवनीयेति विशेषमाक्षिपति यथावा नरेंद्रमौले नवयंराजसंदेशहारिणः जगत्कुटुंबिनस्तेद्यनशत्रुःकश्चिदीक्ष्यते अत्रसंदेशहारिणामुक्तौनवयं संदेशहारिणइतिनिषेधोनुपपन्नःसंधिकालोचितकैतववचनपरिहारेणयथार्थवादित्वेपर्यवस्यन्सर्व जगतीपालकस्यतवनकश्चिदपिशत्रुभावेनावलोकनीयःकिंतुसर्वेपिराजानोभृत्यभावेनसंरक्षणीया इतिविशेषमाक्षिपति

र्थमागतानांदूतानामुक्तिः नरेंद्राणांराज्ञांमौलिःश्रेष्ठः संधीतिसंधिकालेउचितंयत्कैतववचनंत त्परिहारेणोपलक्षितेइतिपूर्ववदर्थः अत्राङ्कःसंदेशहारिषुतन्निषेधस्यबाधात्संदेशहारिपदेनकैतववचनप्रयोक्तृत्वविशिष्टंलक्ष्यते तन्निषे

धेनचसत्यवादित्वरूपो विशेषो व्यज्यत इत्ययमेव निषेधेन विशेषाक्षेपो न तु सर्वजगतीपालकस्येत्यादिर्विशेषो निषेधेन केवलेनाक्षेप्तुं शक्यते तस्यज गत्कुटुंबिन इत्युत्तरार्धगम्यत्वात् एवं स्थिते कथमुच्यते तव न कश्चिदपीत्यादीति तत्रोच्यते नवयमिति निषेधाभावे केवलादुत्तरार्धान्नोक्तविशेषावगतिः स्यात् संधिकालोचितके तव वचनत्वेनैव संभाव्यमानत्वात् अपि तु तत्कालीनसंध्यभिप्रायमात्रावगमः निषेधेन तु तत्परिहारे युक्त उक्तविशेषावगम इत्यनुभवसाक्षिकमेतत् सत्यवादित्वादिकं तूक्तविशेषे व्यंजनीये द्वारभूतं न तु तदेव विशेषरूपमचमत्कारित्वात् अतएव ना

आक्षेपोन्यो विधौ व्यक्ते निषेधे च तिरोहिते गच्छ गच्छसि चेत्कांत तत्रैव स्याज्जनिर्मम अत्र गच्छेति विधिर्व्यक्तः मागा इति

निषेधस्तिरोहितः कांतो दृश्य देशे निजजन्म प्रार्थनयात्ममरणसंसूचनेन गर्भीकृतः यथावा नचिरं मम तापाय तव यात्रा

भविष्यति यदि यास्यसि यातव्यमलमाशंकयापि ते अत्रापि न चिरं मम तापायेति स्वमरणसंसूचनेन गमननिषेधो गर्भीकृतः

हं दूतीत्यत्र वस्तुवादित्वादिर्विशेषो व्यज्यत इत्यलंकारसर्वस्वकारः वस्तुवादित्वमादिद्वारिभूतं यस्य तादृशो विशेष इति तदर्थ इति एतेन नाहं दूतीति पूर्वोदाहरणमपि व्याख्यातं अस्यैव प्रभेदांतरमाह आक्षेपोन्य इति प्रार्थनया मरणसूचनद्वारेण गर्भितः व्यंग्यत्वेनांतर्भावितः एतच्चातिरोहित इत्यस्यार्थकथनं तदेवमपह्नुतिभिन्नत्वे सति चमत्कारकारिनिषेधत्वं सामान्यलक्षणं बोध्यं इत्यलंकारचंद्रिकायामाक्षेपालं-कारप्रकरणं ॐ

आभासत्वइति विरोधस्य आभासत्वे आपाततो भासमानत्वे सति विरोधाभासो नामालंकारः आभासत इत्याभासः विरोधश्चासावाभासश्चेति व्युत्प
त्तेः ईषदर्थकेन चाङा भानस्यापातरूपत्वमर्थांतरपरिहार्यत्वरूपं बोध्यते तथा चैकाधिकरण्येन प्रतीयमानयोः कार्यकारणत्वेनागृह्यमाणयोर्ध
र्मयोराभासमानाऽपर्यवसन्नविरोधत्वं लक्षणं द्रष्टव्यं शनिरशनिश्च तमुच्चैरित्यादावतिव्याप्तिवारणायाद्यं विशेषणं अप्यलाक्षारसासिक्तं रक्तं

आभासत्वे विरोधस्य विरोधाभास इष्यते विनापि तन्विहारेण वक्षोजौ तव हारिणो

अत्र हाररहितावपि हारिणौ हृद्याविति श्लेषमूलको विरोधाभासः यथा वा ७

तच्चरणद्वयमिति विभावनावारणाय द्वितीयं पर्यवसितस्य विरोधस्य दोषत्वादपर्यवसन्नत्वं विरोधविशेषणमिति दिक् श्लेषेति हारोऽन
योरस्तीत्यर्थे विरोधः मनोहारिणावित्यर्थेन तत्परिहारः

६ ६

प्रतीपेति तस्मान्नलात् भयेन कृत्वा प्रतिकूलनृपैरिव विरुद्धधर्मैरपि भेतृताभेदकारिता त्यक्ता किमित्युत्प्रेक्षा यस्मात्स नलः अमित्राणां शत्रूणां जयकृदपि ओजसा मित्रस्य रवेर्जयकृत् अथच मित्रजिदेव नमित्रजिदिति विरोधः चारदृष्टिरपि विचारे दृष्टिर्यस्य तादृशः विगतचारदृगिति च विरोधः विरोधेति विरोधसमाधानरूपोत्प्रेक्षाशिरःप्रधानं यस्य तादृश इत्यर्थः यत्तु विरोधसमाधानात्मिकया मुखस्थितयोत्प्रेक्षया विरोधस्यो

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेतृतोज्झिता अमित्रजिन्मित्रजिदोजसा स यद्वि
चारदृक्चारदृगप्यवर्तत अत्र विरोधसमाधानोत्प्रेक्षाशिरस्को विरोधाभास इति पूर्वस्माद्भेदः ९

त्थानमेव भग्नमिति कथमत्र विरोधालंकार इति केनचित्सुमनसापि विमनसेवाभिहितं तदसारं विरोधभानमंतरेण विरुद्धधर्मैरपीत्याद्युत्प्रेक्षाया एवानुत्थानेन श्लेषमूलमाभासमानं विरोधमुपजीव्यैव विरोधत्यागोत्प्रेक्षाया अर्थांतरानुगृहीतायास्तत्समाधानत्वेन पश्चादवस्थितत्वादिति

इत्यलंकारचंद्रिकायां विरोधप्रकरणं ९ ९

विभावनेनि प्रसिद्धेकारणाभावेपिकार्योत्पत्तिर्विभावनालंकारः विभाव्यतेकारणांतरंयस्यामितिव्युत्पत्तेः कारणाभावश्च शाब्द आर्थोवेतिस
र्वत्रलक्षणसमन्वयोबोध्यः एतदेवतंत्रेणसकलविभावनाप्रकारसाधारणंसामान्यलक्षणमाद्यप्रकारविशेषलक्षणंचबोध्यं तत्राद्यंदर्शितमे
व द्वितीयंतुकारणान्विताभावकथनपूर्वकंकार्योत्पत्तिकथनमित्युदाहरणविशेषबलादेवगम्यत इतिविविच्यनदर्शितं प्रतिबंधकेसतिकार्यो
त्पत्तिरूपेतृतीयप्रकारेऽतिव्याप्तेर्वारणायान्वितेति तत्रप्रतिबंधकस्यवस्तुतः कारणाभावरूपस्यकथनेपिनकारणान्वितत्वेनकथनमितितन्निरासः

विभावनाविनापिस्यात्कारणंकार्यजन्मचेत् अप्यलाक्षारसासिक्तंरक्तंत्वच्चरणद्वयं अत्रला
क्षारसासेकरूपकारणाभावेपिरक्तिमाकथितः स्वाभाविकत्वेनविरोधपरिहारः यथावा अपी
तक्षीबकादंबमसंमृष्टामलांबरं अप्रसादितसूक्ष्मांबुजगदासीन्मनोरमं

प्रकारपंचकेपिकारणान्विताभावस्यार्थतोग
म्यत्वात्कथनेति अप्यलाक्षेति लाक्षारसेनआसमंतात्सिक्तंलाक्षारसासिक्तं पश्चान्नञ्समासः तस्याः कामिन्याः अपीतेति अपीताःपानशू
न्याः क्षीबामत्ताः कादंबाः कलहंसायत्र तथा असंमृष्टंसंमार्जनशून्यममलमंबरमाकाशंयत्र एवमप्रसादितंवस्त्रगालनकतकक्षोदप्रक्षेपा
दिनायत्प्रसादनंतच्छून्यंसूक्ष्मंलघ्वंबुयत्रैवंभूतंजगन्मनोहरमासीदित्यन्वयः परमार्थतस्तु शुद्धां बिलेवकाव्यादर्शेदृष्टःपाठः ६,

विभाव्यमानेति वर्ण्यमानेत्यर्थः वरेति वरतनोः केशपाशरचनासंपादकेन अत एव सुरभिनखेन राज्ञो हस्तेन अवचितकुसुमालून पुष्पापिल

अन्नपानादिप्रसिद्धहेत्वभावेपि क्षीबत्वादिनिबद्धं विभाव्यमानशारत्समयहेतुकत्वेन विरोधपरिहारः यथावा वरतनुकबरीविधायिना सुरभिनखेन नरेंद्रपाणिना अवचितकुसुमापिवल्लरी समजनि हंतनिलीनषट्पदा अत्र वल्लर्यां पुष्पाभावेपि भृंगालिंगनं निबद्धं तत्र वरतनुकबरीसंक्रांतसौरभनरपतिनखसंसर्गरूपं हेत्वंतरं विशेषणमुखेन दर्शितमिति विरोधपरिहारः हेतूनामसमग्रत्वे कार्योत्पत्तिश्च दसामता अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः अत्र जगज्जये साध्ये हेतूनामस्त्राणामसमग्रत्व तीक्ष्णत्वादिगुणवैकल्यं यथावा उद्यानमारुतोद्धूताश्चूतचंपकरेणवः उदस्रयंति पांथानामस्पृशंतो विलोचने अत्र बाष्पोद्गमनहेतूनाम समग्रत्वं स्पर्शनक्रियावैकल्यं

तावृंतासक्तभ्रमरा संजातेत्यर्थः हेतूनामिति असमग्रत्वे हेतुतावच्छेदकस्य धर्मस्य तत्संबंधस्य वा वैकल्ये सति अस्त्रैरिति धर्मवैकल्योदाहरणं संबंधवैकल्ये उदाहरति उद्यानेति विलोचने कर्मभूते उदस्रयंति उद्गताश्रूणि कुर्वंतीत्यर्थः क्रियेति धा

इमां द्वितीयप्रकाररूपांविभावनां व्याजहारेति गुणजातिक्रियादीनांयत्रवैकल्यदर्शनं विशेषदर्शनायैवसाविशेषोक्तिरिष्यतइतिग्रंथेनव्यव
हृतवानित्यर्थः एतेनप्रथमप्रकाराद्द्वितीयप्रकारस्यवैलक्षण्यंदुरुपपादमितिवदन्नपास्तः वैलक्षण्याभावेहिप्राचामलंकारांतरत्वेनकथन
मत्यंतानुपपन्नमेवस्यात् अस्तिचस्वरूपतःकारणाभावकथनात्कारणगतधर्मवैकल्यद्वारेणतद्विशिष्टकारणाभावकथनेसहृदयसिद्धोविच्छि

इमांविशेषोक्तिरितिदंडीव्याजहार यतस्तत्रप्रथमोदाहरणेमन्मथस्यमहिमातिशयरूपोद्वितीयोदाहरणेचंप
करेणूनामुद्दीपकतातिशयरूपश्चविशेषःख्याप्यतइति अस्माभिस्तुतीक्ष्णत्वादिवैकल्यमपिकारणविशेषाभा
वरूपमितिविभावनाप्रदर्शिता कार्योत्पत्तिस्तृतीयास्यात्सत्यपिप्रतिबंधके नरेंद्रानेवतेराजन्दशत्यसिभुजंगमः
अत्रनरेंद्राविषवैद्याःसर्पदंशप्रतिबंधकमंत्रौषधिशालिनःश्लेषेणगृहीताइतिसत्येवप्रतिबंधकेकार्योत्पत्तिः ६

त्तिविशेषःप्रकारांतरास्वीकारेलाघवमितितुस्वीयलाघवोद्भावनमितिहृतमधिकेन कार्योत्पत्तिरिति प्रतिबंधकेसत्यपिकार्योत्पत्तिकथनंतृती
याविभावना नरेंद्रानिति नरेंद्रोवार्त्तिकेराज्ञिविषवैद्येपिकथ्यतइतिविश्वः असिःखड्गएवभुजंगमः ६ ॥ ६

चित्रमिति प्रतापएवतपनःसूर्यः आतपत्रंछत्रंतद्रहितमनातपत्रं आतपत्रेणसहितंसातपत्रं उदितइति कस्यचिद्राजकुमारस्यप्रतापवर्णनं कुमाररूपेसूर्येउदितेसति कोःपृथिव्यावलयंमंडलमेवकुवलयंकुमुदमुल्लासंप्राप्नोति क्षत्रंक्षत्रियकुलंनभाति अथचनक्षत्रंभातीतिचित्रंत

यथावा चित्रंतपतिराजेंद्रप्रतापतपनस्तव अनातपत्रमुत्सृज्यसातपत्रंद्विषद्गणं अकारणात्का
र्यजन्मचतुर्थीस्याद्विभावना शंखाद्वीणानिनादोयमुदेतिमहदद्भुतं अत्रशंखत्वेनकमनीयःकामि
नीकंठस्तंत्रीनिनादत्वेनतद्गीतंचाध्यवसीयतइत्यकारणात्कार्यजन्म यथावा तिलपुष्पात्समायातिवा
युश्चंदनसौरभः इंदीवरयुगाच्चित्रंनिःसरंतिशिलीमुखाः विरुद्धात्कार्यसंपत्तिर्दृष्टाकाचिद्विभावना
शीतांशुकिरणास्तन्वींहंतसंतापयंतितां अत्रतापनिवर्तकतयातापविरुद्धैरिंदुकिरणैस्तापजनिरुक्ता
यथावा उदितेकुमारसूर्येकुवलयमुल्लसतिभातिनक्षत्रं मुकुलीभवंतिचित्रंपरराजकुमारपाणिपद्मानि

थापरेषांराजकुमाराणांपाणिकमलानिमुकुलीभवंतिसंकुचंति अंजलिबंधात्तदाकृतीनिभवंतीत्यर्थः ७ ६

अविवेकीति विवेको विशेषदर्शनं विश्लेषश्च तच्छून्यं परस्परं संश्लिष्टत्वात् कुचयुगं कर्तृ जगत्त्रयं हंतु नाम श्रुतिर्वेदः कर्णश्च प्रणयः परिच
यः यश इति करएव दातृत्वात्कल्पतरुः अत्र पयोधिजन्यात्कल्पतरोः कारणस्य पयोधेरुत्पत्तिः षष्ठी विभावना जातेति जातु कदाचित् क

यथा वा अविवेकि कुचद्वंद्वं हंतु नाम जगत्त्रयं श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणं पूर्वोदाहरणयोः कार
णस्य कार्यविरोधित्वं स्वाभाविकं इह तु श्रुतिप्रणयित्वरूपागंतुकगुणप्रयुक्तमिति भेदः कार्यात्का
रणजन्मापि दृष्टा काचिद्विभावना यशःपयोराशिरभूत्करकल्पतरोस्तव यथा वा जाता लता हि शै
ले जातु लतायां न जायते शैलः संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातं कार्याजनिर्विशे
षोक्तिः सति पुष्कलकारणे हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि

नकलतेव कनकलता कामिनी गिरिद्वयमिव स्त
नद्वयं इत्यलंकारचंद्रिकायां विभावनाप्रकरणं विशेषोक्तिं लक्षयति कार्याजनिरिति पुष्कले सहकारिसंपन्ने कारणे सति
प्रसिद्धकारणसमूहे सतीति यावत्कार्यस्याजनिरनुत्पत्तिर्विशेषोक्तिः विशेषस्य अनुत्पत्तिनिमित्तस्योक्तिरवगतिर्यत्रेति व्युत्पत्तेः ७

भ्रूचापेति भ्रूचापवल्ली भ्रूस्वरूपधनुर्लतां यावदिति परिमाणार्थं वक्रतां नयति आकर्षतीति यावत् तावत्परिमाणं हृदयं भिद्यत इत्यर्थः अत्र हृदयभेद धनुराकर्षणयोः कार्यकारणयोर्भिन्नदेशत्वमेव दृष्टमिति नासंगतिरलंकारः अन्यत्रेति अन्यत्र कर्तव्यस्य वस्तुनस्ततोन्यस्मिन्नधिकरणे या कृतिः करणं तदपि असंगतिरित्यनुषज्यते तथा अन्यत्कार्यं कर्तुं प्रवृत्तस्य तद्विरुद्धकार्यकरणं तृतीया असंगतिः अ

यथा भ्रूचापवल्ली सुमुखी यावन्नयति वक्रतां तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम अन्यत्र करणीयस्य ततोन्यत्र कृतिश्च सा अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तथा अपारिजातां वसुधां चिकीर्षं द्यां तथा कृथाः गोत्रोद्धारप्रवृत्तोपि गोत्रोद्भेदं पुराकरोः अत्र कृष्णं प्रति शक्रस्य सोपालंभवचने भुवि चिकीर्षितं तया तत्र करणीयं अपारिजातत्वं दिवि कृतमित्येका संगतिः पुरा गोत्राया उद्धारे प्रवृत्तेन वराहरूपिणा तद्विरुद्धं गोत्राणां दलनं खुरकुट्टनैः कृतमिति द्विविधापि श्लेषोत्थापिता ७

पगतं पारिजातं यस्यास्तां द्यां स्वर्गं तथा पारिजाततरुरहितां अकृथाः कृतवान् एवं गोत्रायाः पृथिव्या उद्धाराय पुरा वराहावतारे प्रवृत्तोपि त्वं गोत्राणां पर्वतानामुद्भेदं दलनमकरोः कृतवानित्यर्थः श्लेषोत्थापिता श्लेषमूलकाभेदाध्यवसायोत्थापिता ॥ ७

यथावेति हे भुवनैकवीरचोलदेशाधिपसिंहसदृश नवखड्गेनखंडितायेसपत्नाः शत्रवस्तद्विलासिनीनामभिनवाअदृष्टपूर्वाभूषाभूषणानिभ

यथावा त्वत्खड्गखंडितसपत्नविलासिनीनां भूषाभवंत्यभिनवा भुवनैकवीर नेत्रे
षु कंकणमथोरुषु पत्रवल्ली चोलेंद्रसिंह तिलकं करपल्लवेषु मोहं जगत्त्रयभुवामप
नेतुमेत दादायरूपमखिलेश्वरदेहभाजां निःसीमकांतिरसनीरधिनामुनैव मोहं
प्रवर्द्धयसिमुग्धविलासिनीनां अत्राघोदाहरणे कंकणादीनामन्यत्र कर्तव्यत्वं प्रसि
द्धमितिनोपन्यस्तं भवतिना भावनारूपा अन्यत्रकृतिराक्षिप्यत इतिलक्षणानुगतिः

वंति यथा नेत्रेषु कंकणं जलकणमेव कंकणं वलयं भवतीत्यनुषंगः अथेतिसमुच्चये ऊरुषुचपत्रयुक्तावल्लीसैवपत्रिकारचना करपल्लवे

पुतिलयुक्तं कंजलमेव ललाटभूषणमिति मोहमिनि हे अखिलेश्वर जगत्त्रयवर्तिनां देहधारिणां मोहमपनेतुं एतत् रूपं कृष्णशरीरमादाय-
मर्यादातिक्रांतकांतिरूपरससमुद्रेणामुनैव रूपेण सुंदरस्त्रीणां मोहं प्रवर्द्धयसीत्यन्वयः अत्रेति अनयोर्मध्य इत्यर्थः आद्योदाहरणे इतिल-
क्षणानुगतिरित्यन्वयः भवतिना भवत्यर्थेन भवनेनेति यावत् भावनारूपा भवनप्रयोजकव्यापाररूपा यत्तु अन्यत्रकरणीयस्येत्याद्यसंगति
प्रकारद्वयांतरकथनमयुक्तं अपारिजातामित्युदाहरणे पारिजातराहित्यचिकीर्षारूपकारणस्य कार्येण पारिजातराहित्येन वैयधिकरण्यो-
पनिबंधनेन प्राथमिकासंगतितो वैलक्षण्यानुपपत्तेः आलंबनाख्यविषयतासंबंधेन चिकीर्षायाः सामानाधिकरण्येन कार्यमात्रं प्रति हेतुत्वात्
एवं नेत्रेषु कंकणमित्यादौ कंकणत्वनेत्रालंकारत्वयोर्विरुद्धयोः सामानाधिकरण्यवर्णनाद्विरोधाभासत्वमुचितं एवं गोत्रोद्धारप्र-
वृत्तोपीत्युदाहरणे विरुद्धात्कार्यसंपत्तिर्दृष्टाकाचिद्विभावनेत्युक्तविभावनाप्रकारेणैव गतार्थत्वाद् संगतिभेदांतरकल्पनानुचिता मोहमित्यादा-
वपि मोहनिर्वर्तकत्वमोहजनकत्वयोर्विरुद्धयोरेकत्र वर्णनाद्विरोधाभास एवेति केश्चिदुक्तं तदसंगतं उक्तसंबंधेन चिकीर्षाया हेतुत्वासिद्धेः
नहि यदधिकरणे कार्यचिकीर्षा तदधिकरणमंतर्भाव्योक्तसंबंधेन चिकीर्षायाः कार्यहेतुत्वं तांत्रिकसंमतं युक्तं वा अन्यत्र चिकीर्षितस्यापि प्रमा-
दादिनान्यत्रकरणे न व्यभिचारात् अत एवैवंविधवैय्यधिकरण्यस्य विरुद्धत्वादपि न प्राथमिकासंगत्यंतर्भावसंभवः वस्तुतस्तु विषंजलधरैः
पीतं मूर्छिताः पथिकांगना इत्यत्रेव नात्र कार्यकारणवैय्यधिकरण्यप्रयुक्तो विच्छित्तिविशेषोऽपि त्वन्यत्र कर्तव्यस्यान्यत्र करणप्रयुक्त एवेति स्वल्पद

पमेवप्रष्टव्यं एवंनेत्रेषु कंकणमित्यत्रसत्यपि विरोधाभासेऽन्यत्रचमत्कारित्वेन कूसालंकारभावाऽन्यत्रकर्त्तव्यस्यान्यत्रकरणरूपाऽसंगतिरपि
प्रतीयमानानशक्यानिराकर्त्तुं एवंगोत्रोद्धारप्रवृत्तोपीत्युदाहरणेगोत्रोद्धारविषयकप्रवृत्तेर्गोत्रोद्भेदरूपकार्यविरुद्धत्वाद्विरुद्धाकार्यसंपत्तिरपिवि
भावनेत्यपिनयुक्तं गोत्रोद्धारप्रवृत्तेर्गोत्रोद्भेदनिवर्तकत्वाभावेनतद्विरुद्धत्वाभावात् कथंचित्तदभ्युपगमेपि अन्यत्कार्यकर्त्तुंप्रवृत्तेनतद्विरुद्धकार्यां
तरकरणरूपाऽसंगतिरपिमोहजगन्त्रयभुवामित्यादौचमत्कारित्वेनलब्धात्मिकाननिवारयितुंशक्यते नचात्रापिमोहनिवर्त्तकान्मोहोत्पत्तेःसैव
विभावनेतिवाच्यं मोहनिवर्तकस्यसिद्धवदप्रतीतेः अतएवनविरोधाभासोपिविशेषोक्तिकथनंत्वत्रासंगतमेव नहिगोत्रोद्धारविषयकप्रवृत्तिरूप
कारणसत्वेपिगोत्रोद्धाररूपस्यकार्यस्यानुत्पत्तिरिहप्रतिपाद्यते किंतुविरुद्धकार्योत्पत्तिरेवेतिविभावनीयम् इत्यसंगतिप्रकरणम्

विषममिति परस्परमानुरूप्यरहितयोः पदार्थयोर्यत्र घटनासंबंधो वर्ण्यते तत्र विषमंनामालंकारः संबंधश्च संयोगादिः उत्पाद्योत्पादकभावश्चेति स र्वप्रकारसाधारणमेतल्लक्षणंबोध्यं अभिलषसीति अंकं कलंकं संक्षाल्य प्रक्षाल्य अथप्रक्षालनानंतरं नोचेत्तस्यामुखं क त्वं क्व इतिवदेत्यन्वयः वस्तुमती वस्तुगत्या विद्यमाना चंद्रेति चंद्रश्च वदनलक्ष्मीश्च तयोरित्यर्थः विरूपकार्यस्येति कारणविलक्षणस्वरूपस्येत्यर्थः कृपाणिका खड्गः प्रक्र

चंं०टी

विषमंवर्ण्यतेयत्र घटनाननुरूपयोः केयंशिरीषमृद्वंगी क्वतावन्मदनज्वरः अत्रातिमृदुत्वेनाति दुःसहत्वेनचाननुरूपयोरंगनामदनज्वरयोर्घटना यथावा अभिलषसियदींदोवक्त्रलक्ष्मीं मृगाक्ष्याःपु नरपि सकृदब्धौमज्जसंक्षालयांकं सुविमलमथबिंबंपारिजातप्रसूनैः सुरभयवदनोचेत्त्वंक्वतस्यामु खंक्व पूर्वत्रवस्तुसतीघटना अत्रच चंद्रवदनलक्ष्म्योस्तर्किताघटनेतिभेदः विरूपकार्यस्योत्पत्तिरपरं विष मंमतं कीर्तिंप्रसूतेधवलांश्यामातवकृपाणिका अत्रकारणगुणप्रक्रमेणविरुद्धाच्छामाद्धवलोत्पत्तिः कार्यकारणयोर्निवर्त्यनिवर्तकत्वे पंचमीविभावना विलक्षणगुणशालित्वेत्वयंविषमइतिभेदः

मेणेति प्रक्रमः परिपाटीस्वसजातीयकार्यगुणोत्पादकत्वरूपा विरुद्धाकार्यसंपत्तिरितिपंचमविभावनाप्रकारेणाभेदमाशंक्याह कार्येति अयंविषमः उक्तविषमालंकारप्रभेदः तृतीयप्रकारमाह

अनिष्टस्यापीति अपि भिन्नक्रमः इष्टार्थसमुद्यमात् अनिष्टस्यावाप्तिरपि च तत्तु विषममित्यर्थः अपिनाइष्टानवाप्तिः संगृह्यते चकारः पूर्वोक्त विषमस
मुच्चयार्थः भक्ष्येति अहिमंजूषां सर्पपेटिकां दृष्ट्वा भक्ष्यस्याशाया प्रविष्ट आखुर्मूषकस्तेनाहिना भक्षित इत्यन्वयः यत्तु प्रविष्ट इत्यस्यागम्यमानत्वान्न्यून
पदत्वमिति केनचिदुक्तं तदभिनिवेशदुष्टस्वहृदयानुभवविकत्थनमित्युपेक्षणीयं अनिष्टस्यापि प्रतिलंभ इत्यत्राप्यपिर्भिन्नक्रमो बोध्यः गोपालइति हे

> अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः इष्टार्थमुद्दिश्य किंचि
> त्कर्मारब्धवतो न केवलमिष्टस्यानवाप्तिः किंतु ततोऽनिष्टस्यापि प्रतिलंभश्चेत्तदपि विषमो यथा भक्ष्यप्रेप्सयास
> र्पपेटिकां दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्यालाभः किंतु स्वरूपहानिरपीति यथा वा गोपालइति कृष्ण त्वं प्र
> चुरक्षीरवांछया श्रितो मातृस्तनक्षीरमप्यलभ्यं त्वया कृतं इदमर्थावाप्तिरूपेष्टार्थसमुद्यमादिष्टानवाप्तावनिष्टप्र
> तिलंभेचोदाहरणं अनर्थपरिहारार्थरूपेष्टार्थसमुद्यमात्तदुभयं यथा

कृष्ण त्वं गोपालइति हे तोर्बहुदुग्धवांछया श्रितः आश्रितः त्वया तु मातृस्तनदुग्धमप्यलभ्यं कृतं मुक्तिदानेनेति भावः पूर्वत्रेष्टानवाप्तिरर्थगम्या इह त्व
पिशब्दगम्येति विशेषः इदमिति उदाहरणमिति च जातावेकवचनं

(103)

दिवीति भुविसैंहिकयस्यसिंहीपुत्रस्यसिंहस्यभयात् दिविआकाशेचंद्रमाश्रितवतः शशस्यसाश्रयस्याश्रयसहितस्यततः सैंहिकेयाद्राहो
र्भयमेतत् हतत्वंगिपदस्येत्यन्वयः परेति परस्यानिष्टावाप्तिरूपोयइष्टार्थइत्यर्थः तदुभयं इष्टानवाप्त्यनिष्टावाप्तिद्वयं दिधक्षन्निति दशाननोराव
णः मारुतेर्हनुमतोवालंपुच्छंदग्धुमिच्छन्वालमादीप्यदीपयतिस्मेत्यर्थः प्रत्येकमपीति अपिनाइष्टानवाप्तिसमुच्चितायाअनिष्टावाप्तेर्विषमपदेनान्व

दिविश्रितवतश्चंद्रंसैंहिकेयभयाद्भुवि शशस्यपश्यतन्वंगिसाश्रयस्यततोभयं अत्रनकेवलंशशस्यस्वान
र्थपरिहरानवाप्तिः किंतुसाश्रयस्याप्यनर्थावाप्तिरितिदर्शितं परानिष्टप्रापणरूपेष्टार्थसमुद्यमात्तदुभयंयथा दि
धक्षन्मारुतेर्वालंतमादीप्यद्दशाननः आत्मीयस्यपुरस्यैवसद्योदहनमन्वभूत् पुरस्यैवेत्येवकारेणपरानिष्टप्राप
णाभावोदर्शितः अनिष्टस्याप्यवाप्तिश्चेतिश्लोके निष्टावाप्तेरपिशब्दसंग्रहीतायाइष्टानवाप्तेश्चप्रत्येकमपिविष
मपदेनान्वयः ततश्चकेवलानिष्टप्रतिलंभः केवलेष्टानवाप्तिश्चेत्यन्यदपिविषमद्वयंलक्षितंभवति तत्रकेवला
निष्टप्रतिलंभोयथा

यः समुच्चीयते विषमपदेनविषमपरामर्शकेनतत्पदेन तथाचतात्पर्यबलाद्वाक्यमावर्तनीयमितिभावः यत्वनिष्टस्येवतदुत्तरापिशब्दसमुच्चितायाइ
ष्टानवाप्तेरप्याप्नोतिनैवान्वयोनतुतत्पदपरामृष्टेनविषमेण अव्युत्पत्तेरिति तथागेवापिशब्दान्वयव्याख्यानेननिरस्तंवेदितव्यं

पद्मेति दयितां प्रति नायकोक्तिः पद्मस्यातपत्रं छत्रं तत्र रसिके हे तन्वि वापिकायां सरसीरुहस्य पद्मस्य कंदमर्पयितुं किमितीच्छसि यतः हे अङ्गे कलियुगरूपः कालः इदं जगत् छत्रतां न भवति ततः किं तत्राह इदं सरसीरुहं स्थिता तवैव मुखस्य लक्ष्मीं हरिष्यति न त्वन्यस्या इत्यर्थः खिन्नोसीति बिभृमः धारयामः वदत्सु गोपेषु शिथिलो भुजो यस्य सः भरेण शैलभारेण भुग्ना वक्राः विनता विस्तीर्णा बाहवो येषां तथाभूतेषु सत्सु हसन्

पद्मातपत्ररसिके सरसीरुहस्य किं बीजमर्पयितुमिच्छसि वापिकायां कालः कलिर्जगदिदं न छत्रतां मत्ते स्थिता हरिष्यति मुखस्य तवैव लक्ष्मीं अत्र पद्मातपत्रलिप्सया पद्मबीजावापं कृतवत्या स्तल्लाभोऽस्त्येव किंतु मुखशोभाहरणरूपोत्कटानिष्टप्रतिलंभः केवलेष्टानवाप्तिर्यथा खिन्नोसि मुंच शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः भरभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति अत्र यद्यपि शैलस्योपरि पतनरूपानिष्टावाप्तिरपि प्रसक्ता तथापि भगवत्कराम्बुजसंसर्गमहिम्ना सा न जातेति शैलधारणरूपेष्टानवाप्तिमात्रं

अत्रेति न च भरभुग्नेत्यनेन बाहुगतास्थिसंधिभंगरूपानिष्टप्राप्तेः साक्षादुपात्तत्वात्सर्वांगचूर्णीभावगर्वापहाररूपायाश्च स्फुटं गम्यमानत्वात्कथमिष्टाप्राप्तिमात्रमित्युच्यत इति वाच्यं अस्थिसंधिभंगस्याशब्दार्थत्वात् भगवद्भुजशैथिल्यप्रयुक्तभाराधिक्येन वक्रतापात्रस्य शब्दोपात्तस्य च क्लेशविशेषानाधायकत्वेनानिष्टव्यपदेशानर्हत्वात् सुहृद्भूतानां गोपानामनिष्टप्राप्तेर्हास्यानुपपत्तेश्च अतएव न

सर्वांगचूर्णीभावोपिगम्यः गर्वप्रसक्त्यभावाच्च न तदपहारोपि यतश्चिरकालशैलधारणजन्यश्रमपरिजिहीर्षया गोपानांप्रवृत्तिरिहावगम्यत इति निरवद्यं लोक इति हे तन्वि लोके प्रसिद्धं कलंकमपहर्तुं निवारयितुं मृगांकस्तव मुखं जातः तत्रापि पुनस्तिलकव्याजेन कलंकरेखां त्वं कल्पयसि करोषि हि यस्मान्नार्यः समाश्रितजनं स्वाश्रितजनं कलंकिनं कुर्वंतीत्यन्वयः शापोपीति मृगयायां प्रमादतो हतपुत्रेण तापसेन त्वमपि पुत्रशो

यथावा लोके कलंकमपहातुमयं मृगांको जातो मुखं तव पुनस्तिलकछलेन तत्रापि कल्पयसि तन्वि कलंकरेखां नार्यः समाश्रितजनं हि कलंकयंति अत्रानिष्टपरिहाररूपेष्टानवाप्तिः यथावा शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोयं कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं दहनः करोति अत्र परानिष्टप्रापणरूपेष्टानवाप्तिः स्वतोऽनिष्टस्यापि मुनिशापस्य महापुरुषार्थपुत्रलाभावश्यंभावगर्भतया दशरथेनेष्टत्वेन समर्थितत्वात् यत्र केनचित्स्वेष्टसिध्यर्थं नियुक्तेनान्येन नियोक्तुरिष्टमुपेक्ष्य स्वस्यैवेष्टं साध्यते तत्रापीष्टानवाप्तिरूपमेव विषमं

कान्मरिष्यसी निशापेदत्ते तं प्र-

तिदशरथस्येयमुक्तिः अदृष्टपुत्रमुखपंकजशोभे मयि भगवता त्वया पातितः अयं शापोपि सानुग्रहो भवति खलु निश्चितं इंधनैरिद्धो दीप्तो दहनः कृषियोग्यां क्षितिं दहन्नपि बीजांकुरजननीं करोतीति दृष्टांतः परेति परस्य दशरथस्यानिष्टप्रापणरूपं यदिष्टं तस्यानवाप्तिरर्थात्तापसस्येत्यर्थः

कुतस्तत्राह स्वत इति नियोक्तुः प्रेषयितुः

संप्रतीति मौढ्यंमूढत्वं एवंविधायामामत्वबुद्धेः विधेर्दैवस्य विपाकं परिपाकंफलमितियावत् भानुरिति हेहरेभानुःसूर्यः भवच्चरणकिरण
शोभायालोभात्स्वीयकिरणसमूहंनिशासुप्रभातपर्यंतंप्रतनाप्य रात्रौसूर्यकिरणानामग्नौप्रवेशात्तापयित्वा तत्रतस्मिन्किरणोत्करेऽङ्कतवहा

यथा संप्रतिप्रेषितादूतीतस्मिन्नेवलयंगता सख्यःपश्य तमौढ्यंमेविपाकंवाविधेरमुं तस्मि
न्नेवलयंगतेतिनायकेदूत्याःस्वाच्छंद्यंदर्शितं यथावा नपुंसकमितिज्ञात्वाप्रियायैप्रेषितंमनः
तत्तुतत्रैवरमतेहताःपाणिनिनावयं एतानिसर्वथैवेष्टानवाप्तेरुदाहरणानि कदाचिदिष्टावाप्ति
पूर्वकंतदनवाप्तिर्यथा मदीयेवरदराजस्तवे भानुर्निशासुभवदंघ्रिमयूखशोभालोभात्प्रताप्यकि
रणोत्करमाप्रभातं तत्रोद्धृतेऽङ्कतवहात्क्षणलुप्तरागेतापंभजत्यनुदिनंसहिमंदतापः ७

दग्नेःसकाशादुद्धृतेसतिरक्ततादर्शनाद्मंदसंतापःसन्क्षणमात्रेणलुप्तरागेनष्टलौहित्येसत्यनुदिनंतापंभजतीत्यन्वयः ७

लद्दक्केति हेहरेअयंविधुः पर्वणिपूर्णिमायांअंबुजस्यकोशः कुड्मलः सएवांबुजरूपभांडारगृहंतस्यमुद्रामुकुलीभावोमुद्रणंचतस्यभंगेना नागृहीतातत्सुषमातत्शोभायैस्ताहशायेमित्रकराः सूर्यकिरणाः सुहृत्पाणयश्चतेषामुपकृत्यालाभेनलद्दक्कस्यकांतिंलब्ध्वापिक्रमेणहीयमानः क्षीयमाणःसन् अनीत्याउपचितांप्रवृद्धांश्रियंआशुनाशोयस्यास्तांशांसतिकथयतीत्यन्वयः अत्रेति आगमसिद्धंतस्मादिवाग्निरादित्यं

यथावा लद्दक्कसाम्यमयमंबुजकोशमुद्राभंगात्ततत्सुषुममित्रकरोपकृत्या लब्ध्वापिपर्वणिविधुःक्रमहीयमानःशंसत्यनीत्युपचितांश्रियमाशुनाशां अत्राद्यश्लोकेसूर्यकिरणानांरात्रिष्वग्निप्रवेशनमागमसिद्धं सूर्यस्यनिजकिरणेषुभगवच्चरणारुणिमप्रेप्सयातत्कृतंतेषामग्नौप्रतापनं परिकल्प्यतेषामुदयकालहश्यमरुणिमानंचतसोद्धृतनाराचानामिवाग्निसंतापनप्रयुक्तारुणिमानुवृत्तिंपरिकल्प्यसूर्यस्यमहतापिप्रयत्नेनतात्कालिकेष्टावाप्तिरेवजायतेनसार्वकालिकेष्टावाप्तिरितिदर्शितं

प्रविशतिरात्रावादित्यस्तमितिश्रुतिसिद्धंप्रवेशनंतत्कृतंसूर्यकृतं तेषांकिरणानामग्नौप्रतापनरूपंपरिकल्प्यउत्प्रेक्ष्य एवंतेषांकिरणानामरुणिमानंआरक्तत्वंचअरुणिमानुवृत्तिरूपंपरिकल्प्य इतिदर्शितमित्यन्वयः ७

एवमग्रेपि सुहृत्वेन सूर्यं परिकल्प्य तत्किरणस्य चंद्रानुप्रवेशं च शास्त्रसिद्धं सुहृत्त्वाणे यथोक्तविशेषणविशिष्टस्य चंद्रस्य शरूपं च परिकल्प्य
इति दर्शितमित्यन्वयः बल्लालेति हे एतन्नामक भूपाल त्वच्छत्रुनगरे संचरंती भिल्ली प्रकीर्णानि रत्नान्यादाय उरुतरा महती या खदिरांगा

द्वितीयश्लोके चंद्रस्य भगवन्मुखलक्ष्मीं लिप्समानस्य सुहृत्वेन मित्रशब्दश्लेषवशात्सूर्यं परिकल्प्य
तत्किरणस्य कमलमुकुलविकासनं चंद्रानुप्रवेशनं च सुहृत्त्वाणे भगवन्मुखलक्ष्मीनिधानकोशगृ
हमुद्रामोचनपूर्वकं तत्तो गृहीत भगवन्मुखलक्ष्मीकस्य तया भगवन्मुखलक्ष्म्या चंद्रमसा धनार्थं चं
द्रस्य शरूपं च परिकल्प्यैतावतापि प्रयत्नेन पौर्णमास्यामेव भगवन्मुखसाम्यरूपेष्टं प्राप्निर्जायते न सा
र्वकालिकेति दर्शितं क्वचिद्दिष्टानवाप्तावपि तदवाप्तिभ्रमनिबंधनविच्छित्तिविशेषः यथा वा बल्लाल
क्षोणिपाल त्वदहितनगरे संचरंती किराती रत्नान्यादाय कीर्णान्युरुतर खदिरांगारशंकाकुलांगी क्षिप्ता
श्रीखंडखंडं तदुपरि मुकुलीभूतनेत्रा धमंती श्वासामोदप्रसक्तैर्मधुकरपटलैर्धूमशंकां करोति

रस्य शंका भ्रांतिस्तया व्याकु
लांगी न तदुपरि श्रीखंडकाष्ठशकलं क्षिप्त्वा मुकुलीभूतनेत्रा फूत्कारं कुर्वती सती श्वासपरिमलेन प्रसक्तै रागतै र्भ्रमरसमूहै र्धूमशंकां करोतीत्यन्व
यः

प्रभूतेति बहुलेत्यर्थः एतेषु च सर्वेषूत्पाद्योत्पादकभावरूपसंबंधगर्भेषु प्रभेदेषु कार्यकारणयोः क्वचिद्विलक्षणगुणशालित्वेनानुरूप्याभावा
त् क्वचिद्विष्टोत्पादकत्वेनाभिमतस्य कारणस्येष्टानवाप्त्यनिष्टावाप्तिरूपकार्येणानुरूप्याभावात् सामान्यलक्षणासमन्वयो बोध्यः इत्यलं
लंकारचंद्रिकायां विषमालंकारः समामिति अनुरूपयोरित्यनंतरं संबंधस्येति शेषः परस्परमनुरूपयोः संबंधस्य वर्णनं समं नामा

अत्र प्रभूताग्निसंपादनोद्योगात्तत्संपादनालाभेऽपि तल्लाभः भ्रमोपन्यासमुखेन निबद्धः समं स्याद्वर्णनं
यत्र द्वयोरप्यनुरूपयोः स्वानुरूपं कृतं सद्म हारेण कुचमंडलं प्रथमविषमप्रतिद्वंद्वीदं समं यथा वा कौमु
दीव तुहिनांशुमंडलं जाह्नवीव शशिखंडमंडनं पश्य कीर्तिरनुरूपमाश्रिता त्वां विभाति नरसिंह भूपते चित्रं चि
त्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितघटनासंविधाता विधाता यन्निंबानां परिणतफलस्फीतिरास्वा
दनीया यच्चैतस्याः कवलनकलाकोविदः काकलोकः पूर्वं स्तुतिपर्यवसायीदं निंदापर्यवसायीति भेदः ७

लंकारः सद्म स्थानं शशिखंडमंडनं चंद्रकलाभूषणं हरं चित्रमिति अत्र चित्रबतशब्दयोर्वीप्साविस्मयातिशयद्योतनाय परिणतं पक्वं स्फी
तिः समृद्धिः एतस्याः फलसमृद्धेः कवलनकला भक्षणचातुर्यं तत्र कोविदः पंडितः ७ ७ १

सारूप्यमपीति कार्यस्यकारणेनसारूप्यमपिसमालंकारः नीचेति नीचप्रवणतानीचासक्तता जलजायाःसमुद्ररूपजलाज्जातायाः उचितेति जलस्यतादृशत्वादितिभावः दवेति घनतांमेघरूपतांवर्षैर्जलवर्षणैःशमयति नाशयति हियस्मात्सोपिदवदहनोपिदवमेव स्वोत्पादकंविनिर्दहति तथाचकारणस्यस्वोत्पादकनाशकत्वात्कार्यस्यापि धूमस्यतथात्वमुचितमित्यर्थः आदाविति विरहिण्याद्रयमुक्तिः

सारूप्यमपिकार्यस्यकारणेनसमंविदुः नीचप्रवणतालक्ष्मीर्जलजायास्तवोचिता इदंद्वितीयविषमप्रतिद्वंद्विसमं यथावा दवदहनादुत्पन्नोधूमोघनतामवाप्यवर्षैस्तं यच्छमयतितद्युक्तंसोपिचदवमेवनिर्दहति यथावा आदौ हालाहलकृतभुजादन्तहस्तावलंबो बाल्येशंभोर्निटिलमहसाबद्धमैत्रीनिरूढः प्रौढोराहोरपिमुखविषेणांतरंगीकृतोयः सोयंचंद्रस्तपतिकिरणैर्मामितिप्रासमेतत् पूर्वत्रकारणस्वभावानुरूप्यंकार्यस्यात्रागंतुकतदीयदुष्टसंसर्गानुरूप्यमितिभेदः

सोयंचंद्रः मांकिरणैस्तपतीत्येतत्प्राप्तंन्याय्यप्राप्तमित्यर्थः सकः यआदौहालाहलरूपेणकृतभुजाग्निनादन्तोहस्तावलंबोयस्यसः निटिलंललाटंतत्संबंधिमहसानेत्राग्निना बद्धयासंबद्धयामैत्र्यानिरूढः प्रसिद्धः प्रौढोयुवाराहोर्मुखसंबंधिभिर्विषैरंत

रंगीकृतः ग्रहणकाले संपर्कातिशयादंतरंगतां प्रापित इत्यर्थः अत्र कार्यस्य तापस्य कारणीभूतचंद्रगतदुष्टसंसर्गानुरूपत्वं भेदांतरमाह विनेति
अनिष्टं विनायमर्थं कर्तुमुद्यतस्तत्सिद्धिरपि सममित्यनुवृत्त्यायोज्यं यदर्थमिति पाठे यश्चासावर्थश्चेत्यर्थः युक्त इति वारणं निवारणं वार

विनानिष्टं च तत्सिद्धिर्यदर्थं कर्तुमुद्यमः युक्तो वारणलाभोयं स्यान्न ते वारणार्थिनः इदं सम
मनिष्टस्याप्यवाप्तिश्चेत्यर्थसंगृहीतस्य त्रिविधस्यापि विषमस्य प्रतिद्वंद्वि इष्टावाप्तिरनिष्टस्या
प्रसंगाच्च अत्र गजार्थितया राजानमुपसर्पतं तं दौवारिके वार्यमाणं प्रति नर्मवचनमुदाहरणं न चा
त्र निवारणमनिष्टमापन्नमित्यनुदाहरणत्वं शंकनीयं राजद्वारिक्षणनिवारणं संभावितमिति त
दंगीकृत्य प्रवृत्तस्य विषमालंकारोदाहरणेष्विवातर्कितोत्कटानिष्टाप्त्यभावात् किंच यत्रातर्कितो
त्कटानिष्टसत्त्वे श्लेषमहिम्नादृष्टार्थत्वप्रतिपत्तिः तत्रापि समालंकारोऽप्रतिहत एव

णो गजश्च युक्तो न स्यादपि तु स्या
दित्येवार्थः शोभत इति क्वचित्पाठः साधुरेव अपिसंगृहीतस्य अपिशब्दसंगृहीतस्य नर्मवचनं परिहासवचनं अत्रेष्टावाप्तिः श्लेषकल्पिता बोध्या
इष्टार्थप्रतीतिरिति इष्टार्थत्वेन प्रतीतिरित्यर्थः अप्रतिहत इति अनिष्टस्येष्टाभिन्नत्वेन ज्ञानकालेऽनिष्टत्वेनाप्रतिभासादिति भावः ७

उच्चैरिति गजैरटनंतदारोहणपूर्वकंगमनं इहत्वन्नगरे उषितोस्मिवासंकृतवानस्मि तदेव मत्वार्थ्यमानमेव उच्चाटनंदूरनिरसनमेव उच्चैर्गजैरटनंप्रति मांलंभयसेप्रापयसि हियस्मात् महतांसेवाविफलानभवतीतिमुखेस्तुतिः ततोदूरनिरसनरूपार्थांतरपरिग्रहेण विषमालंकारस्फूर्त्यानिंदायांपर्यवसानं एतेनवैषम्यस्यनिंदारूपस्यव्याजस्तुतिविषयत्वेनतयाऽपवाद इतिनिरस्तं विषमस्यनिंदामूलत्वेनतद्रूपत्वाभावादिति इष्टार्थावाप्तिसत्वेपि वास्तविके

उच्चैर्गजैरटनमर्थयमानएवत्वामाश्रयन्निहचिरादुषितोस्मिराजन् उच्चाटनंत्वमपिलंभयसेतदेवमामद्यनैवविफलामहतां हिसेवा अत्रयद्यपिव्याजस्तुतौस्तुत्यानिंदाभिव्यक्तिविवक्षायांविषमालंकारः तथापिप्राथमिकस्तुतिरूपवाच्यविवक्षायांस मालंकरोननिर्वार्यते एवंयत्रेष्टावाप्तिसत्वेपिश्लेषवशादसतोनिष्टार्थस्यप्रतीतिस्तत्रापिसमालंकारस्यनक्षतिः यथा शा स्त्रन्नखलुकर्तव्यमितिपित्रानियोजितः तदेवशास्त्रंकृतवान्पितुराज्ञान लंघिता अत्रपितुराज्ञानलंघितेत्यनेनविरोधालंका राभिव्यक्त्यर्थंनखल्वित्यत्रपदद्वयविभागात्मकरूपांतरस्यापिविवक्षायाःसत्वेपिनखलुनातीतिनखल्वित्येकपदेनवस्तुसदर्थां तरपररूपांतरमादायसमालंकारोप्यस्त्येव

ष्टार्थप्राप्तिसत्वेपि नक्षतिरिति अनिष्टप्रतीतेराभासरूपत्वेनापर्यवसानादितिभावः शास्त्रमिति तदेव नखल्वेव एकपदत्वेनेत्युपलक्षणेतृतीया एकपदत्वोपलक्षितंयद्वस्तुसदर्थांतरपरंरूपांतरमित्यर्थः अर्थांतरंचवास्तविकंपदव्युत्पत्तिकथनेनदर्शि तमेव

श्लेषलब्धेति श्लेषेणलब्धाअसतीवस्तुतो॰विद्यमानायाइष्टावाप्तिस्तत्प्रतीतिमात्रेणसमालंकारोदाहरणमपिगतं अधिगतं मात्रपदेनानिष्टावाप्तिप्रतीति
व्यवच्छेदः युक्तोवारणलाभायमित्यत्रकिंचिदनिष्टस्यउच्चैरित्यत्रचोत्कटानिष्टस्यप्रतीतिसत्वादुदाहरणांतरमाह यथेति नायिकांप्रतिनायकस्योक्तिःहेतन्वि
तपःशोभनगत्यैवभवतीतिसत्यंयद्यस्मादब्जंकमलंअंबुषुजलेषुरविंप्रतीक्षतेतादृशंसत्तत्वातपःकृत्वात्वत्पदरूपेजन्मनिसमस्तेभ्यःकमलेभ्यःकमनीयंसुंद

श्लेषलब्धासदिष्टावाप्तिप्रतीतिमात्रेणापिगतमुदाहरणं यथा सत्यंतपःसुगत्येयदब्जमंबुषुरविंप्रती
क्ष्यतु अनुभवतिसुगतिमब्जंत्वत्पदजन्मनिसमस्तकमनीयं विचित्रंतत्प्रयत्नश्चेद्विपरीतःफलेच्छ
या नमंतिसंनतंत्रैलोक्यादपिलब्धुंसमुन्नतिं यथावा मलिनयितुंखलवदनंविमलयतिजगंति
देवकीर्तिस्ते मित्राह्लादंकर्तुंमित्रायद्दुह्यतिप्रतापोपि

रंसतूसुगतिंशोभनांगतिमनुभवतीत्यन्वयः अत्रकमलस्योत्तमलोकनू
पगतिप्राप्तयेतपस्यतस्तदलाभेपिशोभनगमनस्यगतिशब्दश्लेषबलादिष्टत्वेनप्रतीतेरिष्टावाप्तिप्रतीतिमात्रंनत्वनिष्टप्रतिभासोपीति इत्यलंकारचंद्रि
कायांसमालंकारः विचित्रमिति फलेच्छयाविपरीतःप्रयत्नश्चेद्धि चित्रंनामालंकारः इष्टविपरीताचरणमितियावत् नमंतीति नम्रीभवंतीत्यर्थः स
मुन्नतिं उच्चतां मलिनयितुमिति मलिनीकर्तुमित्यर्थः विमलयति निर्मलीकरोति जगंतित्रिभुवनानि मित्रंसुहृत् मित्रःसूर्यश्च इतिविचित्रालंकार

अधिकमिति पृथुलादाधेयापेक्षयाविशालादाधारादाधेयस्याधिक्यवर्णनमेकोधिकालंकारः युगांतेति युगांतकालेप्रलयेप्रतिसंहृतःस्वस्मिन् लयं प्रापित आत्मास्वविलासरूपः प्रपंचोयेन तादृशस्यकैटभद्विषः श्रीकृष्णस्य यस्यां तनौजगंति भुवनानि विकाशसहितंयथास्यात्तथा आसतस्थिता

अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं ब्रह्मांडानिजलेयत्रतत्र मांतिनतेगुणाः अत्रयत्रमहाजलौघेऽनंतानिब्रह्मांडानिबुद्बुदकल्पानीत्याधारस्यातिविशालत्वं प्रदर्श्यतत्रनमांतीत्याधेयानांगुणानामाधिक्यंवर्णितं यथावा युगांतकालप्रतिसंहृतात्मनोजगंतियस्यांसविकाशमासत तनौममुस्तत्रन कैटभद्विषस्तपोधनाभ्यागमसंभवामुदः पृथ्व्याधेयाद्यदाधाराधिक्यंतदपितन्मतं कियद्वाक्ब्रह्मयत्रैते विश्राम्यंतिगुणास्तव अत्रैतइतिप्रत्यक्षदृष्टमहावैभवत्वेनोक्तानांगुणानांविश्राम्यंतीत्यसंबाधावस्थानोक्त्याधारस्यवाग्ब्रह्मणआधिक्यंवर्णितं

नि तत्रतस्यांतनौ तपोधनस्यनारदस्याभ्यागमात्संभवोयासांतामुदः प्रीतयोनममुरित्यन्वयः पृथ्वीति विशालादाधेयाद्यदाधारस्याधिक्यंतदप्यधिकं कियदिति अपरिमितमित्यर्थः वाक्शब्दएवंब्रह्म इयंचपरमेश्वरंप्रतिभक्तस्योक्तिः असंबाधेति असंकटेत्यर्थः

189

अहोइति माति समाति मातुमशक्यः अपरिमितः अत्रभुवनत्रयोदरे नन्वाधारयोः शब्दब्रह्मभुवनोदरयोरप्रस्तुतत्वेनाप्रशंसनीयत्वात्तदाधिक्यवर्ण
नमयुक्तमित्याशंक्याह अत्रेति नचात्राप्रस्तुतप्रशंसाशंकनीया प्रस्तुतस्याप्यभिधानादिति इत्थंचाधाराधेयान्यतरस्यतनोरख्याधिक्यवर्णनमि

यथावा अहोविशालंभूपालभुवनत्रितयोदरं मातिमातुमशक्योपियशोराशिर्यदत्र
ते अत्र यद्यप्युदाहरणद्वयेपिकियद्वाग्ब्रह्मेति अहोविशालमितिचाऽधारयोःप्रशंसा
क्रियते तथापि तनुत्वेनसिद्धवत्कृतयोःशब्दब्रह्मभुवनोदरयोर्गुणयशोराश्यधिकरणत्वे
नाधिकत्वंप्रकल्प्यैवप्रशंसाक्रियतइतितत्प्रशंसाप्रस्तुतगुणयशोराशिप्रशंसायामेवप
र्यवस्यति अल्पंतुसूक्ष्मादाधेयाद्यदाधारस्यसूक्ष्मता मणिमालोर्मिकातेऽद्यकरेजपव
टीयते

तिसामान्यलक्षणंबोध्यं इत्यधिकालंकारः अल्पमिति यदितिसामान्येनपुंसकं स्वापेक्षयासूक्ष्मादाधेयादाधारस्यसूक्ष्मतायत्तदल्पं
नामालंकारः

विरूपाक्षस्य हरस्य जयिनीः विजयकारिणीः स्तुवेस्तौमि भेदांतरमाह सौकर्येणेति कारणस्यानुगुण्याधिक्येनेत्यर्थः निबद्धा कविवर्णिता कार्यविरोधिनी पराभिमतकार्यविरुद्धा दयेति दिग्विजयाय प्रस्थितं राजानं प्रतियुवराजस्योक्तिः बालइत्यतो मयिद्यायौवराज्ये स्थापन

यद्बायत्साधनतया केनचिदुपात्तं तदन्येन तत्प्रतिद्वंद्विना तद्विरुद्धसाधनं क्रियेत चेत्सोपि व्याघातः त त्राद्यउदाहृतः द्वितीयो यथा दृशादग्धं मनसिजं जीवयंति दृशैव याः विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः सौकर्येण निबद्धापि क्रिया कार्यविरोधिनी दयाचेद्बालइति मय्य परित्याज्य एव ते कार्य विशेषनिष्पादकतया केनचित्संभाव्यमानादर्थादन्येन कार्य विरोधिक्रिया सौकर्येण समर्थ्यते चेत्सो पि व्याघातः कार्यविरुद्धक्रियायां सौकर्यं कारणस्य स्फुतरां तदानुगुण्यं यथा जैत्रयात्रोन्मुखेन राज्ञा युवराजस्य राज्य एव स्थापनेयत्कारणत्वेन संभावितं बाल्यं तत्प्रत्युत तद्विरुद्धस्य सहनयनस्यैव कारण तया युवराजेन परित्यागस्यायुक्तत्वं दर्शयता समर्थ्यते

रूपाचेत्तदा तस्मादेव हेतो रहं तवापरित्याज्य एव

किंतु स्वेन सहनेतव्य इत्यर्थः अर्थादिति हेतौ पंचमी अन्वयश्चास्य समर्थ्यत इत्यनेन अन्येन वल्का जैत्रेति जयसाधनेत्यर्थः

१५०

अत्रेति प्रपापालिकायाःपथिकेनोपकारःकृतइत्यन्वयः स्वासक्त्येत्यादिप्रपापालिकायाविशेषणंसंपादनेनकरणभूतेन एवंप्रपापालिकयापिपथिकस्योपकारःकृतइत्यन्वयः यत्तुस्वमुखावलोकनमभिलषंत्याइत्यत्रस्वशब्दस्यप्रपापालिकाबोधकत्वमेवन्याय्यंनपांथबोधकत्वं यद्विशेषणघटकत्वेनस्वनिजादिशब्दाउपात्तास्तद्बोधकाइतिव्युत्पत्तिरितिकैश्चिदुक्तं तदयुक्तं मुख्यविशेष्यविशेषणघटकस्यैवस्वनिजादिशब्दस्यमुख्यविशेष्यमात्रगामित्वव्युत्पत्तेः यथादेवदत्तस्यपुत्रःस्वमातृभक्तइत्यादौस्वशब्दस्यतादृशपुत्रगामित्वंनतुगुणभूतदेवदत्तगामित्वं अतएव दृश स्थलएवनिजतनुस्वच्छलावण्यवापीसंभूतांभो

अत्रप्रपापालिकायाःपथिकेनस्वासक्त्यापानीयदानव्याजेनबहुकालंस्वमुखावलोकनमभिलषंत्याविरलांगुलिकरणेन श्चिरंपानीयदानानुवृत्तिसंपादनेनोपकारःकृतः तथाप्रपापालिकयापिपानीयपानव्याजेनचिरंस्वमुखावलोकनमभिलषतःपथिकस्यधारातनूकरणतश्चिरंपानीयपानानुवृत्तिसंपादनेनोपकारःकृतः अत्रोभयोर्व्यापाराभ्यांस्वस्वोपकारसद्भावेपिपरस्परोपकारोपिनानिवार्यते

जशोभांविदधदभिनवोदंडपादोभवान्याइत्यत्राभवन्मरुयोगत्वंदूषणमुदाहृतंमम्मटभट्टैःकाव्यप्रकाशिकायां अन्यत्रतुनस्वविशेष्यगामित्वनियमः स्वाश्रितानांविप्राणामयंपालकः स्वाज्ञाकारिणांभृत्यानामयंकल्पवृक्षइत्यादौव्यभिचारात् नचैवंस्वदाररतानांविप्राणामहंभक्तइत्यत्रमदीयदाररतानामितिप्रतीतिःस्यादितिवाच्यं तात्पर्यस्यनियामकत्वेनापत्त्यभावादिति इत्यन्योन्यालंकारः

विशेषइति ख्यातंप्रसिद्धं तदुक्तं विनाप्रसिद्धमाधारमाधेयस्यव्यवस्थितिरिति छिंदंति नाशयंति तत्कराः सूर्यकिरणाः रात्रावादित्यस्याग्नौ प्रवेशश्रवणाद्दीपस्थत्वं कमलमिति अत्रकमलत्वादिनामुखादेरध्यवसानंबोध्यं कुवलयेनेत्रेएतानिकमलकुवलयानि कनकलतारूपायां

विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं गतेपिसूर्येदीपस्थास्तमश्छिंदंतितत्कराः यथावा कमलमनंभसि कमलेकुवलयमेतानिकनकलतिकायां साचसुकुमारस्कभगेत्युत्पातपरंपराकेयं अत्राधेसूर्यस्यप्रसिद्धाधारस्याभावेपितत्कराणामन्यत्रावस्थितिरुक्ताद्वितीयेलंभसः प्रसिद्धाधारस्याभावेपिकमलकुवलययोरन्यत्रावस्थितिरुक्ता क्वचित्प्रसिद्धाधाररहितानामाधारांतरनिर्देशं विनैवाप्रलयमवस्थितेर्वर्णनं दृश्यते यथा दिवमप्युपयातानामाकल्पमनल्पगुणगणायेषां रमयंतिजगंतिगिरः कथमिवकवयोननतेवंद्याः अत्रकवीनामभावेपितद्गिरामाधारांतरनिर्देशं विनैवाप्रलयमवस्थितिर्वर्णिता विशेषःसोपियद्येकंवस्त्वनेकत्रवर्ण्यते अंतर्बहिःपुरःपश्चात्सर्वदिक्ष्वपिसैवमे

कामिन्यां साचकनकलतिकाच निर्देशःकथनं आप्रलयं प्रलयपर्यंत दिवमिति दिवमुपयातानामपियेषामनल्पगुणगणयुक्तागिरआकल्पंकल्पपर्यंतंजगंतिभुवनानिरमयंतीत्यन्वयः प्रभेदांतरमाह यदीनितृतीयंप्रकारमाह

११८

करणंचसाविशेषः त्वामितिप्रभुंप्रतियाचकोक्तिः स्फुरादिति उत्कटःप्रता

किंचिदिति किंचित्पदार्थारंभेणाशक्यस्यवस्त्वंतरस्यकृतिः करणंचसाविशेषः त्वामितिप्रभुंप्रतियाचकोक्तिः स्फुरादिति उत्कटःप्रता
किंचिदिति किंचित्पदार्थारंभेणाशक्यस्यवस्त्वंतरस्यकृतिः सृष्टइतिसत्यमित्यन्वयः अत्रचोक्तभेदत्रया
परूपोज्वलनोग्निर्यस्येत्यर्थः उक्तविशेषणंत्वांसृजताविधिनाभुविनवोमनोभवादिः ससृजे

वत्सरामगतोसीतिसंतापेनानुमीयसे किंचिदारंभतो
यथावा हृदयान्नापयातोसिदिक्षुसर्वासुदृश्यसे
शाक्यवस्त्वंतरकृतिश्चसः त्वांपश्यतामपालब्धंकल्पवृक्षनिरीक्षणं यथावा स्फुरदद्भुतरूपमुत्प्रतापज्व
लनंत्वांसृजतानवद्यविद्यां विधिनाससृजेनवोमनोभूर्भुविसत्यंसविताबृहस्पतिश्च अत्राद्येराजदर्शना
रंभेणकल्पवृक्षदर्शनरूपाशक्यवस्त्वंतरकृतिः द्वितीयोराजसृष्ट्यारंभेणमनोभवादिसृष्टिरूपाशक्यव
स्त्वंतरकृतिः स्याद्व्याघातोन्यथाकारितथाकारिक्रियेतचेत् यैर्जगत्प्रीयतेहंतितैरेवकुसुमायुधः यद्यत्सा
धनत्वेनलोकेऽवगतं तत्केनचितद्विरुद्धसाधनंक्रियेतचेत्सव्याघातः

न्यतमत्वंसामान्यलक्षणंबोध्यं इतिविशेषालंकारः स्यादिति तथाकारितत्कार्यसाधनवस्तुअन्यथाकारितत्कार्यविरुद्धकार्यसाधनंचेत्क्रि
येततदाव्याघातोलंकारःस्यादित्यर्थः येरितियैःकटाक्षविभ्रमादिभिर्जगत्प्रीयतेसंतुष्यतितैरेवकुसुमायुधोहंतीत्यन्वयः

मणीति मणिपंक्तिरूपा उर्मिका अंगुलीयकं तेकरे अद्य विरहावस्थायां जपमालायत इत्यर्थः वटशब्दस्य गुटिकापर्यायत्वात् अतिसूक्ष्मता आ
धेयभूतमालापेक्षयापिसूक्ष्मता यदिति हेचंचलाक्षितवमध्यभागादपियत्सूक्ष्मं दृश्यते ततू मृणालसूत्रमपितवस्तनयोरंतरेमध्येनमातीत्य

अत्रमणिमालामयोर्मिकातावदंगुलिमात्रपरिमितत्वात्सूक्ष्मा सापिविरहिण्याः
करेकंकणवत् प्रवेशितातस्मिन् जपमालावल्लंबत इत्युक्त्यात तोपिकरस्य
विरहकाश्यादितिसौक्ष्म्यंदर्शितं यथावा यन्मध्यदेशादपितेसूक्ष्मंलोलाक्षिदृ
श्यते मृणालसूत्रमपितेनसंमातिस्तनांतरे अन्योन्यंनामयत्रस्यादुपकारः
परस्परं त्रियामाशशिनाभातिशशीभातित्रियामया यथावा यथोर्ध्वा
क्षः पिबत्यंबु पथिको विरलांगुलिः तथाप्रपापालिकापिधारांवितनुतेतनुं

त्रियामारात्रिः यथेति उर्ध्वाक्षः उर्ध्वनय
नः प्रपापालिका प्रपादानाधिकृताकाचिद् निता धारांजलधारां तनुं सूक्ष्मां
अन्योन्यमिति यत्रपरस्परमुपकारः स्यात्तत्रान्योन्यंनामालंकारः
त्वयः इत्यल्पालंकारः

112

लुब्धइति तयैवशंकया दारिद्र्यशंकयैव ननुनिश्चितं अत्रपूर्वार्धेलुब्धस्यदानाभावसाधकत्वाभिमतदारिद्र्यशंकारूपपूर्वपक्षनिरूपणं दातुस्तुसैव विरुद्धदानसाधकत्वेन संमतेति पूर्व विरुद्धपक्षनिरूपणमुत्तरार्द्धे यद्यपिदारिद्र्यस्यतात्कालिकत्वेन जन्मांतरीणत्वेनचशंका भिन्नातथाप्यभेदाध्यवसायान्नलक्षणासमन्वयइतिबोध्यं सामान्यलक्षणंपूर्ववदन्यमतघटितमनुसंधेयमितिदिक् इतिव्याघातालं

यथावा लुब्धोनविसृजत्यर्थंनरोदारिद्र्यशंकया दातापिविसृजत्यर्थंतयैवननुशंकया अत्रपूर्वोत्तरार्द्धेपक्षप्रतिपक्षरूपेकयोश्चिह्नचनेइतिलक्षणानुगतिः गुंफःकारणमालास्याद्यथाप्राक्प्रांतकारणैः नयेनश्रीः श्रियात्यागस्त्यागेनविपुलंयशः उत्तरोत्तरकारणभूतपूर्वपूर्वैःपूर्वपूर्वकारणभूतोत्तरोत्तरैर्वावस्तुभिःकृतोगुंफःकारणमाला आद्योदाहृता द्वितीयोयथा भवंतिनरकाःपापात्पापंदारिद्र्यसंभवं दारिद्र्यमप्रदानेनतस्माद्दानपरोभवेत्

कारः गुंफइति रचनेत्यर्थःकैस्तत्राह यथेति प्राक्चप्रांतंचप्राक्प्रांते ते अनतिक्रम्येति यथाप्राक्प्रांतं यानिकारणानि तैः पूर्वपूर्वप्रतिकारणैरुत्तरोत्तरं प्रतिकारणैश्चेत्यर्थः एवंचोत्तरोत्तरेत्यादिव्युत्क्रमेणाभिधानमुदाहरणक्रमानुरोधेनेतिज्ञेयं इतिकारणमाला ७

गृहीतेति वक्ष्यमाणया गृहीतमुक्तरीत्या निबद्धार्थपंक्तिरेकावलिरलंकारः नेत्र इति तस्य भूभुज इति सर्वत्र संबध्यते दोस्तंभयोर्भुजस्तंभयो र्दोलितमांदोलनं ययोस्तौ दोलनाविति पाठे दोलादोलनं ययोरस्तीति विग्रहः रत्नमुकुरो रत्नदर्पणः दिक्कालेति दिक्कालात्मभिस्तुल्या यस्याकाश स्य विभुता यश्च तत्राकाशे विशेषेण द्योतते सूर्यः यत्र च चंद्रे अमुष्य सूर्यस्य किरणा अमृतरूपा भवंति स च चंद्रो यासामपां राशेः समुद्राद्भूत्

गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता नेत्रे कर्णांतविश्रांते कर्णौ दोस्तंभदोलितौ दोस्तंभौ जानुपर्यंतप्रलंबनमनोहरौ जानु नी रत्नमुकुराकारे तस्य हि भूभुजः उत्तरोत्तरस्य पूर्वपूर्व विशेषणभावः पूर्वपूर्वस्य उत्तरोत्तरविशेषणभावो वा गृहीतमु क्तरीतिः तत्राद्यः प्रकार उदाहृतः द्वितीयो यथा दिक्कालात्मसमैव यस्य विभुता यस्तत्र विद्योतते यत्रामुष्य सुधी भवंति किर णाः राशेः स यासामभूत् यस्तत्पित्तमुषः स्म यो, स्य हविषे यस्तस्य जीवातवे वोढा यद्गुणमेष मन्मथरिपोस्ताः पांतु नो मूर्तयः

यश्चाग्निस्तासामपां पित्तं भवति शुचिरप्पित्तमिति कोशात् यश्च यजमान उषस्स्म प्रातः कालेषु अस्य वन्हेर्हविषे हविर्दानाय भवति यश्च वायुः प्रा णरूपस्तस्य यजमानस्य जीवातवे जीवनौषधाय भवति यस्याश्च पृथिव्या गुणं गंधं एष वायुर्वोढा ता एता मन्मथरिपोर्हरस्याष्टौ मूर्तयो वो युष्मा न्पांत्वित्यन्वयः इत्येकावली ७

113

मालादीपकमिति मालादीपकंनामालंकारः एकमितिवाक्यद्वयान्वयीत्यनेनान्वितं अनइति एतावन्मात्रेणदीपसादृश्याद्दीपकंनतु भागुक्तदी
पकालंकारः प्रकृताप्रकृतानांसादृश्यस्यगम्यत्वेतदंगीकारादितिभावः संग्रामेति कोदंडेनधनुषाशराः समासादिताः शरैः शत्रुमस्तकंसमासा
दितंतेनशत्रुमस्तकेनापिभूमंडलंतेनभूमंडलेनत्वंपालकः समासादितः भवताकीर्तिरासादिता कीर्त्याचलोकत्र
यंसमासादितमित्यनुषंगेणान्वयः इतिमालादीपकं ७

अत्रास्थितिरितिपदमेकंस्मरेणत
दीपकैकावलीयोगान्मालादीपकमिष्यते स्मरेणहृदयेतस्यास्तेनत्वयिकृतास्थितिः
स्याहृदयेस्थितिःकृता हृदयेनत्वयिस्थितिःकृतेत्येवंवाक्यद्वयान्वयिअतोदीपकं गृहीतमुक्तरीतिसद्भावादेकाव
लीचेतिदीपकैकावलीयोगः यथावा संग्रामांगणमागतेनभवताचापेसमारोपितेदेवाकर्णययेनयेनसहसाय
द्यत्समासादितं कोदंडेनशराःशरैररिशिरस्तेनापिभूमंडलं तेनत्वंभवताचकीर्तिरतुलाकीर्त्याचलोकत्रयं अत्रये
नयेनसहसायद्यत्समासादितमितिसंक्षेपवाक्यस्थितमेकंसमासादितपदंकोदंडेनशराइत्यादिषुषट्स्वपिविवर
णवाक्येषुतत्तदुचितलिंगवचनविपरिणामेनान्वेतीतिदीपकंशरादीनामुत्तरोत्तरविशेषणभावादेकावलीचेतिदी
पकैकावलीयोगः

सारइति सारोनामालंकारः तस्याः स्फधातः अंतरिति विष्णोरंतःउदरे त्रयाणांलोकानांसमाहारस्त्रिलोकी सोपिविष्णुरपिफणिनांनागा
नामीश्वरे शेषे शेतेनिद्राति सोपिशेषोपिसिंधोरेकदेशेतिष्ठतीति शेषः तमपिसिंधुमपिकुंभयोनिःअगस्त्यःचुलकयांचकार पीतवान् अ

उत्तरोत्तरमुत्कर्षःसारइत्यभिधीयते मधुरंमधुतस्माच्च स्फधातस्याःकवेर्वचः यथावा अंतर्विष्णोस्त्रि
लोकीनिवसतिफणिनामीश्वरे सोपिशेतेसिंधोःसोप्येकदेशेतमपिचुलकयांकुंभयोनिश्चकार धत्तेख
द्योतल्लीलामयमपिनभसिश्रीनृसिंहक्षितींद्रत्वत्कीर्त्तेःकर्णनीलोत्पलमिदमपिचप्रेक्षणीयंविभाति अ
यंश्लाघ्यगुणोत्कर्षः अश्लाघ्यगुणोत्कर्षोयथा तृणाल्लघुतरस्तूलस्तूलादपिचयाचकः वायुनाकिन्ननी
तोसौमामयंप्रार्थयेदिति उभयरूपोयथा गिरिर्महान्गिरेरब्धिर्महानब्धेर्नभोमहत् नभसोपिमहद्ब्र
ह्मततोप्याशागरीयसी अत्रब्रह्मपर्यंतेषुमहत्वंश्लाघ्यगुणः प्रकृतार्थेत्वाशायामश्लाघ्यगुणः

यमगस्त्योपिनभसिगगने खद्योतशोभांधत्ते इदंगगनमपिप्रेक्षणीयंस्फंदरंत्वत्कीर्त्तेः कर्णभूषणंनीलोत्पलंविभातीत्यन्वयः तूलःका
र्पासः प्रकृतार्थाशायां प्रकृतार्थरूपायामाशायां इतिसारालंकारः ७

यथासंख्यमिति क्रमिकाणां क्रमेणोक्तानांपदार्थानां तेनैवक्रमेणान्वयोयथासंख्यंनामालंकारः शरणमिति कृपणेनधनानि
यत्नत्यज्यंते तत्किंनानिशरणंप्रपन्नानियच्चनभुज्यंते तत्किंविषवन्मारयंतीतिक्रमेणान्वयः कैचिद्वामनादयः इतियथासंख्यालंकारः पर्या

यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयः शत्रुंमित्रंविपत्तिंचजयरंजयभंजय यथावा शरणंकिंप्रपन्नानिविषव
न्मारयंतिवा नत्यज्यंतेनभुज्यंतेकृपणेनधनानियत् असुंक्रमालंकारइतिकेचिद्व्याजह्रुः पर्यायोयदिपर्यायेणै
कस्यानेकसंश्रयः पद्मंमुक्त्वागताचंद्रंकामिनीवदनोपमा अत्रैकस्यकामिनीवदनसादृश्यस्यक्रमेणपद्मचंद्ररू
पानेकाधारसंश्रयणंपर्यायः यद्यपिपद्मसंश्रयणंकंठतोनोक्तंतथापिपद्मंमुक्त्वेतितत्परित्यागोक्त्याप्राक्
तत्संश्रयाक्षेपेणपर्यायनिर्वाहः

यइति पर्यायेणक्रमेणअनेकसंश्रयः अनेकाश्रितत्वं तदुक्तं एवंक्रमेणानेकस्मिन् पर्यायइति पद्ममिति रात्रौपद्मसंकोचात्त्यागः

अत एवत्यागेन पूर्वसंश्रयणाश्लेषादेव श्रोणीति जघनबंधस्तनुतां कृशतां त्यजति मध्यभागस्तां सेवते आश्रयति वक्षःस्थलं कुचसचिव
तां कुचसहितत्वं धत्ते वक्रत्वद्वितीयं अत्र पूर्ववक्षसोऽद्वितीयत्वादगमात्पर्यायसंभवो ज्ञेयः अद्वितीयत्वं द्वितीयरहितत्वमनुपमत्वं चैक
त्वेनाध्यवसितं एवं चोदोहरणद्वयेपि पूर्वाधारसमाश्रयणं गम्यं उत्तराधारसमाश्रयणं शाब्दमिति सर्वत्र सर्वाधारसमाश्रयणां शे नन्विति

अतएव श्रोणीबंधस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां
धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्रं त्वद्गात्राणां गुणविनिमयः कल्पितो यौवनेने त्यत्र पर्या
यं काव्यप्रकाशकृदुदाजहार सर्वत्र शाब्दः पर्यायो यथा नन्वाश्रयस्थितिरियं तव कालकूट केनो
त्तरोत्तरविशिष्टपदोपादिष्टा प्रागर्णवस्य हृदये वृषलक्ष्मणोथ कंठेधुना वससि वाचि पुनः खला
नां सर्वोप्ययं शुद्धपर्यायः

हे कालकूट उत्तरोत्तरविशिष्टमुत्कृष्टं पदं स्थानं यस्यां तादृशीइयमाश्रयस्थितिस्तव केनोपदिष्टेत्यन्वयः हृदये अभ्यंतरे अवसइति शेषः
अथानंतरं वृषलक्ष्मणो हरस्य कंठे अधुना पुनरिति संबधः रूढः संकोचविकासामिश्रितः

115

प्राय इति शैत्यं प्रायोऽशेषां वसुधां हेमंते ऽचरित्वा ततो वसंते तरूणां छायासु विश्रम्य संप्रति ग्रीष्मे तिग्मभानौ सूर्ये प्रौढिं प्रागल्भ्यं प्राप्ते सति शनैरपांजलानामंतरभ्यंतरे अयासीत् गच्छति स्मेत्यर्थः बिंबोष्ठ एवेति बिंबफलसदृशे ओष्ठे रागो रक्तिमा अनुरागश्च एषः रागः अत्र रागस्य भेदे ऽप्यभेदाध्यवसायादेकत्वं यत्तु एकसंबंधनाशोत्तरमपरसंबंधे सत्येव लोके पर्यायपदप्रयोगात् श्रोणीबंध इति प्रकाशोदाहृतेन

संकोचपर्यायो यथा प्रायश्चरित्वा वसुधामशेषां छायासु विश्रम्य ततस्तरूणां प्रौढिंगते संप्रति तिग्मभानौ शैत्यं शनैरंतरपामयासीत् अत्र शैत्यस्योत्तरोत्तरमाधारसंकोचात्संकोचपर्यायः विकासपर्यायो यथा बिंबोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत अधुना हृदयेप्येष मृगशावाक्षि दृश्यते अत्र रागस्य पूर्वाधारापरित्यागेनाधारांतरसंक्रमणमिति विकासपर्यायः एकस्मिन्यद्यनेकं वा पर्यायः सोपि संमतः अधुना पुलिनं तत्र यत्र स्रोतः पुराजनि

थैव दृष्टत्वाच्च बिंबोष्ठ एवेत्यत्र पर्यायकथनमयुक्तमिति केनचिदुक्तं तत्प्रकाश एव बिंबोष्ठ इत्युदाहरणे पर्यायसमर्थनात् भ्रांतप्रलपनमिवोपेक्षणीयं आलंकारिकपरिभाषितानां शब्दानां लोकव्यवहारविसंवादस्याकिंचित्करत्वाच्चेति दिक् भेदांतरमाह एकस्मिन्निति पर्यायेणेत्यनुवर्त्तते एकस्मिन्नाधारे क्रमेण यद्यनेकं भवति सोपि पर्यायालंकारः संमत इत्यर्थः

पुरेति अस्माकमित्यस्मदोद्वयोश्चेतिद्वयोरपिबहुवचनं पुरेत्यनेनस्थूलातीतकाल उच्यते तत्रापिप्रथमंतनुरविभिन्नाऽभूत् ततोनुवित
र्केत्वंप्रियतमः वयंप्रियतमाः इदानींतुत्वंनाथःपतिः वयंभार्याः इ तोऽपरंकिमनिष्टमितिशेषः कुलिशंवज्रं अत्रत्वंप्रेयानित्येकवचनेन एक
रूपप्रेमपात्रत्वंव्यज्यते प्रियतमाइत्यादिबहुवचनेनैकरूपतद्व्यतिरेकइतिबोध्यं इतिपर्यायः परिवृत्तिरिति न्यूनाधिकयोर्मिथःपरस्परंविनि

यथावा पुराभूदस्माकंप्रथममविभिन्नातनुरियंततोनुत्वंप्रेयान्वयमपिहताशाःप्रियतमाः इदा
नींनाथस्त्वंवयमपिकलत्रंकिमपरंहतानांप्राणानांकुलिशकठिनानांफलमिदं अत्रदंपत्योःप्र
थममभेदः ततःप्रेयसीप्रियतमभावः ततोभार्यापतिभावः इत्याधेयपर्यायः परिवृत्तिर्विनि
मयोन्यूनाभ्यधिकयोर्मिथः जग्राहैकंशरंमुक्त्वाकटाक्षात्सरिपुश्रियं यथावा तस्यचप्रवय
सोजटायुषःस्वर्गिणः किमिवशोच्यतेधुना येनजर्जरकलेवरव्ययात्क्रीतमिंदुकिरणोज्वलंयशः

मयःपरिवृत्तिरलंकारः जग्राहेति कटाक्षपूर्वकंएकंशरंमुक्त्वारिपोःश्रियंजग्राहेत्यर्थः तस्यचेति प्रवयसोऽतिवृद्धस्यजटायुषोगृध्रविशेषस्यस्वर्गं
गतवतः किमिवशोचनीयंनकिंचित् जर्जरंजीर्णतरंकलेवरंशरीरंतस्यव्ययोरावणेनसहयुद्धेत्यागस्तस्माद्यशःक्रीतं शरीरंदत्वायशोगृहीत
मित्यर्थः इतिपरिवृत्त्यलंकारः

(118)

परिसंख्येति एकंवस्तुप्रतिषिध्यापरस्मिन्‌वस्तुनोनियंत्रणं नियमनं परिसंख्यालंकारः स्नेहेति स्नेहस्तैलादिस्निग्धद्रव्यं अनुरागश्च स्वांतेषु चित्तेषु विलंघयंतीति यस्यामुज्जयिनीपुर्यां श्रुतिःकर्णःवेदश्च वर्त्ममार्गं वक्रिमाणंकौटिल्यं वक्राकारतांच महाकालइतितत्रैवख्यातंशिवलिंगं

परिसंख्यानिषिध्यैकमेकस्मिन्वस्तुयंत्रणं स्नेहक्षयः प्रदीपेषुनस्वांतेषुनतभ्रुवां यथावा विलंघयंतिश्रुतिवर्त्मयस्यांलीलावतीनां नयनोत्पलानि बिभर्तियस्यामपिवक्रिमाणमेको महाकालजटार्धचंद्रः आद्योदाहरणे निषेधःशाब्दः द्वितीयेत्वार्थः विरोधेतुल्यबलयोर्विकल्पालंकृतिर्मता सद्यः शिरांशिचापान्यानमयंतुमहीभुजः अत्रसंधिविग्रहप्रमाणप्राप्तयोःशिरश्चापनमनयोर्युगपदुपस्थितयोर्युगपत्कर्तुमशाक्ययोर्विकल्पः यथावा पतत्यविरतंवारिनृत्यंतिचकलापिनः अद्यकांतःकृतांतोवादुःखस्यांतंकरिष्यति प्रियसमागमश्चेन्नमरणमाशंसनीयंमरणेतुनप्रियसमागमसंभव इतितयो राशंसायांविकल्पः

इतिपरिसंख्यालंकारःसंधिविग्रहप्रमाणेति संधिविग्रहयोःकर्त्तव्यताबोधकप्रमाणेत्यर्थः इति विकल्पः ७ ७ ७ ७

बहूनामिति युगपत् भावो भवनं तद्भाजां बहूनां गुंफो निबंधः वर्णनमिति यावत् समुच्चयालंकारः बिभ्राणेति नायकं प्रति दूत्याद्युयमुक्तिः हे साधो त्वया हृदये विनिहितं प्रेमाभिधानं नवं शल्यं धारयंती विधुरिता विरहविह्वला सा नायिका यद्विदधाति तदाकर्ण्यतामित्यन्वयः किंत

बहूनां युगपद्भावभाजां गुंफः समुच्चयः नश्यंति पश्चात्पश्यंति त्रस्यंति च भवद्द्विषः अविरोधेन संभावितयौगपद्यानां नाशादीनां गुंफनं समुच्चयः यथावा बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं शल्यं यद्विदधाति सा विधुरिता साधो तदाकर्ण्यतां शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेंखति भ्राम्यत्युल्लुठति प्रणश्यति गलत्युन्मूर्छति त्रुट्यति अत्र कासांचित् क्रियाणां किंचित्कालभेदसंभवेपि शतपत्रपत्रशतभेदन्यायेन यौगपद्यं विरहातिशयद्योतनाय विवक्षितमिति लक्षणानुगतिः

दित्यपेक्षायामाह शेते निद्राति ताम्यति ग्लानिं प्राप्नोति प्रकर्षेण म्लायति प्रेंखति चलति प्रणश्यति नैर्बल्यातिशयेन म्रुतप्राया भवति गलति खेदातिशयात् त्रुट्यति क्षीणा भवतीति कासांचित् शयनभ्रमणादीनां शतपत्रस्य कमलस्य पत्रशतं दलशतं

अहंप्राथमिकेति अहंपूर्विकेत्यर्थः अहंपूर्वमहंपूर्वमित्यहंपूर्विकास्त्रियामित्यमरः एककार्यान्वयेएक कार्यसाधकत्वे सःसमुच्चयालं
कारः अहमहमिकया परस्पराहंकारेण आभिजात्यं कुलीनत्वं समग्रं पुष्कलं प्रदानमिति प्रच्छन्नंगुप्तं गृहंप्रत्युपगतेऽर्थादतिथौ ल

अहंप्राथमिकाभाजामेककार्यान्वयेपिसः कुलंरूपंवयोविद्याधनंचमदयंत्यमुं य
त्रैकःकार्यसिद्धिहेतुत्वेनप्रक्रांतस्तत्रान्येपियद्यहमहमिकयाखलेकपोतन्यायेन तत्सि
द्धिंकुर्वंतिसोपिसमुच्चयः यथामदेआभिजात्यमेकंसमग्रंकारणंतादृगेवरूपादिकमपि
तत्साधनत्वेनावतरतीति यथावा प्रदानंप्रच्छन्नंगृहमुपगतेसंभ्रमविधिर्निरुत्सेकोल
क्ष्म्यामनभिभवगंधाःपरकथाः प्रियंकृत्वामौनंसदसिकथनंचाप्युपकृतेःश्रुतेत्यंता
सक्तिःपुरुषमभिजातंकथयति

क्ष्म्यांसत्यांनिरुत्सेकोगर्वाभावः अभिभवोनिंदा तद्गंधशून्याः मौनं अनुद्घाटनं सदसिसभायांपरेणकृतायाउपकृतेःकथनं श्रुतेःशास्त्रश्र
वणे सर्वप्रथमांतानांपुरुषमभिजातंप्रथयतीत्यनेनान्वयः अभिजातंकुलीनं प्रथयतिकथयति इतिसमुच्चयालंकारः ७

क्रमिकेति क्रमिकाणामर्थात् क्रियाणामेककारकगतानां गुंफो निबंधः कारकदीपकं नामालंकारः तदुक्तं सैव क्रियासु बह्वीषु कारकस्ये
तिदीपकमिति सेवसकृद्वृत्तिः पश्यति सार्थं पृच्छति मार्गं निद्रातीति हे अब्धिकन्ये प्रभूणा मुद्यतदंडे द्वारि अधिकृतैर्द्वारपालैरित्यस

क्रमिकैकगतानां तु गुंफः कारकदीपकं गच्छत्यागच्छति पुनः पांथः पश्यति पृच्छति यथा वा निद्राति स्नाति
भुंक्ते चलति कचभरं शोषयत्यंतरास्ते दीव्यत्यक्षैर्नचायं गादितुमवसरो भूय आयाहि याहि इत्युद्दं
डैः प्रभूणामसकृदधिकृतैर्वारितान् द्वारि दीनानस्मान् पश्याब्धिकन्ये सरसिरुहरुचामंतरंगैरपांगैः
आद्योदाहरणे श्रुतस्य पांथस्य कर्तृकारकस्यैकस्य गमनादिष्वन्वयः द्वितीये तु अध्याहृतस्य प्रभुक
र्तृकारकस्य निद्रादिष्वन्वय इत्येकस्यानेकवाक्यार्थान्वयेन दीपकच्छायापत्त्या कारकं दीपकं प्रथमसमुच्चय
प्रतिद्वंद्वीदं

कृद्वारितानत एव दीनानस्मान्सरसिरुहच्छवी
नां परमपरिचितैरपांगैः कटाक्षैः पश्येत्यन्वयः इतिकिं प्रभुर्निद्रातीत्यादि अंतः अंतःपुरे अक्षैः पाशैर्दीव्यति क्रीडति भूयः पुनः छाया
सादृश्यं मुख्यदीपकस्य पूर्वोक्तप्रकारेण संभवादिति भावः प्रतिद्वंद्वि विपरीतं इति कारकदीपकालंकारः ७

(118)

कुवल॰
११७

समाधिरिति कारणांतरसंनिधेर्वशात्कार्यस्य सुकरत्वं समाधिरलंकारः उत्कंठिता नायकसमीपं गंतुं मानमिति मानं निराकर्तुमस्याः पादयोः पतिष्यतो मम मोपकाराय दिष्ट्या भाग्येनेदं घनगर्जितमुदीर्णमुद्गतमित्यन्वयः समुच्चये कारणानां तुल्यकक्षत्वमिह तु तद्विपरीतमतु

समाधिः कार्यसौकर्यं कारणांतरसंनिधेः उत्कंठिता च तरुणी जगामास्तं च भानुमान् यथा वा मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः उपकाराय दिष्ट्येतदुदितं घनगर्जितं केनचिदारीप्सितस्य कार्यस्य कारणांतरसन्निधानाद्यत्सौकर्यं तत्सम्यगाधानात्समाधिः द्वितीयसमुच्चयप्रतिद्वंद्वी अयं समाधिः तत्र बहूनां प्रत्येकं समर्थानां खलेकपोतिकान्यायेन युगपत्कार्यसाधनत्वेनावतारः अत्र त्वेकेन कार्ये समारीप्सिते अन्यस्य काकतालीयन्यायेनापतितस्य तत्सौकर्याधायकत्वमात्रं अत्रोदाहरणमुत्कंठितेति उत्कंठैव प्रियाभिसरणे पुष्कलं कारणं नांधकाराममपेक्षते अत्यारूढो हि नारीणामकालज्ञो मनोभव इति न्यायात् दैवादापतितात्वंधकारेण तत्सौकर्यमात्रं कृतमिति एवं द्वितीयोदाहरणेपि योज्यं

ल्यकक्षत्वमिति प्रतिद्वंद्वित्वं तत्रेत्यादिना दर्शितं इति समाध्यलंकारः ७ ७,

चं॰ र
११ ३

प्रत्यनीकमिति बलवतः शत्रोः पेक्षे पक्षांतःपाति निनदीयेयः पराक्रमस्तत्प्रत्यनीकं नामालंकारः अनीकप्रतिनिधिरूपत्वात् जैत्रेति उत्पलाभ्यां स्वजयकारि नेत्रानुसारिणौ कर्णौ अधःकृतौ तिरस्कृतौ अवतंसतया तदुपरिस्थितत्वादधस्तात्कृतौ चेति श्लेषः ममेति भुवि भूलोके ममरूपख्यातिं यो हृतवान् तस्मिन्ननुप्रविष्टमनुरक्तं हृदयं यस्यास्तस्यानुप्रविष्टहृदयं यस्यां वा तादृगियमिति त्वयि मत्सरादिव खलु निश्चितं

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ यथा वा ममरूपकीर्तिमहृद्भुवि यस्तदनुप्रविष्टहृदयेयमिति त्वयि मत्सरादिव निरस्तदयः स्फुतरां क्षिणोति खलु तां मदनः एवं बलवति प्रतिपक्षे प्रतिकर्तुमशक्तस्य तदीयबाधनं प्रत्यनीकमिति स्थिते साक्षात्प्रतिपक्षे पराक्रमः प्रत्यनीकमिति कैमुतिकन्यायेन फलति

निरस्तदयो मदनस्तां क्षिणोति क्षीणां करोतीत्यन्वयः अत्र मत्सरादिवेति हेत्वंशे उत्प्रेक्षासत्त्वेपि तद्धेतुकप्रतिपक्षसंबंधिबाधनं प्रत्यनीकालंकारस्य विविक्तो विषय इति बोध्यं अत एव मम्मटभट्टैरपि त्वं विनिर्जितमनोभवरूपः सा च सुंदर भवत्यनुरक्ता पंचभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव काम इत्युदाहृतं एवं च हेतूत्प्रेक्षयैव गतार्थत्वान्नेदमलंकारांतरं भवितुमर्हतीति कस्यचिद्वचनमनोदयं कैमुतिकेति तत्संबंधिबाधनापेक्षया साक्षान्नहाधने विशेषादिति भावः ७

कुवल०
११८

भ्रविति भ्रमरौघः स्वकीयमधुप्रपारूपस्य पद्मस्य निमीलनेन कुपितः सन् क्षधांशोर्बिंबं बलात्समाक्रम्य तस्यांकेमध्यभागे कलंकं भ्रव

चं०८

मातनोतीत्यन्वयः इतिप्रत्यनीकालंकारः कैमुत्येनेति कैमुत्यन्यायेनेत्यर्थः काव्येलंकाररूपार्थापत्तिः काव्यार्थापत्तिः दंडा

यथा मधुव्रतौघः कुपितः स्वकीयमधुप्रपापद्मनिमीलनेन बिंबं समाक्रम्य बलात्क्षधांशोः कलंकमंके भ्रवमातनोति कैमुत्यनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते सजितस्त्वन्मुखेनेंदुः कावार्त्ता सरसीरुहां अत्र सइत्यनेन पद्मानियेनजिता नीतिविवक्षितं तथाच सोपियेनजितस्तेन पद्मानिजितानी तिकिमुवक्तव्यमिति दंडापूपिकान्यायेन पद्मरूपस्यार्थस्यसंसिद्धिः काव्यार्थापत्तिः तांत्रिकाभिमतार्थापत्तिव्यावर्त्तनाय काव्ये तिविशेषणं यथावा अधरोयमधीराक्ष्याबंधुजीवप्रभाहरः अन्यजीवप्रभांहंतहरतीतिकिमद्भुतं स्व कीयंहृदयंभित्वानिर्गतौयोपयोधरौ हृदयस्यान्यदीयस्यभेदनेकाकृपातयोः

पूपिकेति दंडाकर्षणे तदवलंबिनामपूपानामाकर्षणं यथाऽर्थसिद्धंतद्वदित्यर्थः व्यावर्तनायेति लक्ष्यतावारणायेत्यर्थः अधरोयमिति बंधुजीवं बंधू कपुष्पं तत्प्रभाहरः बंधुभूतानांजीवानां प्रभाहरश्च यत्तेतल्लक्षणमयुक्तं कैमुतिकन्यायस्य न्यूनार्थविषयत्वेनाधिकार्थापत्तावव्याप्तेः यथा तवा

११८

ग्रे यदि दारिद्र्यं स्थितं भूपद्विजन्मनां शनैः सवितुरप्यग्रे तमः स्थास्यत्यसंशयं अत्र शनैः शब्दमहिम्ना राजाग्रे दारिद्र्यस्थित्यपेक्षया सूर्याग्रे
तमोवस्थानं दुःशकमेवेत्यवगतमपि न्यायसाम्यादापाद्यते ननु कैमुतिकन्यायेनेति केनचिदुक्तं तत्रेदं वक्तव्यं केनचिदर्थेन तुल्यन्याय
त्वादर्थांतरस्यापत्तिरर्थापत्तिरिति तदुक्तलक्षणमयुक्तं कावार्ता सरसिरुहामित्यादिकैमुत्यन्यायविषयार्थापत्ताव्याप्तेः कैमुति
कन्यायस्य न्यूनार्थविषयत्वेन तुल्यन्यायत्वाभावादापादनाप्रतीतेश्चेति नचात्र कैमुत्यन्यायतामात्रं न त्वलंकारत्वमिति युक्तं अ
लंकारतत्वाभियुक्तानां प्राचीनानां शून्यहृदयताया अपामरेण संभावयितुमशक्यत्वात् लोकव्यवहारेपि कैमुत्यन्यायस्य चम
त्कारित्वानुभवेन तेनैवन्यायेन तस्यालंकारतासिद्धेश्च इत्थं च त्वदुक्तार्थापत्त्युदाहरणे वक्ष्यमाणः संभावनालंकारोपोऽन्ये यद्य
र्थोक्तौ च कल्पनमिति यद्यर्थातिशयोक्तित्वेनोक्तः यद्यर्थातिशयोक्तावापाद्यापादकयोर्विपरीतार्थविश्रांतत्वमिह त्वापादकस्य
सिद्धत्वमापाद्यस्य संभाव्यमानत्वमिति वैचित्र्यं तु तदवांतरभेदतायाः साधकं न तु तद्बहिर्भूततताया इति न तत्राव्याप्तिशंकापीत्यलं
विस्तरेण इत्यर्थापत्तिः समर्थनीयस्येति समर्थनापेक्षस्यार्थस्य समर्थनं काव्यलिंगमलंकारः अर्थांतरन्यासवारणाय सम
र्थनापेक्षस्येति यदा त्वर्थांतरन्यासप्रकरणे वक्ष्यमाणरीत्या सामान्यविशेषभावातिरिक्तत्वं निवेश्यते तदानीं पादेयमेवैतदि

(120)

तिबोध्यं दुष्करविषयत्वात्दुष्करविषयरूपत्वात् समर्थनापेक्षस्येत्यनंतरमर्थस्येतिशेषः नैय्यायिकेति नैय्यायिकाभिमतलिंगस्यलक्ष्यतावा रणायेत्यर्थः भस्मोद्धूलनेति संबोधनं शुभमस्त्वितिशेषः गिरिसुताकांतस्यशिवस्यालयः प्रासादस्तदलंकारभूतेसोपानपंक्तेइ.

समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनं जितोसिमंदकंदर्पमच्चित्तेऽस्ति त्रिलोचनः अत्रकंदर्पज योपन्यासोदुष्करविषयत्वात्समर्थनसापेक्षः तस्यमच्चित्तेस्ति त्रिलोचनइति स्वांतःकरणे शिवसन्नि धानप्रदर्शनेन समर्थनंकाव्यलिंगं व्याप्तिधर्मतासापेक्षनैय्यायिकलिंगव्यावर्त्तनायकाव्यविशे षणं इदंवाक्यार्थहेतुकंकाव्यलिंगं पदार्थहेतुकं यथा भस्मोद्धूलनभद्रमस्तुभवते रुद्राक्षमा लेशुभंहासोपानपरंपरे गिरिसुताकांतालयालंकृते आद्याराधनतोषितेनविभुनायुष्मत्सप र्यासुखालोकोच्छेदिनि मोक्षनामनिमहामोहेनिलीयामहे अत्रमोक्षस्यमहामोहत्वमप्रसिद्ध मितितत्समर्थनेसुखालोकोच्छेदिनीतिपदार्थोहेतुः क्वचित्पदार्थवाक्यार्थौपरस्परसापेक्षौहेतुभावंभजतः

त्यपिसंबोधनं हेतिदैन्ये विभुनाप्रभुणाशिवेन युष्माकंयासपर्यापूजातत्सुखस्यालोकःप्रकाशस्तदुच्छेदके निलीयामहेवयमित्यर्थात्

चिकुरेति चिकुरप्रकराः केशकपाशाः विदुषीपंडितासादमयंती अपुरस्कृतेन अनादृतेन पुरोभागेऽनिहितेनच पदार्थश्च अनेकपदार्थश्च वपुरिति पुरापूर्वस्मिन् क्वापि जन्मनि क्वचिदपि क्षणे भवंतेन प्रणतवान् इतीदं वपुषः शरीरस्य प्रादुर्भावादनुमितं संप्रति नमन्

यथावा चिकुरप्रकराजयंतितेविदुषीमूर्द्धनियान्बिभर्त्तिसा पशुनाप्यपुरस्कृतेनतत्तुलनामिलतु चामरेणकः अत्रचामरस्यदमयंती कुंतलभारसाम्याभावे विदुषीमूर्द्धनियान्बिभर्त्तिसेतिवाक्यार्थः पशुनाप्यपुरस्कृतेनेतिपदार्थश्चेन्युभयं मिलितं हेतुः क्वचित्समर्थनीयार्थसमर्थनार्थेवाक्यार्थेपदार्थोहेतुः यथावा वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा पुरारे नकापि क्वचिदपि भवंतं प्रणतवान् नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिमानितीशक्षंतव्यं तदिदमपराधद्वयमपि अत्रताव दपराधद्वयं समर्थनीयं अस्पष्टार्थत्वात् तत्समर्थनंच पूर्वापरजन्मनोरनमनाभ्यां वाक्यार्थभूताभ्यां क्रियते

नतिं कुर्वन् मुक्तः अतनुरशरीरः अहमग्रेप्यनतिमान् नतिरहितः समर्थनीयं हेतुकथनेनोपपादनीयं अस्पष्टार्थत्वात् अस्पष्टहेतुकत्वात् ७, ७,

12l

अत्रअनयोर्वाक्यार्थयोर्मध्ये द्वितीयवाक्यार्थे अग्रेप्यनतिमानिनिवाक्यार्थे अत्रापि अतनुत्वेपि नमन्मुक्तइत्यस्यावाक्यत्वादा

ह अनेकपदार्थोवेति असोढेति तपस्यंतीमुमांप्रतिबटुवेषेणागतस्यहरस्यवर्णनं कपटेनयोर्बटोर्ब्रह्मचारिणोवेषस्तस्यापनयने

अत्रद्वितीयवाक्यार्थेऽतनुत्वमेकपदार्थहेतुः अत्रापिसंप्रतिनमन्मुक्तइतिवाक्यार्थोनेकपदार्थोवाहेतुः
कश्चित्परस्परविरुद्धयोः समर्थनीययोरुभयोः क्रमादुभौहेतुभावंभजतः यथा असोढातत्कालोल्लस
द सहभावस्यतपसःकथानांविस्रंभेष्वथचरसिकःशैलदुहितुः प्रमोदंवोदिश्यात्कपटबटुवेषापनयनेत्व
राशैथिल्याभ्यांयुगपदभियुक्तःस्मरहरः अत्रशिवस्ययुगपत्कृत्रिमब्रह्मचर्यवेषापनयनत्वरातदनु
वर्त्तनेछयोर्विरुद्धयोः क्रमाद्गिरिजातीव्रतपसोसहिष्णुत्वं तत्संलापकौतुकंचेत्युभावर्थौहेतुत्वेननिबद्धो कचि
त्परस्परविरुद्धयोरुभयोःसमर्थनीययोरेकएवहेतुः

त्यागेत्वराशैथिल्याभ्यांयुगपदभियुक्तआक्रांतःत्वराशै
थिल्यहेतुगर्भंक्रमेणाविशेषणद्वयमाह तत्कालेउल्लसन्प्रादुर्भवन्नसहभावोदुःसहत्वमर्थात् गौर्यायस्यतादृशस्यतपस असोढासह
नासमर्थः शैलकन्यायाःकथानांविस्रंभेषुविश्वासेषुरसिकश्चेति ब्रह्मचर्यं ब्रह्मचारिवेषः

प्रस्तुतव्यंजकतयेति अप्रस्तुताभिधानंयुज्यतइत्यनुषज्यते एवमग्रेपि विस्रब्धेति खलस्यविश्वस्तघातरूपोदोषः स्वस्यैववधायभवतियतोवी
राणांकोपकारकः सिंहनिद्रापहारीनवतरुभंगजन्यध्वनिःकरिणोवधाययथेत्यर्थः तददर्शनात् उपमानत्वादर्शनात् ननुमहापुरुषाकृतिरि

नन्वयंकाव्यलिंगान्नातिरिच्यते तथाहि उदाहरणद्वयेप्यप्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयोर्विशेषसा
मान्ययोःकथमुपकरोतीतिविवेक्तव्यं नहिसर्वथैवप्रस्तुतानन्वय्यप्रस्तुताभिधानंयुज्यते नतावद्प्रस्तुत
प्रशंसायामिवप्रस्तुतव्यंजकतयाप्रस्तुतयोरपिविशेषसामान्ययोःस्वशब्दोपात्तत्वान्नाप्यनुमानालंकारइव
प्रस्तुतप्रतीतिजनकतयातद्वदिहव्याप्तिपक्षधर्मताद्यभावात् नापिदृष्टांतालंकारइवउपमानतया विस्र
ब्धघातदोषः स्ववधायखलस्यवीरकोपकरः नवतरुभंगध्वनिरिवहरिनिद्रातस्करः करिणइत्यादिषुसामा
न्येविशेषस्योपमानत्वदर्शनेपिविशेषेसामान्यस्यक्वचिदपितददर्शनात् उपमानतयातदन्वयेसामंजस्या
प्रतीतेश्च तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोगइहापिवक्तव्यः

वगंभीरेयमस्याकृतिरित्यादौसामान्य
स्याप्युपमानतादृष्टेत्यरुचेराह उपमानतेति इवाद्यभावात्तात्पर्याभावाच्च उपमानतयाऽन्वयस्यसामंजस्येनाप्रतीतेरित्यर्थःइहापीत्यपिनाकाव्य
लिंगसमुच्चयः

पदार्थहेतुकं समस्तपदार्थहेतुकं पदार्थवाक्यार्थैतिद्वंद्वः प्रतीयमानोर्थः व्यंग्योर्थः प्रतिनिर्देशत्वादिति निर्दिश्यते उच्चार्यइतिनिर्दे

श्लेषाविघटमानार्थघटकार्थस्यवर्णनमितिश्लेषलक्षणमितिचजयदेवेनोक्तं वस्तुतस्तत्रापिपदार्थहेतुकं
काव्यलिंगमेव तद्भेदकाभावात् ननुसाभिप्रायपदार्थवाक्यार्थविन्यसनरूपात्परिकरात्काव्यलिंगस्यकिं
भेदकं उच्यते परिकरेपदार्थवाक्यार्थबलात्प्रतीयमानार्थौवाच्योपस्कारकतांभजतः काव्यलिंगेतुपदार्थ
वाक्यार्थावेवहेतुभावंभजतः ननुयद्यपिस्फुरवालोकोच्छेदिनीत्यादिपदार्थहेतुककाव्यलिंगोदाहरणेअग्रे
प्यनतिमानित्यादिवाक्यार्थहेतुककाव्यलिंगोदाहरणेचपदार्थवाक्यार्थावेवहेतुभावंभजतस्तथापिपशुनाप्य
पुरस्कृतेनेतिपदार्थहेतुकोदाहरणेमच्चित्तेत्स्तित्रिलोचनइतिवाक्यार्थहेतुकोदाहरणेच प्रतीयमानार्थस्या
पिहेतुकोद्यनुप्रवेशोदृश्यते पशुनेतिह्यविवेकत्वाभिप्रायगर्भं विदुषीत्यस्यप्रतिनिर्देशत्वात्त्रिलोचन
इतिचकंदर्पदाहकतृतीयलोचनत्वाभिप्रायगर्भंकंदर्पजयोपयोगित्वात्तस्य

शः शब्दः तेनविपरीतार्थकशब्द
त्वादित्यर्थः तस्य तादृशात्तृतीयलोचनतस्य तथाचोभयत्रपरिकरालंकारसत्वात्काव्यलिंगोदाहरणत्वमनुपपन्नमितिभावः ५ ३

तयोः पशुनेत्याद्युक्तोदाहरणयोः तदुत्थापितं परिकरोपपादितं व्यंग्यस्य हेतुकोटावेवानुप्रवेशादिति भावः एतदेवविवृणोति प्रतीयमानेनि वा
च्यस्यैवेत्येवकरसूचितं व्यंग्याद्वारकत्वं नहीत्यादिनाविवृतं तदमयमर्थः यदि पश्वादि पद व्यंग्यकेशपाशसाम्याभावादेरर्थस्य साक्षादुपपादकं
स्यात्तदात्र परिकर एवस्यान्न काव्यलिंगं नत्वेवमस्ति पशुपद प्रतीता विवेकित्व मात्रेण साम्याभावस्योपपादनासंभवात् किंतु तद्विशिष्टपशुपुरस्कृ

सत्यं तथापित नयोः परिकर एव किंतु तदुत्थापितं काव्यलिंगमपि प्रतीयमानाविवेकविशिष्टेन पशुनाप्युपुरस्कृतत्वस्या
नेकपदार्थस्य प्रतीयमानकंदर्पदाहकतृतीयलोचनविशिष्टस्य शिवस्य चित्तेसन्निधानस्यच वाक्यार्थस्य वाच्यस्यैव हेतुभावात्
नहि तयोर्वाच्ययोर्हेतुभावेताभ्यां प्रतीयमानं मध्ये किंचिद्द्वारमस्ति यथा सर्वाशुचिनिधानस्येत्यादि पदार्थ परिकरोदाहरणे
सर्वाशुचिनिधानस्येत्यादिनानेक पदार्थेन प्रतीयमानं शरीरस्यासंरक्षणीयत्वं तथाच वाक्यार्थ परिकरोदाहरणे पर्यायोक्त
विधया तत्तद्वाक्यार्थेन प्रतीयमानेनाहंव्यास इत्यादि तस्मात्पशुनेत्यत्र त्रिलोचन इत्यत्रच प्रतीयमानं वाच्यस्यैव पदार्थस्य
वाक्यार्थस्यच हेतुभावोपपादकतया काव्यलिंगस्यांगमेव

तत्वाभाव एव साक्षादुपपादक इतितत्कोटिनिविष्टं व्यंग्यं काव्यलिंगरूपस्य तस्यां
गमेव व्यंग्यांतरं तु नोक्तकाव्यलिंगगम्यमर्थोपपादकमस्तीति निराबाधमेव काव्यलिंगमिति ननु स्वयमन्योपपादकस्य काव्यलिंगस्याप्युपपाद
कं कदृष्टमित्याशंक्योदाहरति

यत्वन्नेत्रेति एतत्प्रतीपालंकारे प्रागुदाहृतं अनेकवाक्यार्थहेतुकेति पूर्वपादत्रयवाक्यार्थत्रयस्य चतुर्थपादार्थे हेतुत्वमिति ज्ञेयं हेतुभावोपपादकानीति इंदीवरस्य नेत्रसमानकांतित्वं विनापठादेरिव तद्दर्शनस्य देवगतकांतासादृश्यविनोदासहिष्णुत्वे हेतुत्वासंभावादिति भावः

यथा यत्वन्नेत्रसमानकांतिसलिले मग्नं तदिंदीवरमित्यनेकवाक्यार्थहेतुककाव्यलिंगोदाहरणे त्वन्नेत्रसमानकांतीत्यादिकानि इंदीवरशशिहंसविशेषणानि तेषां वाक्यार्थानां हेतुभावोपपादकानीति तत्र वाक्यार्थहेतुककाव्यलिंगे पदार्थहेतुककाव्यलिंगमंगमिति न तयोः काव्यलिंगोदाहरणत्वे काचिदनुपपत्तिः उक्तिरर्थांतरन्यासः स्यात्सामान्यविशेषयोः हनुमानब्धिमतरद्दुष्करं किं महात्मनां गुणवद्वस्तुसंसर्गाद्याति स्वल्पोपि गौरवं पुष्पमालानुषंगेन सूत्रं शिरसि धार्यते सामान्यविशेषयोर्द्वयोरप्युक्तिरर्थांतरन्यासस्तयोश्चैकं प्रस्तुतं अन्यदप्रस्तुतं भवति ततश्च विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यरूपस्य सामान्ये प्रस्तुते तेन सहाप्रस्तुतविशेषरूपस्यार्थांतरस्य न्यसनमर्थांतरन्यास इत्युक्तं भवति तत्राद्यस्य द्वितीयार्द्धमुदाहरणं द्वितीयस्य द्वितीयश्लोकः

समाहितमर्थमुपसंहरति इतीति तयोः पशुनापीति मच्चित्ते स्तीत्येतयोः इति काव्यलिंगालंकारः ७ ७ ७ १२२

जीयादिति अंबुधेस्तनयायालक्ष्म्या अधररसमास्वादयन्नयं मुरारिर्जीयात् सर्वोत्कर्षेण वर्त्ततां कीदृशः समुद्रमथनक्लेशं एवंविधांगनालाभात्स फलं कलयन् जानन् एतदधरमाधुर्ये सत्यमृतस्य वैयर्थ्याद्विफलं च कलयन्नित्यर्थः हे गोदावरीत्यत्रार्णवमध्येत्यादि ब्रह्मविशेषणस्यन्यसनं श्लेषाख्यो गुण इति जयदेवेनोक्तमित्यन्वयः तावकतटोद्देशे त्वदीयतीरभूमौ कलिंगाख्यः कविः बहूनां देशानां दर्शने सहचारिणीं विरक्तिमु

यथा जीयादंबुधितनयाधररसमास्वादयन् मुरारिरयं अंबुधिमथनक्लेशं कलयन् विफलं च सफलं च अत्र विफलत्व सफलत्वकलनयोरुभयोर्विरुद्धयोरेक एवांबुधितनयाधररसास्वादो हेतुः इदं काव्यलिंगं हेत्वलंकार इति केचिद्व्याजह्रुः हे गोदावरि देवि तावकतटोद्देशे कलिंगः कविर्वाग्देवीं बहुदेशदर्शनसखीं त्यक्त्वा विरक्तिं गतः एनामर्णवमध्यसुप्तसुरभिन्नाभीसरोजासनं ब्रह्माणं गमयक्षितौ कथमसावेकाकिनी स्थास्यति । इत्यत्र ब्रह्मणः प्रापणं कथं गोदावर्याकर्त्तव्यमित्यसंभाविनीयार्थोपपादकस्यार्णवमध्येत्यादि तद्विशेषणस्यन्यसनं श्लेषाख्यो गुण इति

क्किं एनां सरस्वतीं ब्रह्माणं प्रति गमयन येति संबंधः कीदृशं अर्णवमध्ये सुप्तो यो मुरभिन्मुरारिस्तन्नाभिकमलस्थं श्लेषोऽविघटमाने त्यत्राकारप्रश्लेषः अविघटमानस्यानुपपद्यमानस्यार्थस्य घटक उपपादको योऽर्थस्तस्य वर्णनं श्लेषाख्यो गुण इत्यर्थः ७)

124

प्रतीतिवैभवात् प्रतीतिदार्ढ्यरूपप्रयोजनवशात् प्रयोजनस्यापि हेतुत्वविवक्षया पंचमी उक्तवैलक्षण्यमुदाहरणनिष्ठतया दर्शयति नहीत्यादिना इत्यादिकाव्यलिंगोदाहरणेष्विव अथेत्याद्यर्थांतरन्यासोदाहरणेषु प्रक्तत्तस्य समर्थनार्थित्वं न ह्यस्तीति संबंधः

ततश्च वाक्यार्थहेतुकं काव्यलिंगमेवात्रापि स्यान्न त्वलंकारांतरस्यावकाश इति चेन्न

तू अत्र केचित्समर्थनसापेक्षस्यार्थस्य समर्थने काव्यलिंगं निरपेक्षस्यापि प्रतीतिवैभवात् समर्थनेऽर्थांतरन्यासः नहि यत्वन्नेत्रसमानकांतीत्यादिकाव्यलिंगोदाहरणेष्विव अथोपगूढे शारदाशशांके प्रावृड्ययौ शांततडित्कटाक्षा कासांन सौभाग्यगुणोंगनानां नष्टः परिभ्रष्टपयोधराणां

शारदा शशांके उपगूढे आलिंगिते सति अथानंतरं शांतास्तडिद्रूपाः कटाक्षा यस्याः सा प्रावृट् ययौ गतवती उक्तं विशेषरूपमर्थं सामान्यरूपेणार्थांतरेण समर्थयति परिभ्रष्टपयोधराणां कासामंगनानां सौभाग्यगुणो न नष्ट इति पयोधराः कुचा मेघाश्च

दिवाकरादिति कुमारसंभवे हिमालयवर्णने योहिमालयः ममत्वं मदीयताबुद्धिः शिरोमस्तकं शिखरंच समर्थनार्थितं स

दिवाकराद्रक्षतियो गुहास्कलीनं दिवाभीतमिवांधकारं क्षुद्रेपिनूनंशरणंप्रपन्ने ममत्वमु
च्चैःशिरसामतीव इत्याद्यर्थांतरन्यासोदाहरणेषु प्रस्तुतस्य समर्थनापेक्षत्वमस्तीति वस्तुनस्तु
प्रायोवादोयं अर्थांतरन्यासेपिहि विशेषस्यसामान्येन समर्थनानपेक्षत्वेपि सामान्यंविशे
षेणसमर्थनमपेक्षतएव निर्विशेषं न सामान्यमिति न्यायेन बहूनामप्यसाराणांसंयोगःका
र्यसाधकइत्यादिसामान्यस्य तृणैरारभ्यते रज्जुस्तया नागोपि बध्यतइत्यादिसंप्रतिपन्न
विशेषावतरणंविना बुद्धौ प्रतिष्ठितत्वासंभवात्

मर्थनापेक्षत्वं अयं अर्थांतरन्यासे समर्थनापेक्षत्वरूपः सामान्यस्येत्यस्य बुद्धौ प्रतिष्ठितत्वासंभवादित्यनेनान्वयः ७ ७

(१२८)

कुवल०
१२४

संप्रतिपन्नेति वक्तृश्रोतृसंमतेत्यर्थः विशेषावतरणं विशेषावगमं तत्र बहूनामित्यादौ सामान्यस्येति विशेषावतरणंविनैवबु चं०८

नचतत्रसामान्यस्यकासांनसौभाग्यगुणोंगनानामित्यादि विशेषसमर्थनार्थसामान्यस्येवलोक
संप्रतिपन्नतयाविशेषावतरणं विनैवबुद्धौ प्रतिष्ठितत्वंसंभवतीतिश्लोकेतन्न्यसनंनापेक्षित
मस्तीति वाच्यं सामान्यस्य सर्वत्रलोकसंप्रतिपन्नत्वनियमाभावात् नहियोयोधूमवान्सो
ग्निमानितिव्याप्तिरूपसामान्यस्यलोकसंप्रतिपन्नतयायथामहानसइनितद्विशेषरूपेदृष्टांता
नुपादनसंभवमात्रेणाप्रसिद्धव्याप्तिरूपसामान्योपन्यासेपितद्विशेषरूपदृष्टांतोपन्यास
नैरपेक्ष्यंसंभवति नचैवं सामान्येनविशेषसमर्थनस्थलेपिक्वचित्तस्यसामान्यस्यलोक
प्रसिद्धत्वाभावेनतस्यबुद्धावारोहायपुनर्विशेषांतरस्यन्यासप्रसंगइतिवाच्यं इष्टापत्तेः अ
त्रैवविषयेविकस्वरालंकारस्यानुपदमेवदर्शयिष्यमाणत्वात्

द्धौप्रतिष्ठितत्वंसंभवतीत्यग्रिमेणान्वितं तन्न्यसनं तृणैरित्यादिविशेषन्यसनं ७ ७ ७ ७ १२४

नन्वेवमप्यर्थांतरन्यासेक्वचिदेवसमर्थनापेक्षा काव्यलिंगेतुसर्वत्रसेत्यस्त्तभेदइत्याशंक्याह किंचेति कविकुलक्षुण्णत्वेनकविसमूहाभ्यस्त

किंचकाव्यलिंगेपिनसर्वत्रसमर्थनसापेक्षत्वनियमः चिकुरप्रकराजयंतितइत्यत्रतद्
भावादुपमानवस्तुषुवर्णनीयसाम्याभावेननिंदायाःकविकुलक्षुण्णत्वेनात्रसमर्थनापे
क्षाविरहात् नहितदास्यदास्येपिगतोधिकारितांनशारदःपार्वणशर्वरीश्वर इत्यादि
षुसमर्थनंदृश्यते नविषेणनशस्त्रेणनाग्निनानचमृत्युना अप्रतीकारपारुष्याःस्त्री
भिरेवस्त्रियःकृताः इत्यादिकाव्यलिंगविषयेषुसमर्थनापेक्षाविरहेपिअप्रतीकारपारु
ष्याइत्यादिनासमर्थनदर्शनाच्च

त्वेन तदास्यदास्येनलमुखदास्ये पर्वणिपूर्णिमायांभवःपार्वणः
शर्वरीश्वरश्चंद्रः नविषेणेत्यादेःस्त्रियःकृताइत्यनेनान्वयः अपितुस्त्रीभिरेव यतःप्रतीकाररहितंपारुष्यंक्रौर्येयासांतथाभूताः

(126)

उभयतः अन्वयव्यतिरेकाभ्यां समर्थनापेक्षायामपि तदास्य दास्येपीत्यादौ तदभावात् नविषेणेत्यादाव पेक्षाविरहेपि समर्थनसत्वात् अप्रकृतेनेति आद्ये महात्मनां सर्वस्फकरत्वेनाप्रकृतेन सामान्येन हनूमदब्धितरणस्य प्रकृतविशेषस्य समर्थनं द्वितीये पुष्पमालासूत्रवृत्तांतेनाप्रकृतेन विशेषरूपेण प्रकृतस्य गुणवत्संगप्रयुक्तपूज्यत्वस्य सामान्यरूपस्य समर्थनमित्यर्थः यदुच्यतइति

नहि तत्र स्त्रीणां विषादिनिर्मितत्वाभावप्रतिपादनं समर्थनसापेक्षं प्रसिद्धत्वात्तस्मादुभयतो व्यभिचारात् समर्थनापेक्षसमर्थने काव्यलिंगं तन्निरपेक्षसमर्थनेऽर्थांतरन्यासइति नविभागः किंतु समर्थ्यसमर्थकयोः सामान्यविशेषसंबंधेऽर्थांतरन्यासस्तदितरसंबंधे काव्यलिंगमित्येवव्यवस्थावधारणीया प्रपंचश्चित्रमीमांसायां द्रष्टव्यः एवमप्रकृतेन प्रकृतसमर्थनमुदाहृतं प्रकृतेनाप्रकृतसमर्थनं यथा यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतं

हे पार्वति रूपं आकृति सौंदर्यं पापवृत्तये दुष्टाचरणाय न भवति यत्राकृतिस्तत्र गुणा वसंतीति न्यायादिति यदुच्यते तद्वचनमव्यभिचारि यथार्थं तथाहि उदारं रमणीयं दर्शनं यस्यास्तथाभूते पार्वति तव शीलं आचरणं तपस्विनामप्युपदेशरूपतां प्राप्तमिति प्रकृतेन विशेषेण प्रकृतस्य सामान्यस्य समर्थनं

चं

१

दानमिति दानंवितरणं मदजलंच जलैरुदकैः जडैश्च लडयोरभेदात् अधिरूढे आक्रांतेसति विद्यमानगतिः सगतिकः बुद्धिमां श्वकः आसितुंस्थातुंउत्सहेतशक्नुयात् यस्मात् मिमंक्षोर्मज्जनं कर्तुमिच्छोर्दंतिनो गजस्य कटो गंड एव कटाहस्तस्य तटाद्ग्रादलीनां पटलैः समूहैः परितो मंक्षु शीघ्रं उद्याति उत्पतितमित्यन्वयः अत्रापिपूर्वार्द्धोक्तमप्रकृतसामान्यमुत्तरार्द्धोक्तेनप्रकृतेनविशेषेण

यथावा दानंददत्यपिजलैःसहसाधिरूढेकोविद्यमानगतिरासितुमुत्सहेत यद्दंतिनःकटकटाहतटान्मिमं क्षोर्मंक्षूद्पातिपरितःपटलैरलीनां यस्मिन्विशेषसामान्यविशेषाःसविकस्वरः सनाजिग्यो महांतो हिदु र्द्धर्षाः सागराइव

समर्थितम् इत्यर्थांतरन्यासालंकारः यस्मिन्निति यस्मिन्काव्ये ग्रंथे वा निबध्यन इतिशे षः समर्थ्यसमर्थकभावापन्नत्वं तु नलक्षणे निवेशनीयं तद्विनाचमत्काराभावेनचमत्कारित्वविशेषणेनावश्यवक्तव्येनैवानतिप्रसं गात् एवमेवार्थांतरन्यासलक्षणेपिबोध्यम् सनेति सप्रकृतो राजानजिग्येनाजितोऽर्थात्परैरितिविशेषः प्रकृतः तत्समर्थनंमहा तोहिदुर्धर्षा अनाक्रमणीयाइतिसामान्येन तस्यापिऽसागराइवेतिविशेषोपमयेतिज्ञेयं

127

प्रसिद्धेरल्पत्वात्तत्रापरितोषो बोध्यः यथाकथंचिदिति महतामनाक्रमणीयत्वस्याति प्रसिद्धत्वेन तत्समर्थनापेक्षाभावाच्चंद्रालोकगतमेत

यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावपि अपरितुष्यता कविना तत्सम
र्थनाय पुनर्विशेषांतरमुपमानरीत्यार्थांतरन्यासविधया वा विन्यस्यते तत्र विकस्वरालंकारः उ
त्तरार्धे यथाकथंचिदुदाहरणं इदं तु व्यक्तमुदाहरणं अनंतरत्नप्रभवस्य यस्य हिमं न सौभा
ग्यविलोपि जातं एको हि दोषो गुणसन्निपाते निमज्जतींदोः किरणेष्विवांकः इदमुपमानरीत्या
विशेषांतरस्य न्यसने उदाहरणं अर्थांतरन्यासविधया यथा कर्णारुंतुदमंतरेण रणितं
गाह स्व काक स्वयं माकंदं मकरंदशालिनमिह त्वां मन्महे कोकिलं धन्यानि स्थलवैभवेन कतिचिद्व
स्तूनि कस्तूरिकां नेपालक्षितिपालभालपतिते पंके न शंकेत कः मालिन्यमञ्जशशिनो मधुलिट्कलं
कौ धत्तो मुखे तु तव दृक्तिलकांजनाभां दोषावितः क्वचन मेलनतो गुणत्वं वकुर्गुणो हि वचसि भ्रमविभ्रमेभौ

न्नसमंजसमिति भावः इदं वक्ष्यमाणं व्यक्तमिति गुणसमुदाये एकस्य दोषस्यानाकलनमनतिप्रसिद्धतया समर्थनापेक्षमिंदो

रित्यादिविशेषेण समर्थ्यत इत्यतः स्फुटमित्यर्थः कर्णेति हे काककर्णयोररुंतुदं पीडाजनकं राणितं शब्दितं अंतरेण विना स्वयं मकरंदः
पुष्परसस्तच्छालिनं माकंदमाम्रवृक्षं गाहस्व आश्रय इहाम्रतरौ त्वां वयं कोकिलं मन्महे जानीमहे यतः स्थलवैभवेन स्थानमाहात्म्येन क
तिचिह्नस्तूनि धन्यानि भवंतीति सामान्येन पूर्वोक्त विशेषसमर्थनं अत्रापि तदाकांक्षायां विशेषरूपमर्थांतरंन्यसति नेपालभू
मिपालस्य भाले पतिते पंके कस्तूरिकां को न शंकेतापि तु सर्व इति मालिन्यमिति मधुलिट् भ्रमरः कलंकश्चैतौ अब्जशशिनोर्मालि
न्यं धत्तः कुरुतः तव मुखे तु दृक्च तिलकांजनं च तयोराभां शोभां धत्त इत्यनुपज्यते अंजनाभे इति पाठे द्वितीया द्विवचनं उक्तमर्थं
सामान्येन समर्थयति दोषावपि कचित् मेलनतो मिथो मिलनात् गुणत्वं इतः प्राप्नुत इति कथमेतत्तत्राह हि यतः वक्तुर्वचासिभ्र
म विप्रलंभौ भ्रांति प्रतारणे गुणौ भवतः घटवति घटाभावंनिर्णीय परप्रतारणाय घटोस्तीति प्रयुक्ते वाक्ये प्रमाजनकत्वात्तयोर्गु
णत्वमिति भावः इति विकस्वरालंकारः ७ ७ ७ ७

कुवल० १२७

प्रौढोक्तिरिति उत्कर्षस्याहेतावुत्कर्षहेतुत्वकल्पनं प्रौढोक्तिः कलिंदजा यमुना स्तोमः समूहः मेचकाः श्यामाः रोहणे उद्भवे कल्पेति एष राजा कल्पवृक्षादीनां क्रमेण रजोभरादिभिः पंचभिर्भूतै रचित इत्यन्वयः धनदः कुबेरः शंखो निधिविशेषः रजोभरः परागसमूहः पयोदु

प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनं कचाः कलिंदजातीरतमालस्तोममेचकाः कार्यातिशयाहेतौ तद्धेतुप्रकल्पनं प्रौढोक्तिः यथा तमालगतनैल्यातिशयाहेतौ यमुनातटरोहणे तद्धेतुत्वप्रकल्पनं यथा वा कल्पतरुकामदोग्ध्रीचिंतामणिधनदशंखानां रचितो रजोभरपयस्तेजःश्वासांतरांबरैरेषः अत्र कल्पवृक्षाद्येकैकवितरणातिशायिवर्णनीयराजवितरणातिशयाहेतौ कल्पवृक्षपरागादिरूपपंचभूतनिर्मितत्वेन तद्धेतुत्वप्रकल्पनं प्रौढोक्तिः

ग्धं श्वासः प्रसिद्धः अंतरांबरं शंखाभ्यंतरमाकाशं अतिशायीत्यग्रिमवितरणेनान्वितं अहेतौ पंचनिर्मितत्वे इति सामानाधिकरण्येनान्वयः इति प्रौढोक्तिः ७

चं० १२

संभावनेति ऊहस्तर्कः कस्तूरिकेति अहं यदि सृष्टिकर्त्ता स्यां तदा कस्तूरिकामृगाणामंडादखिलं गंधरूपं गुणमादाय खलजिव्हा यांनिवेशयिष्यामीत्यन्वयः इतिसंभावना किंचिदिति कस्यचिदर्थस्य मिथ्यात्वसिध्यर्थं मिथ्याभूतार्थांतरकल्पनंमिथ्याध्यवसिति

संभावनायदीत्थं स्यादित्यूहोन्यस्यसिद्धये यदिशेषोभवेद्वक्ता कथिताःस्युर्गुणास्तव य थावा कस्तूरिकामृगाणामंडाद्गंधगुणमखिलमादाय यदिपुनरहंविधिःस्यांखलजिव्हायां निवेशयिष्यामि यद्यर्थोक्तौचकल्पनमतिशयोक्तिभेदइतिकाव्यप्रकाशकारः किंचिन्मि थ्यात्वसिध्यर्थंमिथ्यार्थांतरकल्पनं मिथ्याध्यवसितिर्वेश्यांवशयेत्खस्त्रजंवहन् अत्रवेश्याव शीकरणस्यात्यंतासंभावितत्वसिद्ध्येगगनकुसुममालिकाधारणरूपार्थांतरकल्पनंमिथ्या ध्यवसितिः

रलंकारः वेश्यामित्युदाहरणं खस्रजंगगनमालां अत्रखपुष्पमालाधारणमिववेश्यावशीकरणमितिनिदर्शनापिबोध्या

अस्यंति परार्धपरया परार्द्धसंख्यामतिक्रांतया लक्षीकृता उपलक्षिताः प्रज्ञाचक्षुषा अंधेनावेक्ष्यमाणाश्श्रवता बधिरश्राव्या श्रेति कर्मधार
यः कलयता कुर्वता प्रकरेण समूहेन कूर्मरमणीकछपी रोधसितीरे मिथ्याध्यवसितेरित्यस्य भेद इत्यत्रान्वयः कल्पनाविछित्ति विशेषे
ण कल्पनाप्रयुक्तविछित्तिविशेषेण कल्पानात्मनेति पाठे कल्पनास्वरूपेणेत्यर्थः उपधेयसंकरेप्युपाधेरसंकरात् विछित्तिविशेषेणे

यथावा अस्यक्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया प्रज्ञाचक्षुरवेक्ष्यमाण बधिरश्राव्याः किला कीर्त्तयः
गीयंते स्वरमष्टमं कलयता जातेनवंध्योदरान्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेरोदसि अत्राद्योदाहरणं
निदर्शनागर्भं द्वितीयं तु शुद्धं असंबंधे संबधरूपातिशयोक्तितो मिथ्याध्यवसितेः किंचिन्मिथ्यात्वसिध्यर्थं मि
थ्यार्थांतरकल्पनात्मना विछित्तिविशेषेण भेदः

तिच तस्यैव विशेषणं विछित्तेर्विशेषोयस्मादिति विछित्तिविशेषयति व्यावर्त्त
यतीति वा व्युत्पत्तेः एतेन प्रौढोक्त्यैव गतार्थतामाचक्षाणा निरस्ता वेदितव्याः नच मिथ्याध्यवसितेरलंकारांतरत्वे हरिश्चंद्रेण संज
ताः प्रगीता धर्मसूनुना खेलंति निगमोत्संगे मातर्गंगे गुणास्तवेत्यादौ हरिश्चंद्रादिसंबंधाद्गुणानां सत्यताप्रतीतेः सत्याध्यवसितिर
पि तथास्यादिति वाच्यं सत्यताप्रतीत्यर्थं कस्याप्यर्थस्य कविप्रतिभाकल्पितत्वाभावेन शब्दमात्रेणालंकारतायाअसंभवात् कविप्र

तिभामात्रकल्पिताअर्थाः काव्ये अलंकार पदास्पदमिति विषमालंकारप्रकरणेत्वयैवाभिधानादित्यलंविस्तरेण इतिमिथ्याध्यवसितिः प्रस्तुतइ
ति ललितमितिलक्ष्यनिर्देशः निर्गतइत्युदाहरणं दाक्षिण्येत्यादिक्तप्रत्ययांत चतुष्टयंनायक विशेषणं दाक्षिण्यं अनुरोधशीलत्वं तद्व्यापारेति

वर्ण्येस्याद्वर्ण्यवृत्तांतप्रतिबिंबस्यवर्णनं ललितं निर्गतेनीरे सेतुमेषाचिकीर्षति प्रस्तुतेधर्मिणियोवर्णनीयोवृत्तांत
स्तमवर्णयित्वा तत्रैवतत्प्रतिबिंबरूपस्यकस्यचिदप्रस्तुतवृत्तांतस्यवर्णनंललितं यथाकथंचिद्दाक्षिण्यसमागत
तत्कालोपेक्षितप्रतिनिवृत्तनायिकांतरासक्तनायकानयनार्थंसखींप्रेषयितुकामां नायिकामुद्दिश्यसख्यावचनेनत
द्व्यापारप्रतिबिंबभूतगतजलसेतुबंधवर्णनं नेयमप्रस्तुतप्रशंसा प्रस्तुतधर्मिकत्वात् नापिसमासोक्तिः प्रस्तु
तवृत्तांतेवर्ण्यमानेविशेषणसाधारण्येनसारूप्येणवाअप्रस्तुतवृत्तांतस्फूर्त्यभावात् अप्रस्तुतवृत्तांतादेवसरूपा
दिहप्रस्तुतवृत्तांतस्यगम्यत्वात् नापिनिदर्शना प्रस्तुताप्रस्तुतवृत्तांतयोः शब्दोपात्तयोरैक्यसमारोपएवतस्याः समुन्मेषात्

सखीप्रेषणरूपनायिकाव्यापारसरूपेत्यर्थः सारूप्यंचात्रनेरर्थक्यं क्लृप्तालंकारेष्वंतर्भावमाशंक्यनिराकरोतिनेयमित्यादिना प्रस्तु
ताप्रस्तुतेति तथाचप्रकृतेऽप्रस्तुतवृत्तांतस्यैकस्यैवोपादानान्निदर्शनानयुक्तेतिभावः

१३७

ननूभयोः शब्दोपात्तत्वइवाप्रस्तुतमात्रस्यतत्वेपिनिदर्शनास्त्वित्याशंक्याह यदिति प्रतिबंधातावत्परिहरति तर्हिसारूप्ये ति एकः कृतीशकुंतेषुयोन्यंशकान्नयाचतइत्याद्यावित्यर्थः अप्रस्तुतेति अप्रस्तुतस्यशकुंतादेस्तत्रवर्णनीयत्वादिति

यदिविषयाविषयिणोः शब्दोपात्तयोः प्रवर्त्तमान एवालंकारो विषयिमात्रोपादानेपिस्यात् तदा रूपकमेव भेदेप्यभेदरूपाया अतिशयोक्तेरपि विषयमाक्रमेत् ननुतर्हिअत्रप्रस्तु तनायकादिनिगरणेन तत्रशब्दोपात्ताप्रस्तुतनीराद्यभेदाध्यवसायइति भेदेअभेदरूपा तिशयोक्तिरस्तु एवंतर्हिसारूप्यनिबंधनाअप्रस्तुतप्रशंसाविषयेपिसैवातिशयोक्तिः स्यात् अप्रस्तुतधर्मिकत्वान्नभवतीतिचेत् तत्राप्यप्रस्तुतधर्मिवाचकपदस्यापिप्रसि द्धातिशयोक्त्युदाहरणेष्विवप्रस्तुतधर्मिलक्षकत्वसंभवात्

शयोक्तिस्थलेचवापीकापीत्यादौवापीत्वादिनाप्रस्तुतनाभ्यादेर्वैर्ण्यत्वाभ्यातिशयोक्तिस्तत्रापादयितुंशक्येतिभावः अप्र सिद्धोयंहेतुरित्याह तत्रेति प्रसिद्धेति वापीकापीत्यादिसर्वशमलेत्यर्थः ५, ७, ७,

तद्गतेति प्रस्तुतगतेत्यर्थः अप्रस्तुतप्रशंसायां कचित्प्रस्तुताप्रस्तुतयोरभेदाध्यवसानमप्यप्रस्तुतवाक्यार्थप्रतीतिकाले दृश्यते
ललितेतु न क्वापीति स्फुटतरामतिशयोक्तितो भेद इत्याह सोऽपूर्व इत्यादिना रसनाविपर्ययः अग्निशापात्करिणां जिह्वापरिवृत्तिः पूर्व

नन्वप्रस्तुतप्रशंसायां सरूपादप्रस्तुतवाक्यार्थात् प्रस्तुतवाक्यार्थोऽवगम्यते नत्वतिशयोक्ताविवविष
यवाचके स्तत्तत्पदे विषयालक्ष्यंतइति भेद इति चेत् तर्हि इहापि प्रस्तुतगताद प्रस्तुतवृत्तांतरूपा
द्वाक्यार्थात्तद्गतप्रस्तुतवृत्तांतरूपो वाक्यार्थोवगम्यत इत्येवातिशयोक्तितो भेदोस्तु वस्तुवस्तु सोऽ
पूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सा मदविस्मृतस्वपरा दे किं भूयसोक्तेन वा पूर्वं नि
श्चितवानसि भ्रमर हे यद्वारणोद्याप्यमावंतः शून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः इत्याद्यप्रस्तु
तप्रशंसोदाहरणे प्रथमप्रतीतादप्रस्तुतवाक्यार्थात्प्रस्तुतवाक्यार्थोवगम्यत इत्येतन्न घटते

विपरीताभिधानं च कर्णचापलं प्रसिद्धं पिशुनप्रतार्यत्वं च मदः प्रसिद्धः गर्वश्च तेन विस्मृतास्वपरयोर्दिक् मार्गः आत्माना
त्मविभागश्च यया सा दृष्टिः वारणो गजः वारकश्च शून्यः सरंध्रः धनरहितश्च करः शुंडा हस्तश्च ग्रहआग्रहः ७

कुवल० १३०

कुतोनघटतेतत्राह अप्रस्कृतइति एतच्चभ्रमरासेव्यत्वइत्यस्यविशेषणं भ्रमरनिरासकरणस्येतिच कर्णचापलमात्रस्येत्यस्य क्रोडीकारः स्वार्थेनसममभेदाध्यवसायः अप्रस्तुतसंबोधनादिति आदिनासारूप्य निबंधन प्रस्तुतवाक्यार्थावगतिपरिग्रहः अत्रापिललिता चं०टी०

अप्रस्तुतेवारणस्यभ्रमरासेव्यत्वेकर्णचापलमात्रस्यभ्रमरनिराकरणहेतुत्वसंभवेपिरसनाविपर्ययांतःशून्यकरत्वयोर्हेतुत्वासंभवेनमदस्यप्रस्तुततत्सेव्यत्वएवहेतुत्वेनचरसनाविपर्ययादीनांतत्रहेतुत्वान्वयार्थं वारणपदस्यदुष्प्रभुरूपविषयक्रोडीकारेणैवप्रवृत्तेर्वक्तव्यत्वात्एवंसत्यपियद्यप्रस्कृतसंबोधनादिविच्छित्तिविशेषात्तत्राप्रस्तुतप्रशंसायाअतिशयोक्तितोभेदोघटते तदात्रापिप्रस्तुतंधर्मिणंस्वपदेननिर्दिश्यतत्राप्रस्कृतवर्णनारूपस्यविच्छित्तिविशेषस्यसद्भावात्ततोभेदःस्कुतरांघटते पश्यनीलोत्पलद्वंद्वान्निसरंतिवापीकापिस्फुरतिगगनेतत्परंसूक्ष्मपद्येत्यादिषुतु प्रस्तुतस्यकस्यचिद्धर्मिणःस्ववाचकेनानिर्दिष्टत्वादतिशयोक्तिरेवेतेनगतजलसेतुबंधवर्णनादिष्वसंबंधेसंबंधातिशयोक्तिरस्त्वितिशंकापिनिरस्ता

लंकारेपि वर्णनारूपस्येति चमत्कारितारूपायाविच्छित्ते स्तदवच्छेदकवर्णनारूपत्वमित्यभिप्रायः कस्याचित् नेत्रद्वंद्वादेः स्ववाचकेननेत्रादिपदेन अनिर्दिष्टत्वात् अप्रतिपादितत्वात् अतिशयोक्तिरस्तीति अतिशयोक्तिरेवास्तीत्यर्थः

तत्प्रसंगात् संबोध्यत्वोच्चारयितृत्वयोरसंबंधेपिसंबंधवर्णनादतिशयोक्तिमात्रप्रसंगात् अलंकारांतरंकस्त्वमित्यादावप्रस्तुतप्रशं
साप्रक्तेतुललितमिति तत्प्रतिबिंबेति प्रस्तुतार्थप्रतिबिंबरूपस्याप्रस्तुतार्थस्येत्यर्थः आदौपूर्वार्द्धे विषमेति स्वमतिसूर्यवंश

तथासतिकस्त्वंभोःकथयामीत्यादावपितत्प्रसंगात्सारूप्यनिबंधनप्रस्तुतवाक्या
र्थावगतिरूपविछित्तिविशेषालंकारांतरकल्पनंविहापितुल्यं तस्मात्सर्वालंकारविल
क्षणमिदंललितं यथावा क्कसूर्यप्रभवोवंशःक्कचाल्पविषयामतिः तितीर्षुर्दुस्तरं
मोहादुडुपेनास्मिसागरं अत्रापिनिदर्शनाभ्रांतिर्नकार्या अल्पविषययामत्या
सूर्यवंशंवर्णयितुमिछुरहमितिप्रस्तुतवृत्तांतानुपन्यासात्तत्प्रतिबिंबभूतस्यउड
पेनसागरंतितीर्षुरस्मीत्यप्रस्तुतवृत्तांतस्यवर्णनेनादौविषमालंकारविन्यसे
नेनन्वकेवलंतत्रतात्पर्यस्यगम्यमानत्वात् यथावा

योरत्यंताननुरूपत्वरूपेत्यर्थः तात्पर्यस्य तादृशमतिकरणकसूर्यवंशवर्णनेछाभिप्रायस्य ९ ९

(132)

अनायीति नलंप्रतिदमयंत्याउक्तिः हेनल अद्यत्वयाकतमोदेशः वसंतमुक्तस्यवनस्य दशामनायिप्रापितः त्वयिमास संकेततयाकृता र्थासंज्ञानामापिअनेनमल्लक्षणेनजनेननश्राव्यानश्रवणार्हाअपितुश्राव्यैवेति अत्रवनादशावनदशारूपस्याप्रस्तुतार्थस्य प्रस्तुतेदेशोकथ नालस्कतवृत्तांतस्योक्तरूपस्यप्रतीतिः नचात्रबारणेंद्रलीलामितिवत्पदार्थनिदर्शनायुक्तेतिवाच्यं तत्र पूर्वार्द्धेन प्रकृतवृत्तांतोपादानेनसा

अनायिदेशः कतमस्त्वयाद्यवसंतमुक्तस्यदशांवनस्य त्वदाप्तसंकेततयाकृतार्था
श्राव्यापिनानेनजनेनसंज्ञा अत्रकतमोदेशस्त्वयापरित्यक्तइतिप्रस्तुतार्थमनु
पन्यस्यवसंतमुक्तस्यवनस्यदशामनायीतितत्प्रतिबिंबभूतार्थमात्रोपन्यासा
ल्ललितालंकारः

द्वयपर्यवसानरूपनिर्दर्शनासत्वेप्यत्रतदनुपादानेनतद्व्यंग्यताप्रयुक्तवि च्छित्तिविशेषवत्वेनललितालंकारस्यैवोचितत्वात् एतेनदशापदलक्षितनिःश्रीकत्वरूपकार्यद्वारेणकारणस्यराजकर्तृकत्यागक र्मत्वस्याभिधानात्पर्यायोक्तमित्यपिनिरस्तं उपधेयसंकरेप्युपाधेरसंकराच्चेतिसंक्षेपः इतिललितं ७ ७ ७

तामेवेति दूतिकामेवेत्यर्थः निसृष्टा प्रेषिता ससंकल्पां मनोरथसहितां मेघैरिति मेदुरं तुंदिलं नक्तंरात्रिरस्तीति दीपः नंदनिदेशतः नंद
स्याज्ञावशात् प्रत्यध्वकुंजद्रुमं अध्वसंबंधिकुंजद्रुमंद्रुमंप्रति ग्रंथकारेण गीतगोविंदकृता चातकइति यस्तुचातकस्यत्रिचतुरकणमात्राथिते

उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणं तामेवध्यायतेतस्मैनिसृष्टासैवदूतिका उत्कंठाइच्छाविशे
षः सर्वेंद्रियसुखास्वादो यत्रास्तीत्यभिमन्यते तत्प्राप्तीच्छां ससंकल्पामुत्कंठां कवयोविदुरित्युक्त
लक्षणात् तद्विषयस्यार्थस्यतदुपायसंपादनयत्नंविनासिद्धिःप्रहर्षणं उदाहरणंस्पष्टं यथावा मेघै
र्मेदुरमंबरंवनभुवः श्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमं राधेगृहं प्रापय इत्थंनंदनिदेशत
श्चलितयोःप्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूलेरहःकेलयः अत्रराधामाधवयोःप
रस्परमुत्कंठितत्वंप्रसिद्धतरमग्रेचग्रंथकारेणनिबद्धमित्यत्रोदाहरणेलक्षणानुगतिः वांछितादधिकार्थस्यसं
सिद्धिश्चप्रहर्षणं दीपमुद्योजयेद्यावत्तावदभ्युदितोरविः स्पष्टं यथावा चातकस्त्रिचतुरान्पयःकणान्याचतेजल
धरंपिपासया
याजलदकर्तृकेणांभसाविश्वपूरणेनहर्षाधिक्याभावादयुक्तमुदाहरणमिति तत्तुक्तं हेलसिद्धेः

(133)

कुवल०
१३२

नहिक्षुदुपशमायतत्पर्यांत्तान्नमात्रार्थिनस्तदधिकान्नलाभेहर्षाधिक्यंनास्तीतिवक्तुंशक्यते तदानीमुपयोगाभावेपिस्वस्यैवकालांतरेतदु
पयोगसत्वात् नचचातकस्यजलसंग्रहानुपयोगाद्वैषम्यंशंकनीयं चातकवृत्तांतस्याप्रस्तुततयातद्व्यंग्यप्रस्तुतदातृयाचकवृत्तांतेकाव्यस्य
पर्यवसानादिति तृतीयंप्रभेदमाह यत्नादिति प्रहर्षणमित्यनुवर्तते निध्यंजनेति निधिदर्शनसाधनंयदंजनंतत्साधनौषधीमूल

सोपिपूरयतिविश्वमंभसाहंतहंतमहतामुदारता यत्नादुपायसिध्यर्थात्साक्षाल्लाभःफलस्यच निध्यंजनौषधीमूलं
खनतासाधितोनिधिः फलोपायसिध्यर्थाद्यत्नान्मध्येउपायसिद्धिमनपेक्ष्यसाक्षात्फलस्यैवलाभोपिप्रहर्षणं यथानि
ध्यंजनसिध्यर्थंमूलिकांखनतस्तत्रैवनिधेर्लाभः यथावा उच्चित्यप्रथममवस्थितंमृगाक्षीपुष्पौघंश्रितविटपंगृहीतु
कामा आरोढुंपदमदधादशोकयष्टावामूलंपुनरपितेनपुष्पिताभूत् अत्रपुष्पग्रहणोपायभूतारोहणसिध्यर्थात्प
दनिधनात्तत्रैवपुष्पग्रहणलाभः मित्यर्थःसाधितोलब्धः उच्चित्येति अधःस्थितं वृक्षस्याधोदेशेस्थितं अवस्थितमितिपाठेसमी
पाशोकयष्टाववस्थितमित्यर्थः श्रिताआश्रिताःविटपाःशाखायेनेतिपुष्पौघविशेषणं अदधात् आहितवती यष्टिःस्कंधःतेनपादाघाते
नपुनरप्यामूलंपुष्पिताभूदर्थादशोकयष्टिः अत्रचतदसाध्यकयत्नात्तल्लाभइतिप्रकारत्रयसाधारणंसामान्यलक्षणंबोध्यं इतिप्रहर्षणं

१३३

इष्यमाणविरोधोयोर्थस्तत्संप्राप्तिर्विषादनमलंकारः उद्योजयेत् उद्दीप्तंकुर्यात् उद्योजयेद्यावदित्यनेनतदिच्छामात्रंनतुतत्करण
मितिविषमाद्भेदः एवमग्रिमोदाहरणेपीच्छामात्रंनत्विष्टोत्पत्त्यनुकूलाचरणमिति इतिविषादनं एकस्येति एकस्यगुणदोषाभ्याम

इष्यमाणविरुद्धार्थसंप्राप्तिस्तुविषादनं दीपमुद्योजयेद्यावन्निर्वाणस्तावदेवसः यथावा रात्रिर्गमिष्य
तिभविष्यतिसुप्रभातंभास्वानुदेष्यतिहसिष्यतिपंकजश्रीः इत्थंविचिंतयतिकोशगतेद्विरेफेहाहंत
हंतनलिनींगजउज्जहार एकस्यगुणदोषाभ्यामुल्लासोन्यस्यतौयदि अपिमांपावयेत्साध्वीस्नात्वेती
च्छतिजान्हवी काठिन्यंकुचयोःस्रष्टुंवांछत्यःपादपद्मयोः निंदंतिचविधातारंत्वद्धाटीष्वरियोषितः त
द्भाग्यंधनस्यैवयन्नाश्रयतिसज्जनं लाभोयमेवभूपालसेवकानांनचेद्वधः यत्रकस्यचिद्गुणेनान्य
स्यगुणोदोषेणदोषोगुणेनदोषोदोषेणगुणोवावर्ण्यतेसउल्लासः न्यस्यतौगुणदोषौयदिभवतस्तदोल्लासालंकारः अपी

ति अपिःसंभावनायां साध्वीपतिव्रतास्नात्वामांपावयेदितिजान्हवीइच्छतीत्यन्वयः त्वधाटीषुयुद्धयात्रासुकुचयोःस्रष्टंकाठिन्यंपादप
द्मयोर्वांछंत्योरियोषितःविधातारंनिंदंतीत्यन्वयःस्रष्टुमितिपाठेकुचयोःकाठिन्यंपादयोःस्रष्टुमिच्छंत्यइत्यन्वयः लाभोयमिति भूपा
लसेवकानामयमेवलाभोयदिवधोनभवतीत्यन्वयः

यदयमिति रथस्यसंक्षोभाच्चलनाद्यदयमंसोंसेनार्थाद्दयितायानिपीडितःसंघृष्टःममांगेषुमध्येसएवैकःकृतीकुशलः अवशिष्टमंगंभूमेर्भा

द्वितीयार्द्धमाद्यस्योदाहरणं तत्रपतिव्रतामहिमगुणेनतदीयस्नानतोगंगायाःपावनत्वगुणोवर्णितः द्वितीयश्लोके द्वितीयस्योदाहरणं तत्रराज्ञोधाटीषुवनेपलायमानानामरानियोपितांपादयोर्धावनपरिपंथिमार्दवदोषेणतयोःकाठिन्यमस्पृष्ट्वाव्यर्थंकुचयोस्तत्स्पृष्टवतीधातुर्निद्यत्वदोषोवर्णितः तृतीयश्लोकस्तृतीयचतुर्थयोरुदाहरणं तत्रसज्जनमहिमगुणेनधनस्यतदनाश्रयणंदोषत्वेनराज्ञःक्रौर्यदोषेणतत्सेवकानांवधंविनाविनिर्गमनंगुणत्वेनवर्णितं अनेनैवक्रमेणोदाहरणांतराणि यदयंरथसंक्षोभादंसेनांसोनिपीडितः एकःकृतीमदंगेषुशेषमंगंभुवोभरः अत्रनायिकासौंदर्यगुणेनतदंसनिपीडितस्यस्वांसस्यकृतित्वगुणोवर्णितः लोकानंदनचंदनद्रुमसखेनास्मिन्वनेस्थीयतांदुर्वंशैःपरुषैरसारहृदयैराक्रांतमेतद्वनं तेह्यन्योन्यनिघर्षजातदहनज्वालावलीसंकुलानस्वान्येवकुलानिकेवलमिदंसर्वंदहेयुर्वनं अत्रवेणूनांपरस्परसंघर्षसंजातदहनसंकुलत्वदोषेणवननाशरूपदोषोवर्णितः

रमित्यर्थः

दुर्वंशैर्दुष्टवेणुभिःदुष्कुलैश्चेत्यादिःश्लेषोबोध्यः वननाशरूपःवनसंबंधीनाशरूपःवनस्येतियुक्ततरःपाठः तत्प्रतिक्षेपोभ्रमरनिरासःगजस्यदोषत्वेनेतिसंबंधः

आघ्रातमिति मुहुः परिलीढं आस्वादितं नीरसेन मनसा करणभूतेन वानरेण कर्त्रा तत्र तस्मिन्सति विचारणव्यसनिना विचारणतत्परेण अश्मना पापाणेन प्रथमचतुर्थयोः गुणेन गुणो दोषेण वा गुण इति भेदयोः उल्लासः उल्लासशब्दः अन्वर्थ इति उल्लासोल्लासः सुखं यत्रेत्य

दानार्थिनो मधुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुध्या तस्यैव गंडयुगमंडनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति अत्र भ्रमराणामलंकरणत्वगुणेन गजस्य तत्प्रतिक्षेपो दोषत्वेन वर्णितः आघ्रातं परिचुंबितं परिमुहुर्लीढं पुनश्चर्वितं त्यक्त्वा भुवि नीरसेन मनसा तत्र व्यथां मा कृताः हे सद्रत्न तवैव देवकुशलं यद्वानरेणादरादंतःसारविलोकनव्यसनिना चूर्णीकृतं नाश्मना अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः अत्र प्रथमचतुर्थयोरुल्लासोन्वर्थः मध्यमयोश्छत्रिन्यायेन लाक्षणिकः ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा स्वल्पमेवांबु लभते प्रस्थं प्राप्यापि सागरं मीलंति यदि पद्मानि का हानिरमृतद्युतेः ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ

र्थानुगत इत्यर्थः छत्रिन्यायेनेति केषुचित्छत्रसंबंधाच्छत्र्यच्छत्रिसमुदाये छत्रिणो यांतीतिवदित्यर्थः इत्युल्लासः प्रस्थं प्रस्थपरिमाणपात्रं ३, ३, ३

मदुक्तिरिति ममोक्तिः कविताः सुधियोंतःकरणं सुधीभूयामृतीभूय चेन्मदयति तोषयति तदा ऽस्यामुदक्तेः अरसानां नीरसानां पुरुषाणामनादरसमूहैः किंनामस्यान्न किंचिदित्यर्थः क्वचिदलसेति पाठः परमरमणीयामि केव रमणी स्त्रीयूनस्तरुणस्य यथांतःक

अत्र कस्यचिद्गुणेनान्यस्य गुणालाभो द्वितीयार्धमुदाहरणं दोषेणदोषस्याप्राप्तौ तृतीयार्धं यथा मदुक्तिश्चेदंतर्मदयति सुधीभूयस्सुधियः किमस्या नामस्यादलसपुरुषानादरभरैः यथायूनस्तद्वत्परमरमणीयापि रमणीकुमाराणामंतःकरण हरणं नैवकुरुते त्वंचेत्संचरसे वृषेण लघुताकानाम दिग्दंतिनां व्यालैः कंकणभूषणानि कुरुषे हानिर्नहेम्नामपि मूर्द्धन्यं कुरुषे सितांशुमयशः किन्नाम लोकत्रयीदीपस्यांबुजबांधवस्य जगतामीशोसि किंब्रूमहे अत्राद्ये कवितारमणीगुणाभ्या मलसबालकयोर्हृदयोल्लासरूपगुणाभावो वर्णितः द्वितीये परमेश्वरानंगीकरणदोषेण दिग्गजादीनां लघुतादिदोषा भावो वर्णितः दोषस्याभ्यर्थनानुज्ञात त्रैवगुणदर्शनात् विपदः संतु नः शश्वद्यासु संकीर्त्यते हरिः

रणहरणं कुरुते तद्वत्कुमाराणां बालानामित्यन्वयः त्वंचेदिति शिवंप्रतिकस्यापि कवेरुक्तिः जलांशुं चंद्रं पक्षे जडांशुं अंबुजबांधवः सूर्यः उल्लासरूपगुणाभावः उल्लासरूपस्य गुणस्याभावः इत्यवज्ञा दोषस्येति अभ्यर्थना इच्छा तत्रैव दोष एव अनुज्ञेति लक्ष्य निर्देशः शश्वत् निरंतरं संकीर्त्यत इत्यनेनान्वयि

मय्येवेति जीर्णतां प्रत्युपकाराक्षमतां हरिशब्दो वानरार्थः व्यतिरेकमुखेति वैधर्म्यमुखेत्यर्थः अस्यचार्थांतरन्यासेनेत्यनेनान्वयः दर्शितेति वैधर्म्यविपर्ययैप्रत्युपकारानभिलाषी विपत्तिं नाकांक्षतीत्यर्थ पर्यवसानादितिभावः व्रजेमेति हेप्रमथनाथहर पैशाचिकीपि

यथावा मय्येवजीर्णतांयातुयत्त्वयोपकृतंहरे नरःप्रत्युपकारार्थी विपत्तिमभिकांक्षति इयंहनुमंतंप्रतिराघवस्योक्तिः अत्रप्रत्युपकाराभावोदोषस्तदभ्युपगमेहेतुर्गुणोविपत्त्याकांक्षाया अप्रसक्तिः साचव्यतिरेकमुखप्रवृत्तेनसामान्येनविशेषसमर्थनरूपेणार्थांतरन्यासेनदर्शिता यथावा व्रजेमभवदंतिकंप्रकृतिमेत्यपैशाचिकींकिमित्यमरसंपदः प्रमथनाथनाथामहे भवद्भवनदेहलीविकटतुंडदंडाहतित्रुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते

शाचसंबंधिनींप्रकृतिं पिशाचतामेत्यप्राप्य भवतोंतिकं समीपदेशंभजेम अमरसंपत्तीः किमितिप्रार्थयामहे यतोमघवदादिभिरिंद्रप्रमुखैरपि भवद्भवनदेहलीषु विकटतुंडस्यवक्रतुंडस्य दंडाघातैः स्फुटन्मुकुटाग्रैर्भूयत इत्यर्थः इत्यनुज्ञा १ ६, ५

136

लेशइति लक्ष्यनिर्देशः प्रवसतीतिसातिसप्तम्यंतं शुकस्यनिंदायाः निंदाव्याजेनस्तुतौचेत्यन्वयः संतइति सच्चरितस्योदयोवृद्धिः

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं अखिलेषुविहंगेषुहंतस्वच्छंदचारिषु शुकपंजरबंधस्तेमधुराणांगिरांफलं दोषस्यगुणत्वकल्पनंगुणस्यदोषत्वकल्पनंचलेशः उदाहरणं राज्ञोऽभिमतेविदुषिपुत्रेचिरंराजधान्यांप्रवसतितद्दर्शनोत्कंठितस्यगृहेस्थितस्यपितुर्वचनंअप्रस्तुतप्रशंसारूपं तत्रप्रथमार्द्धे इतरविहंगानामवस्तुत्वदोषस्यस्वच्छंदचरणानुकूलतया गुणत्वंकल्पितं द्वितीयार्धेमधुरभाषित्वस्य गुणस्यपंजरबंधहेतुतयादोषत्वंकल्पितं नचात्रव्याजस्तुतिराशंकनीया नह्यत्रविहंगांतराणांस्तुतिव्याजेननिंदायांशुकस्यनिंदाव्याजेनस्तुतौचतात्पर्यं किंतुपुत्रदर्शनोत्कंठितस्यदोषगुणयोर्गुणदोषत्वाभिमानएवात्रश्लोकेनिबद्धः यथावा संतःसच्चरितोदयव्यसनिनःप्रादुर्भवद्यंत्रणाः सर्वत्रैवजनापवादचकिताजीवंतिदुःखंसदा अव्युत्पन्नमतिःकृतेननसतानैवासताव्याकुलोयुक्तायुक्तविवेकशून्यहृदयोधन्योजनःप्राकृतः

तद्व्यसनिनस्तत्पराः प्रादुर्भवद्यंत्रणंस्वेच्छाचरणनिरोधो येषांते सर्वत्रैवविषये दुःखमितिक्रियाविशेषणं अव्युत्पन्नमतिः अनिपुणमतिः सतासमीचीनेनकृतेनाचरणेन प्राकृतोनीचः

युवेषइति वरार्थिनीं कन्यकां प्रति सखीवचनं चपलइत्यादि च नायिकायाः सखीं प्रति उत्सेक इति पाठेप्युत्कर्षएवार्थः कन्या

दंडी त्वत्रोदाजहार युवैषगुणवान् राजा योग्यस्ते पतिरूर्जितः रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि चपलोनिर्दयश्चासौ जनः किं तेन मे सखि आगःप्रमार्जनायैव चाटवो येन शिक्षिताः अत्राद्यश्लोके राज्ञो वीर्योत्कर्षस्तुतिः कन्याया निरंतरसंभोगनिर्विवित्सोर्दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धया सख्या राजप्रकोपपरिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्तया पितदग्रतो मानपरिग्रहानुगुण्यं प्रतिज्ञाय तदनिर्वाहमाशंकमानया सखीनामुपहासं परिजिहीर्षंत्या नायिकया नायकस्य चाटुकारिता गुण एव दोषत्वेन वर्णितः नवाद्यश्लोके स्तुतिर्निंदापर्यवसायिनी द्वितीयश्लोके निंदा स्तुतिपर्यवसायिनी तिव्याजस्तुतिराशंकनीया

या दोषत्वेन भासतामित्यन्वयः निर्वर्तितुमिच्छा निर्विवर्त्तिषा तद्रूपदोषत्वेनेत्यर्थः निर्विवित्सोरिति पाठे राज्ञो विशेषणं कुतस्तर्हि गुणत्वेन वर्णनं तत्राह ७

137

राजभ्रकोपेति अन्येनाविदितं यथा स्यादिति क्रियाविशेषणं लेशत एवेति तदुक्तं दंडिनैव लेशमेके विदुर्निंदां स्तुतिं वा लेशतः कृता मिति लेशमात्रस्येति कृत्स्नार्थकं उदाहरणयोः अखिलेष्वित्याद्योः भिन्नविषयेति अन्यनिंदयान्यस्य स्तुतिरन्यस्तुत्यान्यनिंदेत्येवमा

राजभ्रकोपादिपरिहारार्थमिह निंदास्तुत्योरन्याविदिततया लेशत एवोद्घाटनेन ततो विशेषा दिति वस्तुतस्त्विह व्याजस्तुतिसद्भावेपि न दोषः नह्येतावता लेशमात्रस्य व्याजस्तुत्यंतर्भावः प्र सज्जते तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात् नापि व्याजस्तुतिमात्रस्य लेशांतर्भा वः प्रसज्जते भिन्नविषयव्याजस्तुत्युदाहरणेषु कस्त्वं वानर रामचंद्रभवने लेखार्थसंवाहको यद्वल्कं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा इत्यादिषु दोषगुणीकरणस्य गुणदोषीकरण स्य चाभावात् तत्रान्यगुणदोषाभ्यामन्यत्र गुणदोषयोः प्रतीतेः

दिरूपेत्यर्थः ननु तथाप्येकविषया व्याजस्तुतिर्न लेशाद्भिद्येतेत्याशंक्याह

विषयैक्येपीति लेशास्पर्शनादित्येतनेनान्वयः इंदोरिति हेउर्वीवलयतिलकरूप राजन् त्वदीयैर्यशोभिः किंधवलितंतद्वद
यतोऽद्यापि इंदुलक्ष्मादीनि श्यामलिम्नाश्यामवर्णेनानुलिप्तान्याभासंत इत्यन्वयः लक्ष्मलांछनं दिङ्नागानां दिग्गजानां मदजल

विषयैक्येपि इंदोर्लक्ष्मत्रिपुरजयिनः कंठमूलं मुरारिर्दिङ्नागानांमदजलमषीभांजि गंडस्थला
नि अद्याप्युर्वीवलयतिलकश्यामलिम्नानुलिप्तान्याभासंतेवद धवलितं किंयशोभिस्त्वदीये
रित्याद्युदाहरणेषु लेशास्पर्शनात् तत्र हींदुलक्ष्मादीनां धवलीकरणाभावदोष एव गुणत्वे
न नपर्यवस्यति किंतु परिसंख्यारूपेण ततोऽन्यत्सर्वं धवलितमित्यन्यो गुणः प्रतीयते
कचिद्व्याजस्तुत्युदाहरणे गुणदोषीकरणसत्वेपिस्फुटतोर्विषयांतरमपिदृश्यते

मेवमषीतद्भांजितद्युक्तानि परिसंख्येति एतान्येवश्यामानीत्येवं रूपेत्यर्थः विषयांतरं दोषीकृताद्भिन्नं गुणरूपमालंबनं

सर्वदेति अरयः पृष्ठमर्थात्तव नलेभिरेप्रामवंतः पलायनाभावात् दीनारः परिमाणविशेषपरिच्छिन्नाख्यवर्णमुद्रा एवंचलेशव्याज स्तुत्योरसंकीर्णविषयसत्वेच गुणदोषीकरणादिकमित्यादिपदेनदोषगुणीकरणसंग्रहः येषित्युपक्रमात्तत्रेतिपाठोयुक्ततरः अत्रेत्यपि

यथा सर्वदासर्वदोसीतिमिथ्यासंस्तूयतेबुधैः नारयोलेभिरेपृष्ठंनवक्षःपरयोषितः अत्रहिवाच्ययानिंदया परिसंख्यारूपेण ततोन्यत्सर्वमर्थिनामभिमतंदीनारादिदीयते इतिस्तुत्यंतरमपिप्रतीयते एवंचयेषुउदाहरणेषुकस्तेशौर्यमदो योद्धुमित्यादिषु गुणदोषादिषु गुणदोषीकरणादिकमेवव्याजस्तुतिरूपतयावतिष्ठते तत्रलेशव्याजस्तुत्योः संकरोस्तु इत्थमेवहिव्याजस्तुत्यप्रस्तुतप्रशंसयोरपिप्राक्संकरोवर्णितः सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैः पदैः नितंबगुर्वीतरुणीदृग्युग्मविपुलाचसा अत्रनायिकावर्णनपरेणयुग्मविपुलापदेनास्यानुष्टुभोयुग्मविपुलानामत्वरूपसूच्यार्थसूचनंमुद्रा

युक्तएव इदमोपियच्छब्दार्थपरामर्शकत्वात् इतिलेशः सूच्यार्थेति सूचनीयस्यार्थस्येत्यर्थः मुद्रेतिलक्ष्यनिर्देशः दृग्युग्मं विपुलंयस्याःसा

७ ७

अत्रग्रंथेअस्मिन्नलंकारग्रंथे रत्नमालाशब्देनभगवत्स्तुतिपद्यावलीविशेषउच्यते रत्ननामनिवेशेन प्रकृतार्थपररत्नवाचिपदघटनेन तत्तन्ना
मकजातिसूचनं तन्नामप्रवृत्तिनिमित्तरत्नजातिसूचनं नक्षत्रमालाशब्दार्थोपिपूर्वोक्तएव अग्न्यादिदेवतानामभिर्नक्षत्राणांतद्देवत्या

यद्यप्यत्रग्रंथेवृत्तनाम्नांनास्तिसूचनीयत्वं तथाप्यस्योत्तरार्धस्यलक्ष्यलक्षणयुक्तछंदः शास्त्रमध्यपातित्वेनत
स्यसूचनीयत्वमस्तीतितदभिप्रायेणलक्षणंयोज्यं एवंनवरत्नमालायांतत्तद्रत्ननामनिवेशेनतत्तन्नामकजा
तिसूचनंनक्षत्रमालायामग्न्यादिदेवतानामभिर्नक्षत्रसूचनमित्यादावयमेवालंकारः एवंनाटकेवक्ष्यमाणा
र्थसूचनेष्वपि क्रमिकंप्राकृतार्थानांन्यासंरत्नावलींविदुः चतुरास्यःपतिर्लक्ष्म्याः सर्वज्ञस्त्वंमहीपते अत्र
चतुरास्यादिपदैर्वर्णनीयस्यब्रह्मविष्णुरुद्रात्मताप्रतीयतइतिप्रसिद्धसहपाठानांक्रमेण निवेशनंरत्ना
वली

नांसूचनंबोध्यं वक्ष्यमाणेति यथाअनर्घ्यराघवेयांनिन्यायप्रवृत्तस्यातिर्यंचोपिसहायतां अनंथानंतुगळंतंसोदरोपिविमुंचती
तिसूत्रधारवचनेनवक्ष्यमाणरावणवृत्तांतसूचनमितिबोध्यं इतिमुद्रा क्रमिकामिति प्रकृतार्थानांक्रमिकप्रसिद्धक्रमानुसारिन्यसनंप्रति
पादनंरत्नावलिरलंकारः प्रकृतत्वंचयथाकथंचित्प्रकृतसंबंधत्वंबोध्यं चतुरेति चतुरमास्यंयस्यराः चतुर्मुखश्च ७ ७

रत्यासेति हे बाले भवत्याः स्तने श्रीरमणस्य विष्णोरवतारदशकं भातीत्यन्वयः कीदृशे रतावाप्तं प्राप्तं प्रियस्य लांछनं चिन्हं नखक्षतं नगरागादिकं येन तथाभूते कठिनताया आवासे स्थानभूते रसेनालिंगिते प्रकृताल्हादे एकरसे तत्परे क्रमाद्बदरामलकादिपरिमाणलाभेनोपचिते प्रवृद्धे भूभृतां पर्वतानां गुरुत्वमपहंति नाशयति तादृशे ततोपि महत्वात् चक्रवाकस्य द्वेषशीले तत्सदृशत्वात् भोगः स्फुरवंशरीरं वा तद्भाजि जनितमदने खेषिंद्रियेषु लीना आसक्ता उन्मुखा यस्मिन् तादृशे एतैरेव विशेषणैर

यथावा रत्याप्तप्रियलांछने कठिनतावासे रसालिंगिते प्रल्हादैकरसे क्रमादुपचिते भूभृद्गुरुत्वापहे कोकस्पर्द्धिनि भोगभाजि जनितानंगे खलीनोन्मुखे भाति श्रीरमणावतारदशकं बाले भवत्याः स्तने

वतारदशकरूपतापि स्तनस्य बोध्या तद्यथा रत्या प्राप्तः प्रियः कामस्तस्य लांछनं मत्स्यस्तद्रूपे कठिनतायाः आवासे कूर्मे रसया पृथिव्यास्तोद्धरणकाले आलिंगिते वराहे प्रल्हादे एकोरसः प्रीतिर्यस्य तस्मिन् नृसिंहे क्रमः पादविक्षेपस्तदनुसारेणोपचिते प्रवृद्धे वामने भूभृतां राज्ञां गौरवनाशके भार्गवे कोकस्पर्धिनि सीतावियोगातुरतया चक्रवाकशापदे रामे भोगः फणा तद्भाजि शेषावतारे बलभद्रे जनितमनंगं अंगस्य शरीरस्य विरुद्धं मौनभोगत्यागसमाधिप्रभृति येन तास्मिन् बुद्धे खलीनमश्वस्य वल्गा तदुन्मुखे कल्किनीति

क्रमाननुसरणेपीति तथाच प्रसिद्ध सहपाठानामर्थानांन्यसनं रत्नावलिरिति सामान्यलक्षणं सक्रमाक्रमत्वे तत्व भेदाविति भावः यस्येति यस्य प्रतापः निहतानां प्रतिशत्रुभूतानामंतःपुरेषु पंच महाभूत मयो मूर्त्तइवादृश्यते त्यन्वयः पंचमहाभूतमयत्वमेव

यथावा लीलाब्जानांनयनयुगलद्राघिमादत्तपत्रः कुंभावेभौ कुचपरिकरः पूर्वपक्षीचकार भ्रूविभ्रांतिर्मदनधनुषोविभ्रमानन्ववादीद्वक्त्रज्योत्स्नाशशधररुचंदूषयामासयस्याः अत्रेपत्रदानपूर्वपक्षोपन्यासानुवाददूषणोद्भावनानि बुधजनप्रसिद्धक्रमेणन्यस्तानि प्रसिद्धसहपाठानांप्रसिद्धक्रमाननुसारणेप्ययमेवालंकारः यथावा यस्यवन्हिमयोहृदयेषु जलमयोलोचनपुटेषु मारुतमयःश्वसितेषु क्षमामयोंऽगेषु आकाशमयःस्वांतेषु पंचमहाभूतमयो मूर्त्तइवादृश्यत निहतप्रतिसामंतांतःपुरेषु प्रतापः

विशेषणैर्दर्शयति वन्हिमय इत्यादि अंगेषु क्षमामयः पृथिवीमयः पीडाभरसहिष्णुत्वात् स्वांतेषं तः करणेषु आकाशमयः तेषां शून्यताश्रयत्वात् १ १ १ १ १

यथाकथंचिदिसस्यप्रपंचनंप्रकृतोपमानेत्यादि उपमानंचोपरंजकंचोपमानोपरंजके तयोर्भावस्तत्ता प्रकृतंप्रत्युपमानता उप
रंजकताचेत्यर्थः उपरंजकताचारोप्यमाणता तदुक्तं उपरंजकतामेति विषयीरूपकंतदेति तत्रोपमानता रविरिवप्रतिदिव
सोपजायमानोदयइत्यादिवत् उपरंजकतातु चतुरास्यइत्याद्युदाहरणे वन्हिमयइत्यादिप्रतापवर्णनेचस्पष्टेति प्रकृ

एवमष्टलोकपालनवग्रहादीनांप्रसिद्धसहपाठानांयथाकथंचित्प्रकृतोपमानोपरंजक
तादिप्रकारेणनिवेशनेरत्नावल्यलंकारः प्रकृतान्वयंविनाक्रमिकतत्तन्नाम्नाश्लेषभंग्यानिवे
शनेक्रमप्रसिद्धरहितानांप्रसिद्धसहपाठानांनवरत्नादीनांनिवेशनेप्ययमेवालंकारः

तान्वयंविनेति मित्रचंद्रमुखीबालालोहिताधरपल्लवेत्यादाविति भावः क्रमिकेत्यपलक्षणं तदभावेपि गुरुणाजघ
नेनैषातरुणीमंदगामिनीत्यादावप्ययमलंकारइतिबोध्यं इतिरत्नावली ७ ७

तद्गुणइति स्वगुणत्यागादनंतरं अन्यदीयगुणग्रहणं तद्गुणालंकारः पद्मेति तवनासामौक्तिकमधरकांत्यापद्मराग वदाचरतीत्यर्थः वीरेति हेवीरत्वदरिकामिनीवनभुविपरिधानंकर्तुंपल्लवानिकरेणसंस्पृश्यपांडुपत्रबुध्यानहरतिनगृण्हाति कीदृशानि निजकररुहाणांनखानांरुच्याश्वेतकांत्याखचितानिव्याप्तानीत्यर्थः इतितद्गुणः पुनरिति स्वगुण

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः पद्मरागायतेनासामौक्तिकंतेऽधरत्विषा यथावा वीरत्व द्रिपुरमणीपरिधातुंपल्लवानिसंस्पृश्य नहरतिवनभुविनिजकररुहरुचिरखचितानिपांडुपत्रधिया पुनःस्वगुणसंप्राप्तिःपूर्वरूपमुदाहृतं हरकंठांशुलिप्तोपिशेषस्त्वद्यशसासितः यथावा विभिन्नव र्णागरुडाग्रजेनसूर्यस्यरथ्याःपरितःस्फुरंत्या रत्नैःपुनर्यत्ररुचारुचंस्वामानिन्यिरेवंशकरीरनीलैः

त्यागानंतरंपुनःस्वगुणप्राप्तिःपूर्वरूपमलंकारः हरेति नीलोपीतियुक्तःपाठःविभिन्नेति माघेरैवकगिरिवर्णनं गरुडाग्रजे नारुणेनविभिन्नवर्णामिश्रितवर्णाः सूर्यस्यरथ्याअश्वायत्रगिरौवंशांकुरवन्नीलैरत्नैःपरितःस्फुरंत्यारुचास्वांरुचंनीलद्युतिं आनिन्यिरेआनीतवंतः रुचाविभिन्नवर्णाइतिनान्वयः ७ ७ ७

151

केचिदित्यस्वरसबीजंतु पद्मरागायतइत्युदाहरणे तद्गुणालंकारो न स्यात् न चेष्टापत्तिः अनुभवसिद्धचमत्कारस्य निरालंबनत्वापत्ते
रित्यूहनीयं अथवा यंतद्गुण एवेत्येवकारक्रमभंगेन काव्यप्रकाशकारादिमतोपन्यासपरत्वेन व्याख्येयं तैरत्र तद्गुणस्योदाहृतत्वात्
अत्रहि पूर्वमश्वानामरुणगुणत्वं अनंतरं रैवतकरत्नैरुभयेषां तद्गुणत्वमिति तद्गुणद्वयमिति तेषामभिमतं पूर्वेति वस्तुनि विकृ
ते विगते सत्यपि पूर्वावस्थाया अनुवृत्तिरपि पूर्वरूपमलंकारः महः प्रकाशः द्वारमिति हे राजन् तव विद्विषां मंदिरे शून्येपि चिरंतनः

अयमेव तद्गुण इति केचिद्व्यवजहुः पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि दीपे निर्वापिते ध्यासीत्कांचीरत्नैर्महन्महः
लक्षणे च कारात् पूर्वरूपमिति लक्ष्यवाचकपदानुवृत्तिः यथा वा द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगंडैर्गजैरंतः कंचुकिभिः स्फु
रन्मणिधरैरध्यासिता भूमयः आक्रांतं महिषीभिरेव शयनं तद्विद्विषां मंदिरे राजन् सैव चिरंतनप्रणयिनी शून्येपि राज्यस्थितिः

प्रणयो यस्याः सैव राज्यस्य स्थितिर्मर्यादास्तीति शेषः यतो द्वारं खड्गिभिर्गंडकाख्यपशुभिरेव खड्गधारिभिरावृतं बहिरपि भूमयः
मदप्रस्विन्नगंडैर्गजैरध्यासिताः अंतःपुरभूमयः विलसन्मणिधारिभिः कंचुकिभिः सर्पैरेव सौविदल्लैरध्यासिताः शयनं तल्पं महि
षीभिर्वनिताभिरेव महिषस्त्रीभिराक्रांतमित्यन्वयः इति पूर्वरूपं ७ ७ ७

संगतेति संगतःस्वसंबद्धोयोन्यःपदार्थस्तद्गुणानंगीकारमतद्गुणालंकारमाहुः चिरमिति रागिणिअनुरागिणि मंजिष्टादिरंजनद्रव्ययु
क्तेच निहितोपित्वंनरज्जसिरक्तोनुरागश्चनभवसीतिश्लिष्टं गंडेति हेश्रीमन्नृसिंहाख्यभूपतेएषातवकीर्तिःमदैःपिछलेषांकिलेदिग्ग

संगतान्यगुणानंगीकारमाहुरतद्गुणं चिरंरागिणिमच्चित्तेनिहितोपिनरज्जसि यथावा गंडाभोगेविहरतिमदैः
पिछलेदिग्गजानांवैरिस्त्रीणांनयनकमलेष्वंजनानिप्रमार्ष्टि यद्यप्येषाहिमकरकराद्वैतसौवस्तिकीतेकीर्त्तिर्दिक्षु
स्फुरति तदपिश्रीनृसिंहक्षितींद्र ननुचान्यगुणेनान्यत्रगुणोदयानुदयरूपाभ्यामुल्लासावज्ञालंकाराभ्यांतद्गुणा
तद्गुणयोःकोभेदः उच्यते उल्लासावज्ञालक्षणयोर्गुणशब्दोदोषप्रतिपक्षवाची अन्यगुणेनान्यत्रगुणोदयत
दनुदयौचनतस्यैवगुणस्यसंक्रमणासंक्रमणे किंतुसद्गुरूपदेशेनसदसच्छिष्ययोर्ज्ञानोत्पत्त्यनुत्पत्तिवत्तद्गुणज
न्यत्वेनसंभावितयोर्गुणांतरयोरुत्पत्त्यनुत्पत्ती तद्गुणातद्गुणयोःपुनर्गुणशब्दोरूपरसगंधादिगुणवाची

जानांगंडप्रदेशेयद्यपिविहरतितथावैरिस्त्रीणांनयनकमलेषुस्थितान्यंजनानिप्रमार्ष्टिप्रोंछतितदपितथापिदिक्षुहिमकरस्यचंद्रस्ययत्
किरणाद्वैतंतस्यसौवस्तिकीस्वस्तीत्याहेत्यर्थेतदाहेतिमाशब्दादिभ्यश्चग्वाच्यइत्यनेनठक्प्रत्ययः तत्सदृशीतियावत्स्फुरतिप्रकाशत
इत्यर्थः

विशेषाकारेणेति प्राकूलक्षितविशेषरूपेणेत्यर्थः इत्यतद्गुणः प्रागिति परसंनिधिवशात्पूर्वसिद्धस्यस्वगुणस्योत्कर्षः अनुगु

तत्रान्यदीयगुणग्रहणाग्रहणेचरक्तस्फटिकवस्त्रमालिन्यादिन्यायेनान्यदीयगुणेनैवानु
रंजनाननुरंजनेविवक्षिते तथैवचोदाहरणानिदर्शितानि यद्यप्यवज्ञालंकृतिरतद्गुणश्च
विशेषोक्तिविशेषावेव कार्याजनिर्विशेषोक्तिः सतिपुष्कलकारणेइतितत्सामान्यलक्षणाक्रां
तत्वात् तथाप्युल्लासतद्गुणप्रतिद्वंद्विनाविशेषाकारेणालंकारांतरतयापरिगणितावितिध्ये
यं प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः नीलोत्पलानिदधतेकटाक्षैरतिनीलतां कपि
रपिचकापिशायनमदमत्तोवृश्चिकेनसंदष्टः अपिचपिशाचग्रस्तः किंब्रूमोवैकृतंतस्य अत्रक
पित्वजात्यास्वतःसिद्धस्यवैकृतस्यमद्यादिभिरुत्कर्षः

णीनामालंकारः नीलोत्पलानि कर्णावतंसीकृतानि कापिरिति कापिशायनमद्य इत्यनुगुणः ७ ७

मीलितमितिलक्ष्यनिर्देशः रसइति स्वभावलोहितेचरणेलाक्षायारसोनालक्षितज्ञातः मल्लिकेति क्षौमंदुकूलंतद्धारिण्यः इति
मीलितं सामान्यमितिलक्ष्यनिर्देशः विशेषोव्यावर्त्तकधर्मः पद्मानामाकरः रत्नस्तंभे ष्विति वालिसूनुना अंगदेन एकेन चरण

मीलितंयदिसादृश्याद्भेदएवनलक्ष्यते रसोनालक्षिलाक्षायाश्चरणेसहजारुणे यथावा मल्लि
कामाल्यभारिण्यः सर्वांगीणार्द्रचंदनाः क्षौमवत्योनलक्ष्यंतेज्योत्स्नायामभिसारिकाः अत्राद्येचरणा
लक्तकरसयोररुणिमगुणसाम्याद्भेदानध्यवसायः द्वितीयोदाहरणेचंद्रिकाभिसारिकाणांधवलिम
गुणसाम्याद्भेदानध्यवसायः सामान्यंयदिसादृश्याद्विशेषोनोपलक्ष्यते पद्माकरप्रविष्टानांमुखंनाल
क्षिस्फ़ुभ्रुवां यथावा रत्नस्तंभेषुसंक्रांतैःप्रतिबिंबशतैर्वृतः लंकेश्वरः सभामध्येनज्ञातोवालिसूनु
ना मीलितालंकारेएकेनापरस्यभिन्नस्वरूपानवभासरूपंमीलनंक्रीयते सामान्यालंकारेतुभि
न्नस्वरूपावभासेपिव्यावर्तकविशेषोनोपलक्ष्यतइतिभेदः

ज्योत्स्नादिना अपरस्यलाक्षारसाऽभिसारिकादेः भिन्नरूपेति मुखपद्मादेर्भिन्नस्यस्वरूपस्यावभासेपीत्यर्थः १ १

143

कुवल०
१४२

उक्तमेवार्थमुदाहरणारूढतयाविशदयति मीलितोदाहरणेहीत्यादिना वस्त्वंतरत्वेननभासतइत्यन्वयः तत्प्रतिबिंबानांचव्यक्त्यंतर तयाभानमस्त्येवेत्यनुषंगः केचिदित्यस्याहुरित्यग्रिमेणान्वयः केचित्प्रकाशकारादयः तदुक्तं समेनलक्ष्मणावस्तुवस्तुनायन्नि

मीलितोदाहरणेहिचरणादेर्वस्त्वंतरत्वेनागंतुकं यावकादिनभासते सा
मान्योदाहरणेतुपद्मानांमुखानांचव्यक्त्यंतरतयाभानमस्त्येव यथारावण
देहस्यतत्प्रतिबिंबानांच किंत्विदंपद्ममिदंमुखमयंबिंबोयंप्रतिबिंबइतिवि
शेषःपरंनोपलक्ष्यते अतएवभेदतिरोधानान्मीलितं तदतिरोधानेपिसा
म्येनव्यावर्तकानवभासेसामान्यमित्युभयोरप्यन्वर्थता केचित्तु वस्तुद्वयस्य
लक्षणसाम्यात्तयोरेकेनचिह्नलीयसा तदन्यस्यस्वरूपतिरोधानेमीलितं स्वरू
पप्रतीतावपिगुणसाम्याद्भेदतिरोधाने सामान्यं एवंच

गृह्यते निजेनागंतुनावापितन्मीलितमितिस्मृतमिति तयोर्मध्ये एवंचेत्यस्येत्यत्र मीलितालंकारइत्यग्रेतनेनान्वयः ७

चं०टी
१४२

अपांगेति अपांगस्तरलोययोस्ते तरलाःसत्वरोच्चारणात् वक्रावक्रोक्तिगर्भाः वर्णायास्तताः गिरोवाक्यरूपाः इतिप्रकारेणमृगदृशा मंगकेलीलयास्वतः स्वभावात्स्फुरितंप्रकटीभूतंतत्तस्मादत्रांगकेकृतपदः कृतस्थितिः भेदाध्यवसायेपीति मुखपद्मयोर्भेदावभासे पीत्यर्थः व्यावर्तकास्फुरणेनहेतुना अलंकारांतरेणेति स्वरूपातिरोधानेनमीलितासंभवात् भेदातिरोधानेनच सामान्यस्याप्यसंभ

अपांगतरलेदृशौतरलवक्रवर्णागिरोविलासभरमंथरागतिरतीवकांतंमुखं इतिस्फुरतिमंगकेमृगदृशां स्वतोलीलयातदत्रनमदोदयःकृतपदोपिसंलक्ष्यते इत्यत्रमीलितालंकारः अत्रहिदृक्तारल्यादीनांनारी वपुषःसहजधर्मत्वान्मदोदयकार्यत्वाच्च तदुभयसाधारण्यादुत्कृष्टतारल्यादियोगिनावपुषामदोदयस्यस्वरू पमेवतिरोधीयते लिंगसाधारण्येनततूज्ञानोपायाभावान्मल्लिकामालभारिण्यइत्यादिषुतुसामान्यालंकारइ त्याहुः तन्मतेपद्माकरप्रविष्टानामित्यादौभेदाध्यवसायेपिव्यावर्तकास्फुरणेनालंकारांतरेणभाव्यं सामान्याले कारांशंतरभेदेनवा

वादितिभावः सामान्येति तथाचगुणसाम्याद्विशेषाग्रहइतिसामान्यालंकारसामान्यलक्षणं विशेषा ग्रहश्चक्वचिद्भेदेगृह्यमाणेक्वचिच्चागृह्यमाणइत्याद्यप्रकारांतर्गतिरत्रतन्मतेस्यादितिभावः अवांतरभेदेनवेत्यनंतरंभाव्यमित्यनुषज्यते

पूर्वस्मिन्निति मीलितं यदि सादृश्यादित्यादिपूर्वोक्तचंद्रालोककृन्मतइत्यर्थः स्वरूपतिरोधाने अपांगतरलइत्यादिस्वरूपति रोधानस्थले अलंकारांतरेणेत्यादि स्वरूपतोज्ञायमाने सादृश्याद्भेदाग्रहणं मीलितमित्यंगीकारे प्रथमः पक्षः सादृश्यद्भेदा ग्रहणमित्येतावन्मात्रमीलितलक्षणांगीकारेण द्वितीय इतिभावः इतिसामान्यं भेदेति वैशिष्ट्यं वैजात्यं उन्मीलितं विशेषकश्चक्र

पूर्वस्मिन्मते स्वरूपतिरोधाने लंकारांतरेण भाव्यं मीलितावांतरभेदेनवा भेदवैशिष्ट्ययोः स्फूर्त्तावुन्मी लितविशेषकौ हिमाद्रिंत्वद्यशोमग्नंस्कराः शीतेनजानते लक्षितान्युदितेचंद्रेपद्मानिचमुखानिच मीलितन्यायेन भेदानध्यवसाये प्राप्तेकुपितोपिहेतो भेदस्फुर्तौ मीलितप्रतिद्वंद्व्युन्मीलितं तथासामा न्यरीत्याविशेषास्फुरणे प्राप्ते कुतश्चित्कारणात् विशेषस्फूर्त्तौ तत्प्रतिद्वंद्वी विशेषकः

मेणालंकारो मग्नं भेदाग्र हात्तदंतर्गतं लक्षितानीति संकुचितत्वादितिभावः सामान्यरीत्या सामान्यालंकारन्यायेन एवंच वेत्रत्वचातुल्यरुचांवधूनांक र्णाग्रतो गंडतलागतानि भृंगाः सहेलं यदिनापतिष्यन् कोवेदयिष्यन्नवचंपकानीत्यपि विशेषकोदाहरणं बोध्यं ७ ७

यत्त्वनुमानालंकारेणैव गतार्थत्वान्नानयोरलंकारांतरत्वमिति तदयुक्तं उदाहृतस्थले भेदविशेषस्फूर्त्या विशेषदर्शनहेतुकप्रत्यक्षरूपत्वात् अथापि स्वकपोलकल्पितपरिभाषयाऽनुमानालंकारतां ब्रूषे तथापि सादृश्यमहिम्ना प्रागनवगतयोर्भेदवैजात्ययोः स्फुरणात्मना विशेषाकारेण मीलितसामान्यप्रतिद्वंद्विनायुक्तमेवालंकारांतरत्वं अतद्गुणावज्ञयोरिव विशेषोऽस्त्यलंकारादित्यलं विस्तरेण

क्रमेणोदाहरणद्वयं तद्गुणरीत्यापि भेदानध्यवसायप्राप्तावुन्मीलितं दृश्यते यथा नृत्यद्भर्गाट्टहासप्रचरसहचरैस्तावकीनैर्यशोभिर्धावल्यं नीयमाने त्रिजगति परितः श्रीनृसिंहक्षितीन्द्र नेदृग्यद्येष नाभीकमलपरिमलप्रौढिमासादयिष्यद्देवानां नाभविष्यत्कथमपि कमलाकामुकस्यावबोधः काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः वसंतसमये प्राप्ते काकः काकः पिकः पिकः इदं विशेषकस्योदाहरणं अत्र द्वितीयकाकपिकशब्दौ काकत्वेन ज्ञातः पिकत्वेन ज्ञात इत्यर्थांतरसंक्रमितवाच्यौ

नृत्यदिति नृत्यं कुर्वतो भर्गस्य हरस्य योऽट्टहासस्तत्प्रसरस्य समूहस्य विस्तारस्य वा सहचरैः सदृशैरित्यर्थः ईदृक्कीर्तिवच्छुक्लः एषः कमलाकामुकः नाभीकमलपरिमलस्य प्रौढिं समृद्धिं यदि नासादयिष्यत् नाधारयिष्यदित्यन्वयः ॐ ॐ

(145)

तद्गुणेनभेदानध्यवसायमात्रस्यो

यत्तुतद्गुणस्यात्रनिर्बाधत्वात्कथंतत्प्रतिद्वंद्वित्वमुन्मीलितस्येतितदनुक्तोपालंभरूपत्वादुपेक्ष्यं तद्गुणेनभेदानध्यवसायमात्रस्यो पार्थोर्जुनस्तेनकृतोयः प्रहारस्तेनव्रणोयत्रतादृशमुत्त

क्तत्वात् वाराणसीति तृतीयलोचनादिचिन्हेसाधारणेपिसतीत्यन्वयः पार्थोर्जुनस्तेनकृतोयः प्रहारस्तेनव्रणोयत्रतादृशमुत्त

यथावा वाराणसीवासवतांजनानांसाधारणेशंकरलांछनेपि पार्थप्रहारव्रणमुत्तमां
गंप्राचीनमीशंप्रकटीकरोति किंचिदाकूतसहितंस्याद्गूढोत्तरमुत्तरं यत्रासौवेत
सीपांथतत्रेयंस्कृतरासरित् सरित्तरणमोर्गपृछंतंप्रतितंकामयमानायाउत्तरमि
दं वेतसीकुंजेस्वाछंद्यमित्याकूतगर्भे

मांगंशिरः पूर्वत्रस्वाभाविकगुणसाम्यं इहत्वागंतुकगुणसाम्यमितिभेदः इत्युन्मीलितविशेषकौ किंचिदिति किंचि
दभिप्रायसहितंगूढमुत्तरं उत्तरंनामालंकारः वेतसीवेतसलता सुखेनतरितुंयोग्यास्कृतरा ७ ७

एवमिति सूक्ष्मालंकारवदुक्तिरूपव्यापारवर्णनमित्यर्थः उदाहर्तव्यमिति यथा वक्रस्यंदीतिपद्य एव आली बालां सस्मितं प्राह
एवमिति सूक्ष्मालंकारवदुक्तिरूपव्यापारवर्णनमित्यर्थः उदाहर्तव्यमिति यथावक्रस्यंदीतिपद्यएव आलीबालांसस्मितप्राह एवमिति सूक्ष्मालंकारवदुक्तिरूपव्यापारवर्णनमित्यर्थः

नचात्रध्वनिराशंकनीयः दूरेव्यज्यमानस्यापिसंकेतस्थानप्रश्नोत्तरस्यस्वोक्त्यैवाविष्कृतत्वात् एवंपिहि
तालंकारेष्युदाहार्यं इदंचान्यदत्रावधेयं यत्रासौवेतसीपांथेत्यादिषुगूढोत्तरसूक्ष्मपिहितव्याजोक्त्यु
दाहरणेषुभावोनस्वोक्त्याविष्कृतः किंतुवस्तुसौंदर्यबलाद्धृत्क्बोद्धव्यविशेषविशेषितादृग्न्यः तत्रैववस्तु
तेनालंकारत्वंध्वनिभावास्पदत्वात् प्राचीनैःस्वोक्त्याविष्करणेसत्यलंकारास्पदतास्तीतित्यदाहृत
त्वादस्माभिरप्युदाहृतानि शक्यंहियत्रासौवेतसीपांथतत्रेयंस्फुतरासरित् इतिपृष्ठंतमध्वानंकामि
न्याहससूचनं इत्याद्यर्थांतरकल्पनयाभावाविष्करणमित्यतःप्राक्लिखितोदाहरणेषुसंकेतकालमन
संपुस्त्वंतन्व्याव्यंजयंतीभामाजुगूहेतिभावाविष्करणमस्तितेष्वेवतत्तदलंकार इति सौंदर्येत्यर्थः ध्वनिभावास्य
इतिव्याजोक्तिः ९ ५
येष्वित्यस्यभावाविष्करणमस्तीत्यनेनान्वयः
दत्वात् ध्वनिसाश्रयत्वात् उपसंहरतिअतइति

मंदंमुग्धाक्षिलामद्यपश्यामिनाथमित्युत्तरार्धनिर्माणेनाथमित्युक्त्याप्रकाशनमितिबोध्यं वस्तुसौंदर्येति वेतसनिकुंजरूपवस्तु

प्रश्नोत्तरेति प्रश्नश्चउत्तरांतरंच प्रश्नोत्तरांतरे ताभ्यामभिन्नमुत्तरंचित्रमित्युच्यत इत्यर्थः केदारेति केदाराणांपोषणेरताः केइतिप्रश्नः
केदारस्य क्षेत्रस्य पोषणे रताइतितदेवोत्तरं केखेटाः खेआकाशे अटंतीतिप्रश्नस्य यदुत्तरं वयः पक्षिण इतितत्किंचलमितिप्रश्नस्य
यदुत्तरांतरं वयस्तारुण्यादीतितेनाभिन्नं इत्युत्तरं सूक्ष्ममिति पराशयाभिज्ञस्यइतरस्मिन्परविषये साभिप्रायं चेष्टितं सूक्ष्मा

प्रश्नोत्तरांतराभिन्नमुत्तरंचित्रमुच्यते केदारपोषणरताः केखेटाः किंचलंवयः अत्रकेदारपोषणरता
इतिप्रश्नाभिन्नमुत्तरंकेखेटाः किंचलमितिप्रश्नद्वयस्यवयइत्येकमुत्तरं उदाहरणांतराणि विदग्धमुख
मंडने द्रष्टव्यानि सूक्ष्मंपराशयाभिज्ञेतरसाकूतचेष्टितं मयिपश्यतिसाकेशैः सीमंतमणिमावृणो
त् कामुकस्यावलोकनेन संकेतकालप्रश्नभावंज्ञातवत्याश्चेष्टेयं अस्तंगते सूर्ये संकेतकालइत्या
कूतं यथावा संकेतकालमनसंविटंज्ञात्वाविदग्धया आसीन्नेत्रार्पिताकूतंलीलापद्मंनिमीलितं ७

लंकारः पराशयाभिज्ञश्चासावितरश्च तस्य साकूतचेष्टितमर्थात्परविषय इतिचार्थः संकेतेति संकेतकालेमनोयस्यतज्जिज्ञासु
मितियावत् विटंजारं नेत्राभ्यामर्पितमाकूतं यस्मिन् तादृशं लीलासंबंधिपद्मं नेत्रेत्यादिक्रियाविशेषणंवा इतिसूक्ष्मं ७

पिहितमिति लक्ष्यनिर्देशः तल्पंशयनं वल्केति वल्कैःप्रस्त्रवणशीलानां स्वेदबिंदूनां प्रबंधैर्धाराभिःकंठेभिन्नंलग्नं कुंकुमं दृष्ट्वा कापिव यस्यासखीस्मित्वास्मितंकृत्वा पुंस्त्वंव्यंजयंतीसतीतन्व्याःपाणौखड्गलेखां लिलेखेत्यन्वयः सूक्ष्मालंकारेपराभिप्रायमवगत्यसा

पिहितंपरवृत्तांतज्ञातुःसाकूतचेष्टितं प्रियेगृहागतेप्रातःकांतातल्पमकल्पयत् रात्रौसपत्नीगृहेजागरणेनश्रांतोसीतितल्पकल्पनाकूत वल्कैःस्पंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वाभिन्नंकुंकुमंकापिकंठे पुंस्त्वंतन्व्याव्यंजयंतीवयस्यास्मित्वापाणौखड्गरेखांलिलेख अत्रस्वेदानुमितंपुरुषायितंपुरुषोचितखड्गलेखनेनप्रकाशितं व्याजोक्तिरन्यहेतूत्यायदाकारस्यगोपनं सखिपश्यगृहारामपरागैरस्मिधूसरा अत्रचौर्यरतकृतसंकेतभूपृष्ठलुंठनलग्नधूलिजालस्यगोपनं यथावा कस्यवानभवेद्रोषःप्रियायाःसव्रणेधरे सभृंगंपद्ममाघ्रासीर्वारितापिमयाधुना उपपतिनाखंडिताधरायाः नायिकायाःसकाशमागच्छंतंप्रियमपश्यंत्येवसख्यानायिकांप्रतिहितोपदेशव्याजेनतंप्रतिनायिकापराधगोपनं

कृतचेष्टितेनोत्तरसमर्पणं पिहितालंकारेतुगूढंपरवृत्तांतंज्ञात्वासाकूतचेष्टयातत्प्रकाशनमितिभेदोबोध्यः

इतिपिहितं व्याजोक्तिरिति लक्ष्यनिर्देशः चौर्यरतेकृतंयत्संकेतभूतभूमिपृष्ठलुंठनमित्यन्वयः उपपतिना जारेण ७

(157)

तस्यांछेकापन्हुतौ आयांतमिति प्रातोल्यां रथ्यायां एकाकाचिद्रामावनितासख्याःपुरस्तात् रोमांचकंपादिभिरनुभावैर्व्यज्यमानमनुरागंए

छेकापह्नुतेरस्याश्चायंविशेषः तस्यांवचनस्यान्यथानयनेनापह्नवः अस्यामाकारस्यहेत्वंतरवर्णनेनगोपनमिति लक्षणेलक्ष्यनाम्निचोक्तिग्रहणमाकारस्यगोपनार्थहेत्वंतरप्रत्यायकव्यापारमात्रोपलक्षणं ततश्चआयांतमालोक्यहरिंप्रतोल्यामाल्याःपुरस्तादनुरागमेका रोमांचकंपादिभिरुच्यमानंभामाजुगूह प्रणमंत्यथैनं इत्यत्रापिव्याजोक्तिरेव तत्रह्यनुरागकृतस्यरोमांचाद्याकारस्यभक्तिरूपहेत्वंतरप्रत्यायकेनप्रणामेनगोपनंकृतं सूक्ष्मपिहितालंकारयोरपिचेष्टितग्रहणमुक्तिसाधारणव्यापारमात्रोपलक्षणं ततश्चनलिनीदलेबलाकामरकतपात्रइवदृश्यतेशुक्तिः इतिममसंकेतभुविज्ञात्वाभावंतदाब्रवीदालि मित्यादिष्वपिसूक्ष्मालंकारःप्रसरति अत्रश्लोकेतावत्किमावयोःसंकेतस्थानंभविष्यतीतिप्रश्नाशयंसूचयतिकामुकेतदभिज्ञयाविदग्धयातदासखींप्रतिसाकूतमुक्तिमिति सूक्ष्मालंकारोभवति यतोत्रबलाकायामरकतपात्रप्रतिष्ठितशुक्त्युपमयातस्यानिश्चलेनाश्वस्तत्वंतेनतस्यप्रदेशस्यनिर्जनत्वंतेनतदेवावयोःसंकेतस्थानमितिकामुकंप्रतिसूचंनलक्ष्यते नंहरिंप्रणमंतीसतीजुगूह गोपितवती त्यन्वयः लक्ष्यते व्यज्यते

चं०टी।

ग्रामइति प्रस्तरप्रायेपाषाणबहुले पाषणतुल्येच प्रायोबाहुल्यतुल्ययोरितिकोशात् किंचिदास्तरणादिकं समागमप्रति बंधकंच

अथवा ग्रामेस्मिन्प्रस्तरप्रायेनाकिंचित्सांथर्विद्यते पयोधरोन्नतिंदृष्ट्वा वस्तुमिछसिचेद्वस आस्तरणादिकमर्थयमा नंपांथंप्रत्युक्तिरियं स्त नोन्नतिंदृष्ट्वा रंतुमिछसिचेद्वस अविदग्धजनप्रायेऽस्मिन् ग्रामेकश्चिदवगमिष्यतीत्येता दृशंप्रतिबंधकंकिंचिदपिनास्तीतिहृदयं इदमुन्नेयप्रश्नोदाहरणं निबद्धप्रश्नोत्तरंयथा कुशलंतस्याजीवतिकु शलंपृछामिजीवतीत्युक्तं पुनरपितदेवकथयसिमृतांनुकथयामियाश्वसिति ईर्ष्यामानानंतरमनुतप्तायानायि कायाःसखीमागतांप्रतितस्याःकुशलमितिनायकस्यप्रश्नः जीवतीतिसख्याउत्तरं जीवत्याःकुतःकुशलमितितदभि प्रायः अन्यत्पृष्टमन्यदुत्तरमितिनायकस्यपुनःकुशलंपृछामीतिप्रश्नः पृष्टस्योत्तरमुक्तमित्यभिप्रायेणजीवती त्युक्तमितिसख्यावचनं सखीवचनस्याभिप्रायोद्घाटनार्थंपुनरपितदेवकथयसीतिनायकस्याक्षेपः मृतांनुकथया मियाश्वसितीतिस्वाभिप्रायोद्घाटनं सतिमरणेखलुतस्याःकुशलंभवतिमदागमनसमयेपिश्वासेषुसंचरत्सुकथंमृतां

पयोधरोमेघःस्तनश्च कश्चिदवगमिष्यतिज्ञास्यतीत्येतादृशंइत्यादिरूपं उन्नेयःकल्प्यःप्रश्नोयेनतादृशस्योत्तरस्य ईर्ष्यामानेति ईर्ष्या हेतुकमानेत्यर्थः अनुतप्तायाः पश्चात्तापयुतायाः १

गुढोक्तिरिति यदन्योद्देशकंवाक्यंतत्तदन्यंप्रतिकथ्यतेचेत्तू गूढोक्तिरलंकारः क्षेत्रसस्यादेः कलत्रंच अपेहिदूरीभव अविवक्षितत्वा
दिति अयंभावः प्रकृताप्रकृतश्लेषेऽसावुदयमारूढइत्यादावप्रकृतार्थस्यप्रकृतार्थोपमानतयान्वयः स्वीक्रियतेसर्वथैवप्रकृतासंबद्ध
स्याप्रकृतार्थस्यकथनेऽसंबंधार्थाभिधायकत्वापत्तेरतः प्रकृतेपिश्लेषवादिनाऽप्रकृतस्यप्रकृतसंबंधोवाच्यः सचनसंभवति विवक्षाविरहा

गूढोक्तिरन्योद्देश्यंचेद्यदन्यंप्रतिकथ्यते वृषापेहिपरक्षेत्रादायातिक्षेत्ररक्षकः यंप्रति किंचिद्वक्तव्यंतत्तटस्थे
मोज्ञायीतितदेवतदन्यंकंचित्प्रतिश्लेषेणोच्यते चेत्साढोक्तिः वृषेत्याद्युदाहरणं परकलत्रंभुंजानंकामुकंप्रति
वक्तव्यंपरक्षेत्रेसस्यानिभक्षयंतंकंचिदुक्षाणंसमीपेचरंतंनिर्दिश्यकथ्यते नेयमप्रस्तुतप्रशंसा का
र्यकारणादिव्यंग्यत्वाभावात् नापिश्लेषमात्रमप्रकृतार्थस्यप्रकृतार्थान्वयित्वेनाविवक्षितत्वात् तस्यकेव
लमितरवंचनार्थंनिर्दिष्टतयाविच्छित्तिविशेषसद्भावात् दिति कुतस्तर्ह्यप्रकृतार्थकथनंतत्राह तस्येति अप्रकृतार्थ
स्येत्यर्थः ननुतादृशाविवक्षाविरहेपिनानार्थविन्यासमात्रेणास्तुश्लेषएवेत्याशंक्याह विच्छित्तिविशेषेति तथाचश्लेषसत्वेपिविच्छित्ति
विशेषाद्गूढोक्तिरवश्यमंगीकार्येत्याशयः अतएवश्लेषमात्रमितितन्मात्रनिराकरणमेवोपक्रांतंनतुश्लेषनिराकरणमिति ७

नाथइति विपणिः पण्यवीथिका पुष्पिणी रजस्वला आगमेनं वेदेनलालनीयः स्तुत्यः आगमनेनलालनीयश्च रजनीं व्याप्येत्यर्थं

यथावा नाथोमेविपणिंगतोनगणयत्येषासपत्नीच मांत्यक्का मामिहपुष्पिणीतिगुरवः
प्राप्तागृहाभ्यंतरं शय्यामात्रसहायिनींपरिजनःश्रांतोनमांसेवते स्वामिन्नागमलाल
नीयरजनींलक्ष्मीपतेरक्षमां अत्रलक्ष्मीपतिनाम्नोजारस्यागमनंप्रार्थयमानायास्त
टस्थवंचनायभगवंतंप्रत्याक्रोशस्यप्रत्यायनं विवृतोक्तिः श्लिष्टगुप्तंकविनाविष्कृतंय
दि वृषापेहिपरक्षेत्रादितिवक्ति ससूचनं श्लिष्टगुप्तंवस्तुयथाकथंचित्कविनाविष्कृतं
चेद्विवृतोक्तिः वृषापेहीत्युदाहरणेपूर्ववत्गुप्तंवस्तुससूचनमितिकविनाविष्कृतं

तसंयोगेद्वितीया इतिगूढोक्तिः श्लिष्टगुप्तमिति श्लिष्टेत्युपलक्षणं अर्थशक्तिमूलगुप्तस्यापिगच्छाम्यच्युतेत्यादौसंग्राह्यत्वात् ७

वत्सेइति वत्सेलक्ष्मि विषादं खेदं हरंच उरुजवंमहावेगं उर्ध्वप्रवृत्तंश्वसनं श्वासं पवनंच संत्यज कंजलंपातीतितथा वरुणः कंपश्च गुरुर्महान्बृहस्पतिश्च बलं प्रसिद्धं तद्भिदानाशकेन बलाख्यदैत्यनाशकेनेंद्रेणच अत्रश्रीकृष्णसन्निधौयाहि

यथावा वत्सेमागाविषादंश्वसनमुरुजवंसंत्यजोर्ध्वप्रवृत्तं कंपःकोवागुरु
स्तेकिमिहबलभिदाजृंभितेनात्रयाहि प्रत्याख्यानंसुराणामितिभयशम
नछद्मनाकारयित्वायस्मैलक्ष्मीमदाद्वःसदहतुदुरितंमंथमुग्धःपयोधिः इ
दंपरवंचनायगुप्ताविष्करणं ७ ७ ७ ७

इतिप्रकारेणभयनिवारणव्याजेनसुराणांप्रत्याख्यानंवर्जनंकारयित्वामंथोमंथनंतेनमुग्धःपयोधिर्यस्मैलक्ष्मीमदात्सवोदुरितंदहत्वित्यन्वयः परेति परवंचनायगुप्तस्याविष्करणमित्यर्थः ७ ७ ७

११

नामेवेति हेवरदततवनामेववांछितदातृत्वमाख्यातिकथयति अतस्त्वंवरदानमुद्रामितरदेवतवन्नधारयसि यतोविश्वप्रसिद्धत
रे विप्रकुलेप्रसूतिरुत्पत्तिर्यस्यतादृशस्येत्यर्थः इतिलोकोक्तिः छेकोक्तिरिति लक्ष्यनिर्देशः अर्थांतरगर्भिता अर्थांतरव्यंजक

नामैवतेवरदवांछितदातृभावंव्याख्यास्यतोनवहंसिवरदानमुद्रां विश्वप्रसिद्धतरविप्रकुलप्रसू
तेयज्ञोपवीतवहनंहिनखल्वपेक्ष्यं अत्रोत्तरार्द्धेलोकवादानुकारः छेकोक्तिर्यदिलोकोक्तेःस्याद
र्थांतरगर्भिता भुजंगएवजानीतेभुजंगचरणंसखे केनचित्कस्यचिद्वृत्तांतंपृष्टस्यसमीपस्थ
मन्यंनिर्दिश्यायमेवतस्यवृत्तांतंजानातीत्युक्तवतोयमहेःपादानहिरेवजानातीतिलोकवादा
नुकारः अत्रसचायंचलोकविदितेधनार्जनादिव्यापारेसहचारिणाविति विदितविषयतयालोको
क्त्यनुवादस्यप्रयोजनेस्थितेरहस्येप्यनंगव्यापारेतस्यायंसहचरइतिमर्मोद्घाटनमपितेनग
र्भीकृतं

ता समीपस्थं यद्वृत्तांतःपृष्टस्त
त्समीपस्थं सचायंचेति पृच्छ्यमानवृत्तांतस्तत्समीपस्थश्चेत्यर्थः तेनलोकोक्त्यनुवादेन ९ ५

(150)

गछाम्येति अच्युतमद्विषयेअस्खलितेतिगुप्तोर्थः चिरकालंत्वद्दर्शनेनापिनतृप्तिरित्यर्थेनदर्शनेननतृप्तिरपितुसंभोगेनेत्यर्थो गुप्तः विजनस्थयोरेकांतगतयोः हतश्वासोजनः अन्यथा रत्यर्थंस्थितावितिसंभावयति तेनद्वयोरकीर्त्तिर्जातैवद्दथैवात्मानंवंच

गछाम्यच्युतदर्शनेनभवतःकिंतृप्तिरुत्पद्यतेकिंचैवंविजनस्थयोर्हतजनःसंभावय त्यन्यथा इत्यामंत्रणभंगिसूचितव्रथावस्थानखेदालसामाश्लिष्यन्पुलकोत्करां चिततनुर्गोपींहरिःपातुवः अत्रगछाम्यच्युतेत्यामंत्रणेनत्वयारंतुंकामेछयास्थितं तन्नलब्धमित्यर्थशक्तिलभ्यंवस्तुतृतीयपादेनाविष्कृतं सर्वमेतत्कविनिबद्धवक्तृगुप्ता विष्करणोदाहरणं कविगुप्ताविष्करणंयथा ७ ७ ७

यावइतिगुप्तार्थः आमं त्रणस्याच्युतेत्यादेर्भंग्यारचनयासूचितोयोव्रथावस्थानखेदस्तेनालसां कविनिबद्धेति कविनिबद्धेनवक्त्रागुप्तस्येत्यर्थः ७ ७

सुभ्रुत्वमिति शोभनभ्रूर्दयिता दृष्टिश्च तयोःसंबोधनं कोपोरोषः विकारश्च रागिण्यनुरागिणीति अवनतेनम्रेइतिचम
यीत्यस्यविशेषणं पक्षेरागिणिरक्तिमशीले नम्रेइतिदृक्संबोधनं एवंदृष्टेइत्यपि उच्चारणेनेति स्वरविशेषसहकृतोच्चार

सुभ्रुत्वंकुपितेत्यपास्तमशनंत्यक्ताःकथायोषितां दूरादेवविवर्जिताःसुरभयःस्रग्गंधधूपा
दयः कोपंरागिणिमुंचमय्यवनतेदृष्टेप्रसीदाधुनासत्यंत्वद्विरहाद्भवंतिदयितेसर्वाममांधादि
शः अत्रतावदीर्ष्यामानकलुषितदयिताप्रसादनव्यापारविधिःप्रतीयते दृष्टिरोगार्त्तस्यदृ
ष्टिंप्रत्याक्रोशोविवक्षितार्थःसचदृष्टेइत्यस्यपदस्यलुप्तोच्चारणेनसंबुद्धिरूपतामवगमय्यावि
ष्कृतः कविनिबद्धवक्तृगुप्तंपरवंचनार्थं कविगुप्तंस्वप्रौढिकथनार्थमितिभेदः युक्तिःपराति
संधानंक्रिययामर्मगुप्तये त्वामालिखंतीदृष्ट्वान्यंधनुःपौष्पंकरेलिखत् अत्रपुष्पचापलेख
नक्रियायामन्मथोमयालिखितइतिभ्रांत्युत्पादनेनस्वानुरागरूपमर्मगोपनायपरवंचनंविवक्षितं

णेनेत्यर्थः इतिविवृतोक्तिः युक्तिरिति स्वस्यमर्मगोपनायक्रिययायत्परस्यातिसंधानंवंचनंसायुक्तिरलंकारः त्वामिति नायकंप्रति
दूतीवचनं पुष्पस्येदंपौष्पं

दंपत्योरिति तस्यशुकस्य आतिमात्रं अत्यर्थंनिगदतइतिसंबंधः फलशब्दोबीजपरः गोपनीयविषयभेदस्यविछित्तिभेदाप्रयो
जकत्वादाह यद्वेति नन्वेवंसत्यायांतमालोक्येत्यादौव्याजोक्तिरेवेतिप्रागुक्तंविरुध्येतेत्याशंक्याहएवंचेति यद्वेतिपक्षांगीकारेचे

यथावा दंपत्योर्निशिजल्पतोर्गृहशुकेनाकर्णितंयद्वचस्तत्प्रातर्गुरुसन्निधौनिगदतस्तस्यातिमात्रंव
धूः कर्णालंबितपद्मरागशकलंविन्यस्यचंचूपुटेव्रीडार्त्ताविदधातिदाडिमफलव्याजेनवाग्बंध
नं अत्रशुकवाङ्मुद्रणयातन्मुखेनस्वकीयरहस्यवचनश्वश्रूषुजनवंचनंकृतं व्याजोक्तावाका
रगोपनं युक्तौतदन्यगोपनमितिभेदः यद्वा व्याजोक्तावुक्त्यागोपनमिहतुक्रिययागोपनमिति
भेदः एवंचआयांतमालोक्यहरिंप्रतोल्यामितिश्लोकेपियुक्तिरेव लोकप्रवादानुकृतिर्लोकोक्ति
रितिभण्यते सहस्वकतिचिन्मासान्मीलयित्वाविलोचने अत्रलोचनेमीलयित्वेतिलोकवादानु
कृतिः यथावा मदीयेवरदराजस्तवे

त्यर्थः एवंचपूर्वग्रंथआद्यपक्षाभिप्रायेणेतिभावः इतियुक्तिः लो
केति अनुकृतिरनुकरणं सहस्वेति अर्थाद्विरहं मासानभिव्याप्येत्यर्थः १ १ १

त्रपेति लज्जया गुप्तस्येत्यर्थः दृष्ट्येति गोपेत्वयि योरागआसक्तिस्तद्धतया अपहृतयागवांपरागैर्धूलिभिर्व्याप्तयाच गोपेति संबोधनंवा किंचित्समविषमं युक्तायुक्तंच इह त्वयि भूमौच पत्यभावः पतितानां पतनं प्राप्तांच विषमेषुःपंचशरस्तेन

त्रपागुप्ताविष्करणंयथा दृष्ट्याकेशवगोपरागहृतयाकिंचिन्नदृष्टंमयातेनेह स्खलितास्मिनाथपतितां किन्नामनालंबसे एकस्त्वंविषमेषु खिन्नमनसांसर्वाबलानां गतिर्गोप्येवंगदितः सलेशमवताद्गोष्ठेहरिर्वश्चिरं अत्रकृष्णस्यपुरतोविषमेपरिस्खलनमभिहितवत्यास्तंकामयमानायागोपिकायावचनेविषमपथिस्खलनपतनत्राणसंप्रार्थनरूपेण झटितिप्रतीयमानेनार्थेनगुप्तंविवक्षितमर्थांतरंसलेशंससूचनमित्यनेनाविष्कृतं एवंनैषधादिषुचेतोनलंकामयतेमदीयमितिदमयंतीवाक्यादिकमप्युदाहरणं इदं शब्दशक्तिक्रोडीकृतगुप्ताविष्करणं अर्थशक्तिमूलगुप्तार्थाविष्करणंयथा

खिन्नमनसां विषमेषुसंकटेषु खिन्नमनसांच अबलानां स्त्रीणां बलरहितानांच सलेशंससूचनं गोष्ठंगोस्थानं चेतोनलमिति लंकांनअयतेनगच्छतीत्यर्थेनलंकामयतेइच्छतीत्यर्थोगुप्तः तदाविष्करणंच ह्रीणा दृष्टाचेत्यनेनेतिबोध्यं शब्दशक्तीति शब्दश्लेषवशेनेत्यर्थ क्रोडीकृतः संगृहीतः

(152)

मलयेति व्राताः समूहाः याताः गताः विकासिनां मल्लिकाकुसुमानां परिमलस्य भरो यस्मिन् तादृशो ग्रीष्मो भग्नो नष्टः हे घन त्वं यद्यत्सहसे उत्साहवान् भवसि तदा त्वं निःस्नेहं नायकं घटय अनया सह संयोजय गवां निवर्त्तने परापहृतानां व्यावर्त्तने य एव प्रभ

यथावा मलयमरुतां व्राता याता विकासितमल्लिकापरिमलभरो भग्नो ग्रीष्मस्त्वमुत्सहसे यदि घन घटय तं त्वन्निःस्नेहं य एव निवर्त्तने प्रभवति गवां किन्नः छिन्नं स एव धनंजयः अत्र धनलिप्सया प्रोषितांगनासखीवचने य एव गवां निवर्त्तने प्रभवति स एव धनंजय इत्यांध्रजातिप्रसिद्धलोकवादानुकारः अत्रातिसौंदर्यशालिनीमिमामपहाय धनलिप्सया प्रस्थितो रसानभिज्ञत्वात् गोप्राय एव तस्यानिवर्त्तकस्त धनस्य जेता धनेनाकृष्टस्य तद्विमुखीकरणेन प्रत्याक्षेपकत्वादित्यर्थांतरमपि गर्भितं १ १

वति स एव धनंजयोऽर्जुन इत्यन्वयः लिप्सया प्रोषितस्य यांगना तत्सखीवचन इति संबंधः आंध्रास्तैलंगाः इमां मत्सखीं गोप्रायो गोतुल्यः इति छेकोक्तिः

वक्रोक्तिरिति काकुर्ध्वनेर्विकारः अपरार्थस्य अभिप्रेतादर्थादर्थांतरस्य नंदीहरस्यगणविशेषः दारुणाक्रूरेत्यभिप्रेतं काष्ठेनेतिकल्पनं विकृतत्वंच कस्यचिद्वर्णस्यावापोद्वापाभ्यां भवित्रीति सीतांप्रतिरावणोक्तिःपादत्रयं चतुर्थस्तंप्रतिसीतायाः तेतवपतिः सरामोयुधिसं

वक्रोक्तिःश्लेषकाकुभ्यामपरार्थप्रकल्पनं मुंचमानंदिनंप्राप्तंनेहनंदीहरांतिके अत्रमानंमुंचप्रयातारात्रिरित्याशयेनोक्तायांवाचिनंदिनंप्राप्तंमामुंचेत्यर्थांतरंश्लेषेणपरिकल्पितं यथावा अहोकेनेदृशीबुद्धिर्दारुणातवनिर्मिता त्रिगुणाश्रूयतेबुद्धिर्नतुदारुमयीक्वचित् इदमविकृतश्लेषोक्तेरुदाहरणं विकृतश्लेषवक्रोक्तेर्यथा भवित्रीरंभोरुत्रिदशवदनग्लानिरधुनासतेरामःस्थातानयुधिपुरतोलक्ष्मणसखः इयंयास्यत्युच्चैर्विपदमधुनावानरचमूर्लघिष्ठेदंषष्ठाक्षरपरविलोपात्पठपुनः सर्वमिदं शब्दश्लेषमूलायावक्रोक्तेरुदाहरणं

ग्रामेपुरतोग्रतोनस्थातास्थास्यतीत्यर्थः अतिशयेनलघुर्लघिष्ठस्तत्संबोधनं इदं पादत्रयं षष्ठाक्षरात्पराणांसप्तमानांत्रिनवीतिवर्णानांविलोपोयत्रतादृशंपुनःपठेत्यर्थः शब्दश्लेषेति शब्दस्यपरिवृत्त्यसहत्वादिति भावः

भिक्षेति जलनिधिश्च हिमवांश्च तत्कन्ययोर्लक्ष्मीपार्वत्योः क्रमेण इत्थंलीलया संलापो मिथोभाषणं नो स्मान् त्रायतामित्यन्वयः इ
त्थंकीदृक् तदाह भिक्षार्थीति हरमभिप्रेत्य लक्ष्म्या वाक्यं बलेर्दैत्यस्य मखे यज्ञे इति वामनाभिप्रायं पार्वत्याः भद्रे शोभने तांडवंनृ
त्यमद्य क्व वर्त्तत इति लक्ष्मी प्रश्नस्योत्तरं वृंदावनस्यांतेमध्ये इति श्रीकृष्णाभिप्रायं मृगशिशुः महादेवेन करे धृतः परश्वुमृगवराभी

अर्थश्लेषमूला या वक्रोक्तेर्यथा भिक्षार्थी सक्वयातः सुतनु बलिमखे तांडवंक्वाद्य भद्रे मन्ये वृंदावनांते क्व
नु स मृगशिशुर्नैव जाने वराहं बालेकच्चिन्नदृष्टो जरठवृषपतिर्गोप एवास्य वेत्ता लीलासंलाप इत्थं जल
निधिहिमवत्कन्ययोस्त्रायतां नः काक्वा यथा असमालोच्य कोपस्तेनोचितोयमितीरिता नैवोचितो
यमिति तं ताडयामास मालया अत्र नैवोचित इति काकुस्वरविकारेणोचित एवेत्यर्थांतरकल्पनं

तिहस्तं प्रसन्नमिति ध्यानश्रवणात् इदं लक्ष्म्या वाक्यं नैवेति पार्वत्याः मृगः पशौ कुरंगे चेति विश्वः कच्चिदिति प्रश्ने जरठो जीर्णः वृष
पतिर्वृषश्रेष्ठ इति हरवृषभाभिप्रायं लक्ष्मीवाक्यं गोपो गवां पालक इति कृष्णाभिप्रायमुत्तरमिति अत्र भिक्षादिपदानां परिवृत्तिसह
त्वादर्थश्लेषमूलत्वं असमालोच्येति अविचार्येत्यर्थः मालया पुष्पमालया इति वक्रोक्तिः ७ ७

पंचमस्य स्वरविशेषस्योदंचनमाविकरणं यत्र तादृशे काले कोकिलः कोकिलो मधुरध्वनिरभवदित्यर्थः द्वितीयकोकिलपदस्यानुपयुक्तार्थत्वे

यथा वा नविषेण न शस्त्रेण नाग्निना न च मृत्युना अप्रतीकारपारुष्याः स्त्रीभिरेव स्त्रियः कृ
ताः अत्र स्त्रीणां विषादिनिमित्तत्वाभावः प्रसिद्ध एव कीर्त्यमानस्तासां विषाद्यतिशायित्वे
र्यमिति अमुमर्थं व्यक्तीकरोतीति स च अप्रतीकारपारुष्या इति प्रतीकारवद्भ्यो विषादि
भ्यस्तासां विशेषं दर्शयता विशेषणेनाविष्कृतः सिद्धस्यैव विधानं यत्तदाहुर्विध्यलंकृतिं
पंचमोदंचने काले कोकिलः कोकिलो भवेत् निर्ज्ञातविधानमनुपयुक्तिबाधितं सदर्थांतरगर्भी
करणेन चारुतरमिति तं विधिनामानमलंकारमाहुः उदाहरणे कोकिलस्य कोकिलत्ववि
धानमनुपयुक्तं सदतिमधुरपंचमध्वनिशालितया सकलजनहृद्यत्वं गर्भीकरोति तच्च पं
चमोदंचने इति कालविशेषणेनाविष्कृतं नार्थांतरे संक्रमितत्वात् सकलजनहृद्यत्वप्रतीतिश्च प्रयोजनं एवं
च शालितयेत्यनंतरं लक्षितयेति विशेषो बोध्यः पूर्ववत् ध्वनित्वाशंकानिवारणाय तच्चेत्याद्युक्तं ९ ९

(१५३)

अद्यापीति ममनयनंनयनमितितस्यावाचंनिशाम्यस्तनतटात्पतितमुत्तरीयंधर्तुंपुरःप्रवृत्तेमयिसतितदाआयताक्षीयत्किंचित्स्मि
तमकरोत् इदमद्यापिममदृशोःपुरस्तिष्ठतीत्यन्वयः अत्रनयनपदेनस्ववाचकत्वरूपशाक्यसंबंधेननेत्रपदंलक्ष्यते तस्माच्च वस्त्र
प्रतीतिः किंवास्ववाचकवाच्यत्वरूपशाक्यसंबंधेनवस्त्रमेवलक्ष्यतीतिवचोबाणेरित्यादिवल्लक्षितलक्षणावाबोध्या नेत्रं

यथावा अद्यापितिष्ठतिदृशोरिदमुत्तरीयंधर्तुंपुरस्तनतटात्पतितंप्रवृत्ते वाचंनिशाम्य
नयनंनयनंममेतिकिंचित्तदायदकरोत्स्मितमायताक्षी उदात्तमृद्धेश्वरितंश्लाघ्यंचान्योपल
क्षणं सानोयस्याभवद्युद्धंतद्धूर्जटिकिरीटिनोः इदंश्लाघ्यचरितस्यान्यांगत्वेउदाहरणं ऋ
ध्युदाहरणंयथा रत्नस्तंभेषुसंक्रांतैःप्रतिबिंबशतैर्वृतः ज्ञातोलंकेश्वरःकृच्छ्रादांजनेयेनतत्वतः

पाथिगुणेवस्त्रइतिविश्वः इतिभाविकं उदात्तमिति ऋद्धेःसमृद्धेश्चरितंउदात्तालंकारः तथाश्लाघ्यंचरितंअन्यस्योपलक्षण
मंगंचेत्तदपितथा सानौशिखरेयस्यपर्वतस्य किरीटीअर्जुनः कृच्छ्रात्कष्टात् आंजनेयेनहनूमता इत्युदात्तं

अत्युक्तिरितिलक्ष्यनिर्देशः अद्भुतंचतदतथ्यंमिथ्यारूपं अकूपाराःसमुद्राः आहुरिति स्वमतेनुतथ्यत्वातथ्यत्वाभ्यांभेदइतिभावः
अतथ्येअद्भुतत्वविशेषणस्यकृत्यंदर्शयति अनयोरित्यादि एतत्पद्यंयोगेथ्ययोगाऽसंबंधातिशयोक्तिरित्यत्रप्रागुदाहृतं असदुक्ति
तारतम्येनेति अनयोरित्यत्रासदुक्तिमात्रं अल्पमिति पद्येत्वत्यंतासदुक्तिरितितारतम्येनेत्यर्थःतथाचाद्भुतेतिविशेषणादत्यं

अत्युक्तिरद्भुतातथ्यंशौर्यौदार्यादिवर्णनं त्वयिदातरिराजेंद्रयाचकाःकल्पशाखिनः इयमौदा
र्यात्युक्तिः शौर्यात्युक्तिर्यथा राजन्सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः पुनस्त्वद्वैरिवनिता
बाष्पपूरेणपूरिताः संपदत्युक्तावुदात्तालंकारः शौर्यात्युक्तावत्युन्नत्यलंकारइतिभेदमाहुः अन
योरनवद्यांगिस्तनयोर्जृंभमाणयोः अवकाशोनपर्याप्तस्तवबाहुलतांतरे अल्पंनिर्मितमाका
शमनालोच्यैववेधसा इदमेवंविधंभाविभवत्याःस्तनमंडलमितिसदसदुक्तितारतम्येनातिशयात्यु
क्त्योर्भेदः
तातथ्यरूपत्वलाभान्नातिशयोक्तावतिव्याप्तिरितिभावः अतएवानयोरितिपद्यानंतरंदंडिनोक्तं इतिसंभाव्यमे
वैतद्विशेषाख्यानसंस्कृतमिति एवंलोकातीतइवात्यर्थमध्यारोप्यविवक्षितः योर्थस्तेनातितुष्यंतिविदग्धानेतरेयथेत्युक्त्वाअल्पंनिर्मि
तमित्याद्युदाहृत्यइदमत्युक्तिरित्युक्तमितिच इत्यत्युक्तिः

निरुक्तिरितिलक्ष्यं योगवशान्नाम्नामर्थविशेषाभिधायिनामर्थांतरोपवर्णनमितिलक्षणं ईदृशैरिति चंद्रंप्रतिविरहिण्याउक्तिः इदृशैर्जं
नसंतापनरूपैःदोषायारात्रेःकर्त्ता दोषाणामाकरश्च पुरेति कनिष्ठिकांगुलिविशेषः आधिष्ठितःकालिदासोयस्यांसा अंगुलिविशेष

निरुक्तिर्योगतोनाम्नामन्यार्थत्वप्रकल्पनं ईदृशैश्चरितैर्जानेसत्यंदोषाकरोभवान् यथावा पुराकवीनांगण
नाप्रसंगेकनिष्ठिकाधिष्ठितकालिदासा अद्यापितत्तुल्यकवेरभावादनामिकासार्थवतीबभूव प्रतिषेधः
प्रसिद्धस्यनिषेधस्यानुकीर्त्तनं नद्यूतमेतत्कितवक्रीडनंनिशितैःशरैः निर्ज्ञातोनिषेधःस्वतोनुपयुक्तत्वा
दर्थांतरंगर्भीकरोति तेनचारुतान्वितोयंप्रतिषेधनामालंकारः उदाहरणं युद्धरंगेप्रत्यवतिष्ठमानंशा
कुनिकंप्रतिविदग्धवचनं तत्रयुद्धस्याक्षद्यूतत्वाभावोनिर्ज्ञातएवकीर्त्यमानस्तत्रैवतवप्रागल्भ्यंनयुद्धे
व्युत्पत्तिग्रहोस्तीत्युपहासंगर्भीकरोति तच्चकितवेत्यनेनाविष्कृतं रूपा अर्थवती नविद्यतेकविनामयस्यांसेत्यन्वर्थ

नामवती इतिनिरुक्तिः कितवोद्यूतकृत् धूर्त्तोऽक्षदेवीकितवइत्यमरः ननुप्रसिद्धानुवादस्याचमत्कारित्वात्कथमलंकारत्वमत
आहनिर्ज्ञातइत्यादि शकुनेपाशकेर्दीव्यतीतिशाकुनिकः आविष्कृतमितिध्वनितत्वशंकानिवारणं एवमग्रेपि इतिप्रतिषेधः ७

स्वभावोक्तिरितिलक्ष्यनिर्देशः जात्यादिस्थस्यजात्यादिसंबंधिनः आदिपदेनक्रियादिपरिग्रहः उत्तरंगाणितरंगायमाणान्यक्षी
णियेषांतैः ताविति तौप्रक्रांतौवधूवरौ गुरूणांसमीपेअन्योन्याभिमुखंप्रचलितौपरस्परस्यमार्गप्रदानेयोरभसोवगस्तेनस्ख

स्वभावोक्तिःस्वभावःस्यजात्यादिस्थस्यवर्णनं कुरंगैरुत्तरंगाक्षैःस्तब्धकर्णैरुदीक्ष्यते यथा
वा तौसम्मुखप्रचलितौसविधेगुरूणांमार्गप्रदानरभसस्खलितावधानौ पार्श्वोपसर्पणमुभा
वपिभिन्नदिक्कंकृत्वामुहुर्मुहुरुपासरतांसलज्जं भाविकंभूतभाव्यर्थसाक्षात्कारस्यवर्ण
नं अहंविलोकयेऽद्यापियुध्यंतेत्रस्फुरास्फुराः स्थानभीषणत्वोद्भावनपरमिदं ७

लितंभ्रष्टमवधानंसावधानत्वंययोस्तादृशौउभावपि
भिन्नदिक्कंवामदक्षिणरूपदिक्संबंधिपरस्परपार्श्वभागोपसर्पणंमुहुर्मुहुःकृत्वासलज्जंयथास्यात्तथोपासरतां उपसर्पणंचक्रतु
रित्यर्थः पूर्वोदाहरणेकुरंगजातिस्वभाववर्णनं अत्रसलज्जक्रियास्वभाववर्णनमितिभेदः इतिस्वभावोक्तिः भाविकमितिलक्ष्यनिर्देशः

(158)

हेहस्तेति शूद्रतपस्याजनिताधर्मवशादपूर्णायुषिद्विजबालके मृते तद्वधोद्यतस्य रामस्य स्वहस्तं प्रति इयमुक्तिः। जीवातवे जीवनाय शूद्र एव तपश्चरणान्मुनिरिव मुनिः तस्मिन्कृपाणं खङ्गं विसृज निक्षिप यतो रामस्याकरुणस्य गात्रं शरीरमसि निर्भरमतिशयेन गर्भखिन्नायाः सीतायाः प्रवासनं निर्वासनं तत्र पटोर्दक्षस्येत्यर्थः अत्र रामपदमकरुणत्वरूपार्थान्तरसंक्रमितं तदतिशयो व्यंग्यः सचालं

यथावा हे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणं रामस्य गात्रमसि निर्भरगर्भखिन्नसीताविवासनपटोः करुणा कुतस्ते अत्र रामस्य स्वहस्तं प्रति रामस्य गात्रमसीति वचनमनुपयुक्तं सद्रामस्येत्यनेन स्वस्यात्यंतनिष्करुणत्वं गर्भीकरोति तच्च निर्भरेत्यादिविशेषणेनाविष्कृतं यद्यप्यनयोर्विधिनिषेधयोरुदाहरणेषु व्यंग्यान्यर्थान्तरसंक्रमितवाच्यरूपाणि तथापि न ध्वनिभावास्पदानि स्वोक्त्यैव व्यंगविशेषाविष्करणात् व्यंग्याविष्करणे चालंकारत्वमेवेति प्राक् प्रस्तुतांकुरप्रकरणे व्यवस्थितत्वात्

तमित्यनेनोक्तः ध्वनिभावास्पदानि ध्वनित्वप्रयोजकानि व्यवस्थितत्वादिति शब्दार्थशक्त्याक्षिप्तोपि व्यंग्योर्थः कविना पुनः यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति ध्वनिकारवचनेन निर्णीतत्वादित्यर्थः ७ ७

उक्तावितिनिषेधाभाससाक्षेपंबुधाः केचनमन्वते आक्षेपोन्योविधौव्यक्तेनिषेधेचातिरोहितइत्येताभ्यांनाहंदूतीगच्छगच्छसीत्युदाहरणयो
प्रतिपादितावित्यर्थःप्रसिद्धत्वाद्बाधितप्रतिद्वंद्वित्वं इतिविधिः हेतोरिति हेतुमताकार्येणमानच्छेदःकार्यं एषइति विद्रुमच्छायःप्रवालकांतिः
विगततरुच्छायश्च मरुर्निर्जलदेशः मानेइति मानेनेच्छति अनिच्छतिसति एवमुपशमेवारयतिसति ह्रियांलज्जायांक्ष्मांभूमिमालिखं

पूर्वबाधितोप्रतिषेधौ आक्षेपभेदत्वेनोक्तौ इहतुप्रसिद्धौ विधिप्रतिषेधौ तत्प्रतिद्वंद्विनावलंकारत्वेनवर्णिता
वितिभेदः हेतोर्हेतुमतासार्द्धंवर्णनंहेतुरुच्यते असावुदेतिशीतांशुर्मानच्छेदायसुभ्रुवां यथावा एषतेवि
द्रुमच्छायोमरुमार्गइवाधरः कस्यनोतनुतेतन्विपिपासाकुलितंमनः मानेनेच्छतिवारयत्युपशमेक्ष्मामा
लिखंत्यांह्रियांस्वातंत्र्येपरिवृत्यतिष्ठतिकरौव्याधूयधैर्येगते तृष्णेत्वामनुबध्नताफलमियत्प्राप्तंजनेनामुनाय
स्पृष्टोनपदासएवचरणोस्प्रष्टुंनसंमन्यते इत्युदाहरणं त्यां भूम्युल्लेखनस्यतदनुभावत्वात् स्वातंत्र्येच परिवृत्त्यपराङ्मु
खीभूयतिष्ठतिसति धैर्येकरौव्याधूयममनानुमतमितिसूचनायहस्तधूननंकृत्वागतेसति हेतृष्णेत्वामनुसरतामुनाजनेनैतावत्फलं
प्राप्तं यत्पादेनापियोनस्पृष्टः सएवचरणोत्वयोस्प्रष्टुंनसम्यक्मन्यतेअनुजानातीत्यन्वयः अत्रतृष्णारूपहेतुतत्कार्ययोःस्पष्टमभिधा
नं

भेदांतरमाह हेतुहेतुमतोरिति केचित् भट्टोद्भटप्रभृतयः तदुक्तं हेतुमता सह हेतोरभिधानमभेदता हेतुरिति लक्ष्मीति कटाक्षाः विदुषांलक्ष्मीविलासा इत्यन्वयः अत्रविलासहेतोर्विलासाभिन्नत्वेनाभिधानं एवंविधलक्षणायाः प्रयोजनमाह अत्रेति कार्यावश्यंभावश्च तच्छैघ्र्यंचेति विग्रहः आदिना अपथ्याशनं रोग इत्यादौ कार्यगतोपादेयत्वानुपादेयत्वादिसंग्रहः आयुरिति वीरः कलिंगेश्वरः

हेतुहेतुमतोरैक्यं हेतुं किंचित्प्रचक्षते लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः अत्र च कार्यावश्यंभावतच्छैघ्र्यादि प्रत्यायनार्थः कार्यकारणभेदव्यपदेशः यथावा आयुर्दानमहोत्सवस्य विनतक्षोणीभृतां मूर्त्तिमान् विश्वासो नयनोत्सवो मृगदृशां कीर्त्तेः प्रकाशः परः आनंदः कलिताकृतिः स्फ मनसां वीरश्रियो जीवितं धर्मस्यैषनिकेतनं विजयते वीरः कलिंगेश्वरः अत्र दानमहोत्सवायुष्करत्वादिनाध्यवसिते राज्ञि तदायुष्ट्वादिव्यपदेशः

कलिंगदेशाधिपो विजयत इत्यन्वयः कीदृशः दानरूपस्य महोत्सवस्य आयुरिति कार्याभिन्नत्वेनाभिधानं एवमग्रेपि विशेषेण नतानां क्षोणीभृतां राज्ञां कलिताकृतिः धृताकारः वीरश्रियः वीरलक्ष्म्याः निकेतनं स्थानं इतिश्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यभट्टविठ्ठलसूरिवरात्मजश्रीरामचंद्रसूरिसूनुना वैद्यनाथेन कृतायामलंकारचंद्रिकाख्यायां कुवलयानंदटीकायां हेत्वलंकारप्रकरणं संपूर्णं

त्वयीति अजनिष्ट अभूत युधि संग्रामे तद्द्विषयेति प्रभुविषयाद्द्विषत् गणस्य यारतिस्तद्रूपइत्यर्थः अत्रशत्रुविषयकत्वरूपानौचि
त्येनप्रवर्त्तितत्वाद्भावस्याभासत्वं पश्यामइति नायकस्यस्वमित्रंप्रतिनायिकावृत्तांतोक्तिः मयितूष्णींभूतेकिमियंप्रपद्यतेकुरुते

अत्रप्रभुविषयरतिभावस्यशृंगाररसाभासोंगं यथावा त्वयिलोचनगोचरंगतेसफलंजन्म
नृसिंहभूपते अजनिष्टममेतिसादरं युधिविज्ञापयति द्विषांगणः अत्रकवेःप्रभुविष
यस्यरतिभावस्यतद्विषयद्विषद्गणरतिरूपोभावाभासोंगं समाहितंयथा पश्यामःकि
मियंप्रपद्यतइतिस्थैर्यं मयालंबितं किंमानालपतीत्ययंखलुशठःकोपस्तयाप्याश्रितः
इत्यन्योन्यविलक्ष्यदृष्टिचतुरेतस्मिन्वनस्थांतरे सव्याजं हसितंमयाधृतिहरो मुक्तस्तुबा
ष्पस्तया अत्रशृंगारस्यकोपशांतिरंगं

तत्पश्यामइत्यभिप्रायेणमयास्थैर्यमौनरूपमालंबितमगीकृतं पश्यामइतिबहुवचनंसखीसमानाभिप्रायंएवंतयापिअयंखलुशठो
मांकिमितिनालपतिभाषतइतिकोपआश्रितः इत्यनोन्यंपरस्परंविलक्ष्यालक्ष्यरहितायादृष्टिस्तत्रचतुरे सव्याजं निमित्तांतरव्याजसहितं

कुवल०
१५७

तदुक्तं रत्यादिश्चेन्निरंगः स्याद्देवादिविषयोऽथवा अन्यांगभावभाग्वा स्यान्न तदा स्थायिशब्दभागिति स्थायिन एव चाभिव्यक्तरसत्वं यदाहुः कारणान्यथकार्याणि सहकारीनियानिच रत्यादेः स्थायिनालोकेतानिचेन्नाट्यकाव्ययोः विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः व्यक्तः सतैर्विभावाद्यैः स्थायीभावो रसः स्मृतइति अभिव्यक्तानांच रत्यादीनां रसरूपाणांक्रमात्शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशांतरूपविशेषसंज्ञाबोध्याः निर्वेदादिरिति निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः आलस्यंचैवदैन्यं

चं०८

विभावानुभावाभ्यामभिव्यंजितो निर्वेदादिस्त्रयस्त्रिंशद्भेदो देवतागुरुशिष्यद्विजपुत्रादावभिव्यज्यमाना रतिश्च भावः स यत्रापरस्यांगं स प्रेयोलंकारः छ

च चिंता मोहः स्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो जडता तथा गर्वो विषाद औत्सुक्यं निद्रा विस्मृतिरेव च स्वप्नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः त्रयस्त्रिंशदमीवाः समाख्यातास्तु नामत इति भरतेनोक्ताः लज्जादिना विकारगोपनमवहित्थाख्यो भावः देवतेत्याद्यपरिपुष्टत्वादेरुपलक्षणं रतिरितिचापुष्टहासादेः छ छ

१५१

अनौचित्येनेति एतच्चोदाहरणे दर्शयिष्यामः मुनिरिति कुंभसंभवोऽगस्त्यः एकचुलकेन समुद्रे पीयमाने तदंतर्गतयोरवतार रूप योर्मत्स्यकूर्मयोर्दर्शनेन गम्योऽद्भुतरसो मुनिप्रभावातिशयपर्यवसन्नतया तद्विषयरतिपोषकत्वात्तदंगमितिभावः अयमिति भूरि

अनौचित्येन प्रवृत्तो रसो भावश्च रसाभासो भावाभासश्चेत्युच्यते स यत्रापरस्यांगं तदूर्जस्वित् भावस्य प्रशाम्यदवस्था भावशांतिः तस्याः परांगत्वे समाहितं भावस्योद्गमावस्था भावोदयः द्वयोर्विरुद्धयोर्भावयोः परस्परस्पर्धा भावसंधिः बहूनां भावानां पूर्वपूर्वोपमर्देनोत्पत्तिर्भावशबलता एतेषामितरांगत्वे भावोदयादयस्त्रयोलंकाराः तत्र रसेवदुदाहरणं मुनिर्जयति योगींद्रो महात्मा कुंभसंभवः येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ अत्र मुनिविषयरतिरूपस्य भावस्याद्भुतरसोंगं यथा वा अयं स रसनोत्कर्षी पीनस्तनविमर्दनः नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः अत्र करुणस्य शृंगारोंगं प्रेयोलंकार एव भावालंकार उच्यते

श्रवसाच्छिन्नं हस्तमालोक्य तद्वधूनानुक्तिः स पूर्वानुभूतोयं करः यः कांचीसमाकर्षणशीलः नीवीवसनग्रंथिस्तस्याविस्रंसनो मोचक इति स्मर्यमाणया शृंगारावस्थया करुणरसपरिपोषः ९ ९ ९

कदेति निमिषमिवदिवसान् कदानेष्यामीत्यन्वयः कीदृशः काश्यांगंगातीरेवसन् अयेइत्यादेरितिक्रोशन्नित्यनेनान्वयः अत्यु
च्चाइति स्फाराः विस्तीर्णाः प्रस्तौमि प्रसंजयामि भुवः पृथिव्याः इमां भुवं बिभ्रत् धारयमाणः त्वत्प्रत्यर्थीति हेवीरसंत्रासतोभ

सयथा कदावाराणस्याममरतटिनीरोधसिवसन्वसानःकौपीनंशिरसिनिदधानोंजलिपुटं अयेगौरीनाथत्रिपुरहरशं
भोत्रिनयनप्रसीदेतिक्रोशन्निमिषमिवनेष्यामिदिवसान् अत्रशांतिरसस्यकदेतिपदसूचितचिंताख्योव्यभिचारि
भावोंगं यथावा अत्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथांभोधयस्तानेतानपिबिभ्रतीकिमपिनश्रांतासितुभ्यंनमः
आश्चर्येणमुहुर्मुहुःस्तुतिमितिप्रस्तौमियावद्भुवस्तावद्बिभ्रदिमांस्मृतस्तवभुजोवाचस्ततोमुद्रिताः अत्रप्रभुविषय
रतिभावस्यवसुमतीविषयरतिभावोंगं ऊर्जस्वियथा त्वत्प्रत्यर्थिवसुंधरेशतरुणीःसंत्रासतःसत्वरंयांतीर्वीरविलुं
ठितुंसरभसंयाताःकिरातावने तिष्ठंतिस्तिमिताःप्ररूढपुलकास्तेविस्मृतोपक्रमास्तासामुत्तरलैस्तनैरतितरांलोलैरपांगैरपि

याद्वनेसत्वरंगच्छतीःतवप्रत्यर्थिनःशत्रवोवसुंधरेशाभूपास्तेषांतरुणीर्विलुंठितुंयाताःकीराताभिल्लास्तासांतरुणीनामुत्तरलैरतिचपलैःस्तनैरति
तरामतिशयेनलोलैश्चंचलैरपांगैर्नेत्रप्रांतैश्चतैस्तिमिताःस्तब्धाप्रोद्गतरोमांचाःविस्मृतउपक्रमोलुंठनरूपोयेस्तादृशास्तिष्ठंतीत्यन्वयःअत्र
श्रृंगारस्याननुरक्तराजवनिताविषयत्वादनौचित्येनप्रवृत्तिरित्याभासरूपत्वं ९

भावस्येति निर्वेदादेर्व्यभिचारिभावस्येत्यर्थः प्रत्यक्षप्रमुखाः प्रत्यक्षाद्याः तेचप्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुलब्धिसंभवैति
ह्याख्याः विभावेत्यादि रत्यादेरालंबनोद्दीपनरूपाणि नायिकाचंद्रोदयादीनिकारणानि काव्येवर्ण्यमानानि विभावयंतीतिव्युत्पत्त्या वि
भावपदेनाभिधीयंते कार्याणिचकटाक्षरोमांचादीनि तथाविधान्येवानुपश्चाद्भवंतीतिव्युत्पत्त्यानुभावपदेन एषामेवकार्याणांरत्यादि

इत्थंशतमलंकारालक्षयित्वानिदर्शिताः प्राचामाधुनिकानांच मतान्यालोच्य सर्वतः रसभाव तदाभासभावशां
तिनिबंधनाः चत्वारोरसवत्प्रेयऊर्जस्विच्चसमाहितं भावस्यचोदयः संधिःशबलत्वमितित्रयः अष्टौप्रमाणा
लंकाराःप्रत्यक्षप्रमुखाःक्रमात् एवंपंचदशान्यानप्यलंकारान्विदुर्बुधाः तत्रविभावानुभावव्यभिचारिभिर्व्यंजितो
रतिहासशोकादिश्चित्तवृत्तिविशेषो रसः सयत्रपरस्यांगंभवति तत्र रसवदलंकारः नोत्पादनेकर्तव्ये सहकारिभूतान्यु

त्कंठादीनिच व्यभिचारिपदेन विशेषादभितः समंततः येस्थायिनंचारयंतीतिव्युत्पत्तेः एवंरतिरासत्त्यनुरागादिपर्यायबोध्यांतः
करणवृत्तिः विकृतविदूषिकादिचेष्टादर्शनजन्याचित्तस्यविकासरूपावृत्तिर्हासः इष्टनाशानिष्टलाभादिजन्याचित्तवृत्तिः शोकःप्रसिद्धः
आदिपदेनक्रोधोत्साहभयजुगुप्साविस्मयनिर्वेदाख्यानांषण्णांपरिग्रहः विशेषपदेनचरत्यादेः स्थायित्वप्रयोजकंपरिपुष्टत्वंकांताविष
यत्वमितरानंगत्वंच विवक्षितं

तदिति एधि भव निनीषामि नेतुमिच्छामि यतस्त्वैव रूपेण समः समस्त्रियो नलः पत्रिणा हंसेन पादेन विलिख्य अदर्शि दर्शितः एकेति हे वीरक्षणमात्रेण युद्धप्रस्थानाद्भावी यो विरहक्लेशस्तदसहिष्णुंल्लोलाक्षीं दयितां पश्यतस्तथा प्रौढसंग्रामाडंबरमाकर्णयतश्च भवतः एका कपोलस्थली द्राक् शीघ्रं पुलकैः कुसुमायुधस्य मदनस्येषुधिस्तरुणीमिव प्रव्यक्ता पुंखावलीशरपुंखपंक्तिर्यत्र

भावोदयो यथा तदद्यविश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्दिलोकिनी अदर्शि पादेन विलिख्य पत्रिणा तवैव रूपेण समः समास्त्रियः अत्र नलं प्रति दमयंत्या औत्सुक्यरूपभावस्योदयः शृंगाररसस्यांगं भावसंधिर्यथा एका भूत् कुसुमायुधेषुधिरिव प्रव्यक्तपुंखावली जेतुर्मंगलपालिकेव पुलकैरन्या कपोलस्थली लोलाक्षीं क्षणमात्रभाविविरहक्लेशासहां पश्यतो द्राग् आकर्णयतश्च वीर भवतः प्रौढाहवाडंबरं अत्र रमणीप्रेमरणौत्सुक्ययोः संधिः प्रभुविषयभावस्यांगं

तथा भूताः भूत् अन्या द्वितीया जेतुर्जयशीलस्य मंगलपालिका मंगरूपापालिका या कुशकाशादिनिर्मिता उभयपार्श्वस्थस्तंभवृक्षादिषु बद्धा मार्गपालीति प्रसिद्धा तद्वद् भूदित्यर्थः अत्र प्रेमपदोक्तायारतेरपरिपुष्टत्वाद्भावरूपत्वं बोध्यं ७ ७

क्काकार्यमिति शुक्रकन्यां देवयानीं दृष्टवतो राज्ञो ययातेरियमुक्तिः अकार्यब्राह्मणकन्यासक्तिः शशलांछनस्यचंद्रस्यकुलंसोमवंशः अयंवितर्कः तदुपमर्द्देनभूयोपीत्यौत्सुक्यं एवमग्रेपि श्रुतं शास्त्रश्रवणमितिमतिः अहोकोपेपीतिस्मरणं अपगतकल्मषाःकृते स्कृतेधीर्येषांतेकिंवदिष्यंतीतिशंका स्वप्ने पीतिदैन्यं हेचेतः स्वास्थ्यमुपेहीतिधैर्यं कःखलुधन्योयुवातरुणःअधरंधास्यतिपा

भावशबलंयथा क्काकार्यशशलक्ष्मणः क्वचकुलंभूयोपिदृश्येत सादोषाणांप्रशमायनःश्रुतमहोकोपे पिकांतंमुखं किंवक्ष्यंत्यपकल्मषाःकृतधियःस्वप्नेपिसादुर्लभाचेतःस्वास्थ्यमुपैहिकःखलुयुवाधन्योधरंधा स्यति अत्रवितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानांशबलताविप्रलंभशृंगारस्यांगं प्रमाणालंका रेप्रत्यक्षंयथा क्रांतकांतवदनप्रतिबिंबे भग्नबालसहकारसुगंधौ स्वादुनिप्रणादितालिनिशीते निर्विवारमधुनींद्रियवर्गः

स्यतीतिचिंता विप्रलंभोवियोगइतिपर्यायो क्रांतेति इंद्रियाणांवर्गःसमूहः मधुनिम द्ये निर्ववारनिर्वृतिंप्राप कथंभूते संक्रातिप्रियमुखप्रतिबिंबे भग्नकोमलाम्रपल्लववत्सुगंधौ स्वादुनि आस्वाद्ये प्रकृष्टना दयुक्तभ्रमरयुते शीतस्पर्शेचेति अत्रेंद्रियतृप्त्यातज्जन्यप्रत्यक्षमलंकारः १ १ १

किमिति आरात् दूरे इतिक्षणं संदिह्य कश्चित् बकसहवासिनां कमलानां परोक्षै रदृश्यैर्बिंबोकैर्मानालियकथालापे बिब्बोको नादर क्रियेत्युक्तलक्षणैर्हावविशेषैर्मुखमिति निश्चिकाय निर्णीतवान् इति प्रत्यक्षं यथेति यथाशब्दा अनुमानार्थाः यथाशब्दस्तु निर्दिष्टस्तुल्य योगानुमानयोरिति विश्वकोशात् तथा चञ्चपलजलदरूपो धूमः व्योम्न आकाशस्य रंध्रमवकाशं यस्मात्स्थगयति यस्माच्च कीट

यथावा किंतावत्सरसि सरोजमेतदाराद हो स्वित्मुखमवभासते युवत्याः संशय्य क्षणमपि नि
श्चिकाय कश्चिद्बिब्बोकैर्बकसहवासिनां परोक्षैः पूर्वत्र प्रत्यक्षमात्रमत्र तु विशेषदर्शनजन्यसंशयोत्त
र प्रत्यक्षमिति भेदः अनुमानं यथा यथा रंध्रं व्योम्नश्चलजलदधूमः स्थगयति स्फुलिंगानां रूपं द
धति च यथा कीटमणयः यथा विद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्तथा मन्ये लग्नः पथिकत
रुखंडे स्मरदवः

मणयः खद्योताः स्फुलिगानां रूपं दधति धारयंति यस्माच्च विद्युद्रूपाभिर्ज्वालाभिरुल्लसिताः प्रका
शीभूताः परितः पिंगवर्णाश्च ककुभो दिशस्तस्मात्पथिकरूपाणां तरूणां खंडे समूहे स्मरलक्षणो दवाग्निर्लग्न इति मन्ये इत्यन्वयः प्र
योगस्तु पथिकतरुखंडं स्मरदावानलवत् व्योमव्यापिजलदधूमवत्त्वादित्यादिर्बोध्यः ३ ३ ३

विदितमिति इत्थंभूतःपरार्थैकप्रवृत्तिकः अतइत्यस्यचेष्टारूपंप्रमाणांतरंनाशंकनीयमित्यग्रेतनेनान्वयः लोलेति गुरूणांसंनि
धावपिद्वाभ्यांनायकाभ्यांसमयोचितोविधिर्नोत्सृष्टः यथालोलद्भ्रूलतयानायिकयाविपक्षस्यसपत्न्यादेर्दिशउपन्यासेतत्सकाशा

लिंगंयथा विदितंवोयथास्वार्थानमेकाश्चित्प्रवृत्तयः ननुमूर्तिभिरष्टाभिरित्थंभूतोस्मिसूचितः अत्रशिवस्य
श्रुतिप्रसिद्धसर्वोपकारकपृथिव्याद्यष्टमूर्तिपरिग्रहलिंगेनतत्प्रवृत्तीनांलोकानुग्रहैकप्रयोजनत्वंसम
र्थितं लिंगस्यमूलभूतवेदानुमापकतयावैदिकशब्दप्रमाणएवांतर्भावः एवंलौकिकलिंगानामपिलौकि
कशब्दोन्नायकतयालौकिकशब्दप्रमाणएवांतर्भावः अतःलोलद्भ्रूलतयाविपक्षदिगुपन्यासेविधूतंशि
रस्तद्वृत्तांतपरीक्षणेकृतनमस्कारोविलक्ष्यःस्थितः ईषत्ताम्रकपोलकांतिनिमुखेदृष्ट्यानतःपादयोरुत्सृ
ष्टोगुरुसंनिधावपिविधिर्द्वाभ्यांनकालोचितः इत्यादिचेष्टारूपंप्रमाणांतरंनाशंकनीयं

दागतोसीतिसूचनेकृ
ते नायकेननेतिसूचनायशिरोविधूतंसंचालितं ततस्तद्वृत्तांतपरीक्षणेनायिकयाकृतेसत्यकृतनमस्कारःविलक्ष्यएवस्थितः ततईष
त्ताम्रकपोलकांतिर्यस्यतादृशेनायिकायामुखेकोपातिशयाज्जातेसतितत्यादयोर्दृष्टिपातेनैवानतः प्रणतइति ९ ९

सौमित्रेइति विरहातुरस्य रामस्य लक्ष्मणंप्रत्युक्तिः अत्राप्ययंचंद्रः कुरंगधारित्वादित्प्रयोगः इत्यनुमानं तामिति तारकाणां
न्यासः संनिवेशः शकटस्याकरं संस्थानंआश्रितस्तां रोहिणीं विजानीहीत्यतिदेशवाक्यार्थज्ञानमिहोपमानं इयंशकटाकारन
क्षत्रव्यक्तिः रोहिणीपदवाच्येत्युपमितिप्रतिकरणत्वात् अत्रेति अत्र एषुराजसुमध्ये मन्मथमिवातिसुंदरं महीपतिंवें

यथावा सौमित्रेननुसेव्यतांतरुतलंचंडांशुरुज्जृंभतेचंडांशोर्निशिकाकथा रघुपतेचंद्रोऽयमुन्मीलति वत्सैतद्विदि
तंकथंनुभवताधत्तेकुरंगंयतः क्वासिप्रेयसिहाकुरंगनयनेचंद्राननेजानकि उपमानंयथा तांरोहिणींविजा
नीहिज्योतिषामत्रमंडले यस्तन्वितारकान्यासःशकटाकारमाश्रितः अत्रमन्मथमिवातिसुंदरंदानवारि
मिवदिव्यतेजसं शैलराजमिवधैर्यशालिनंवेद्मिवेंकटपतिंमहीपतिं. पूर्वोदाहरणेउपमानभूतमतिदेशवा
क्यंदर्शितं अत्रातिदेशवाक्यार्थसादृश्यप्रत्यक्षरूपमुपमानंफलेनसह दर्शितमिति विशेषः शब्दप्रमाणंयथा

कटपतिसंज्ञंवेद्मीत्याद्यन्वयः दानवारिर्विष्णुः शैलराजंहरं धैर्यशालिनंमदनशासकत्वात् प्रत्यक्षरूपमिति सादृश्यवि
शिष्टपिंडप्रत्यक्षस्यापिफलायोगव्यवछिन्नत्वेनकरणत्वादितिभावः फलेन उपमितिरूपेण इत्युपमानं ७

विद्वण्वतेति कुमारसंभवेबटुवेषंहरंप्रतिपार्वत्याइयमुक्तिः वरदोषंप्रकाशयतापि स्वलितांतःकरणेनत्वयाईशंमहादेवंप्रति एकंअलक्ष्यजन्मत्वंसाधूक्तं यतोयमीशमात्मभुवोब्रह्माणोपिकारणमामनंतिवेदाः सकथंलक्ष्यःप्रभवउत्पत्तिस्थानंयस्यतादृक्भ विष्यतीत्यन्वयः विवक्षतेतिकचित्पाठःवक्तुमिच्छतितदर्थः बलादिति नास्तिकोक्तिरियं हेजनाःपापानिबलातूकुरुत तानिचपा

विद्वण्वतादोषमपिच्युतात्मनात्वयैकमीशंप्रतिसाधुभाषितं यमामनंत्यात्मभुवोपिकारणंकथंसलक्ष्यप्रभवो भविष्यति अत्रशिवःपरमेष्टिनोपिकारणमित्यत्रश्रुतिरूपंशब्दप्रमाणमुपन्यस्तं एवंस्मृतिपुराणागमलौ किकवाक्यरूपाण्यपिशब्दप्रमाणान्युदाहरणीयानि तत्रस्मृतिर्यथा बलाकुरुतपापानिसंतुतान्यकृतानि वः सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् पूर्वंश्रुतिरभिमतार्थेप्रमाणत्वेनोपन्यस्ता इहतुस्मृतिरनभिम तार्थेतद्दूषणपरेणप्रमाणतयानीतेतिभेदः आचारात्मतु ष्योरपिमीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमा पकतयाशब्दप्रमाणएवांतर्भावः

पानिबोयुष्माकंअकृतान्येवभवंतु यतोबलात्कारेणकृतान्सर्वानर्थान्मनुरकृतानब्रवीदि त्यन्वयः तद्दूषणपरेण सर्वाभिमतार्थदूषणपरेण आत्मनस्तुष्टिःप्रीतिर्वैकल्पिकेविषयेगर्भाष्टमेऽष्टमेवाब्देब्राह्मणस्योपनयनमित्या दौप्रमाणमित्युक्तं

(103)

कुवल०
१६२

महाजनेति दमयंतींप्रतिनलस्योक्तिः नामवितर्के नाददतेनगृण्हंति आचारमुचं आचारत्यागिनं विगायति निंदंति असंशयमिति क्षत्रेण क्षत्रियेणपरिग्रहे क्षमायोग्याः यतआर्यश्रेष्ठंममनोयस्यांशकुंतलायामभिलाषशीलं पदेषुविषयेषु त्वंहीति वरमुद्रिकां वरदमुद्रां नाधत्से नधास्यसि श्रुतिर्वरदसंज्ञारूपालिंगंगमकंपक्षे श्रुत्यातृतीयादिरूपया प्रकर्षेणशीघ्रंसिद्धेअर्थे

तत्राचारप्रमाणंयथा महाजनाचारपरंपरेदृशीस्वनामनामाददतेनसाधकः अतोभिधातुंनतदुत्सहेपुनर्जनःकिलाचारमुचंविगायति आत्मतुष्टिप्रमाणंयथा असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्यामभिलाषितेमनः सतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणस्यवृत्तयः अत्रदुष्यंतेनात्मतुष्ट्याशकुंतलापरिग्रहस्यधर्म्यत्वंश्रुत्यनुमतमनुमीयते एवंश्रुतिलिंगादिकमपिमीमांसोक्तप्रमाणंसंभवदिहोदाहर्तव्यं तत्रश्रुतिर्यथा त्वंहिनान्नैववरदोनाधत्से वरमुद्रिकां नहिश्रुतिप्रसिद्धार्थेलिंगमाद्रियतेबुधैः अत्रकरिगिरीश्वरस्यवरदइत्यभिधानश्रुत्यासर्वाभिलषितंदातृत्वंसमर्थितं
अंगांगिभावेसतिलिंगमर्थप्रकाशनसामर्थ्यरूपमाद्रियते यथैंद्र्या गार्हपत्यमुपतिष्ठतइतिश्रुत्या गार्हपत्योपस्थाने विनियुक्तस्यमंत्रस्येंद्रप्रकाशनसामर्थ्यरूपेणलिंगेनेंद्रोपस्थानेविनियोगोनाद्रियतइत्यर्थः करिगिरीश्वरः कालहस्तीश्वरः

चं० २
१६:

यत्रैताइति लहरीवच्चलाश्चलाश्चंचलादृशो यासां ता एताः कामिन्यः यत्र जने भ्रूलतां व्यापारयंति प्रेरयंति तत्रैव भ्रूसंज्ञाविषय एव
यद्यस्मादमी मर्मस्पर्शिनो बाणाः सततं पतंति तत्तस्मान्मंडलीकृते चापे पुंखिता योजितमुखा ये शरास्तेषु प्रेंखन् चपलः करो य
स्य तादृशः क्रोधनः स्मरः शासनमाज्ञा तद्धारक आसामग्रतो धावतीति सन्त्यमित्यन्वयः अतिशयोक्तीति मार्गणत्वेन दृशाम

यथा वा यत्रैता लहरीचलाचलदृशो व्यापारयंति भ्रुवौ यत्तत्रैव पतंति संततममी मर्म
स्पृशो मार्गणाः तच्चक्रीकृतचापपुंखितशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः स
त्यं तदाऽसां स्मरः पूर्वं रूपकसंकीर्णमिदमतिशयोक्तिसंकीर्णमिति भेदः शुद्धानुमानं यथा
निलीयमानैर्विहगैर्निमीलद्भिश्च पंकजैः विकसंत्या च मालत्या गतोऽस्तं ज्ञायते रविः ७

ध्यवसानादिति भावः प्रयोगस्तु एताः चक्रीकृतचापं सदा पुरो धावदाज्ञाकर मदनकाः मर्मभेदि बाणपाताश्रय भ्रूसंज्ञास्थान
कत्वादिति बोध्यः एवं निलीयमानैरित्यत्रापि अयं कालः सूर्यास्तमयवान् पक्षिनिलीयमानताद्याश्रयत्वादिति रविरस्तगम
नवान् तादृशकालसंबंधित्वादिति वा प्रयोगो ज्ञेयः ७ ७ ७

164

किमसुभिरिति व्याख्यातंप्राक् तथेति नलमुखचंद्रविषयत्वव्याख्यातुः स्मरस्येत्यर्थः तच्चासिद्धत्वात्कल्पितमिति भावः इतिश
ब्दः निर्णेतुमिति अस्तीतिनिर्णेतुंशक्यमित्यन्वयः व्यक्तमिति हेतुस्तर्कः यदिव्यक्तंप्रकटंबलीयान् तदासाजान्हवीजलधिंना

कचिच्छब्दप्रमाणकल्पनयाचमत्कारोयथा किमसुभिर्ग्लपितैर्जडमन्यसेमयिनिमज्जतु
भीमसुतामनः ममकिलश्रुतिमाहतदर्थिकांनलमुखेंदुपरांविबुधःस्मरः अत्रम्रियमाणा
नांमनश्चंद्रंप्रविशतीत्येतदर्थिकायाः श्रुतेर्नलमुखचंद्रविषयत्वेकल्पितेतथाव्याख्यातृस्मरवा
क्यंप्रमाणतयोपन्यस्तं अर्थापत्तिर्यथा निर्णेतुंशक्यमस्तीतिमध्यंतवनितंबिनि अन्यथा
नोपपद्येतपयोधरभरस्थितिः यथावा व्यक्तंबलीयान्यदिहेतुरागमादपूरयत्साजल
धिंनजान्हवी गंगौघनिर्भर्त्सितशंभुकंधरासवर्णमर्णःकथमन्यथास्यात् १ १

पूरयत् अन्यथापूरणेसतिअर्णःसमुद्रस्यजलं गंगौघैर्निर्भर्त्सितंतिरस्कृतंसत् शंभुकंठसमानवर्णनीलंकथंस्यादित्यन्व
यः इत्यर्थापत्तिः १ १ १ १ १

स्फुटमिति· हेतान्वितर्कयंतस्तर्कशीला अपिलोकास्तदवलग्नं अनुपलभमाना अपश्यंतस्तवावलग्नं मध्यमसदितिस्फुटमेवनिश्चिन्वते कुलपर्वतश्रेष्ठयुग्मत्वेनाध्यवसितं स्तनद्वंद्वमाधारं विनायदास्तेतत्विह मकरध्वजस्येंद्रजालंमायाचरितंप्रतीमइत्यन्वयः इत्यनुपलब्धिः अभूतेति इश्वरंप्रतिभक्तस्योक्तिः पूर्वमभूतं अभूतपूर्वंतादृशंममकिंवाभाविनकिंचित् सर्वशीतानपादिद्वंद्व

अनुपलब्धिर्यथा स्फुटमसदवलग्नंतन्विनिश्चिन्वंतेतेतदनुपलभमानास्तर्कयंतोपिलोकाः कुचगिरि वरयुग्मंयद्विनाधारमास्तेतदिहमकरकेतोरिंद्रजालंप्रतीमः संभवोयथा अभूतपूर्वंममभाविकिं वासर्वंसहेमेसहजंहिदुःखं किंतुत्वदग्रेशरणागतानांपराभवोनाथनतेनुरूपः ७, ७,

सहे हियतोममसहजमेवदुःखमस्ति किंतुहेनाथतेतवशरणागतानांभक्तानां त्वदग्रेपराभवोनानुरूपोनोचितइत्यन्वयः अथवातवनानुरूपइत्यन्वयः अत्रदुःखादेः संभवाख्यप्रमाणसिद्धस्यकथनं ७, ७,

(165)

कुवल०
३६४

येनामेति भवभूतेरुक्तिः नामेतिकुत्सने नामप्रकाश्यसंभाव्यक्रोधापगमकुत्सनइत्यमरः किमपीतिकाकुः नकिमपीत्यर्थः ए षःकाव्यनिर्माणरूपः ममकोपिसमानधर्मासदृशोयउत्पत्स्यते अस्तिवातं अतियत्नः ह्यियस्मान्निरवधिरयंकालःपृथ्वीचविपुले तिक्रमेणयोज्यं अत्रकालोह्ययमित्यादिनासोपपत्तिकंसंभवाख्यप्रमाणमुपदर्शितं भ्रातरिति पथिकंप्रतिग्रामस्थस्यप्रश्नः

यथावा येनामकेचिदिहनःप्रथयंत्यवज्ञां जानंतितेकिमपितान्प्रतिनैषयत्नः उत्पत्स्यतेस्तिममकोपि समानधर्माकालोह्ययंनिरवधिर्विपुलाचपृथ्वी यथावा भ्रातःपांथकुतोभवान्नगरतोवार्त्तानवावर्त्त तेबाढंब्रूहियुवापयोदसमयेत्यक्त्वाप्रियांजीवति सत्यंजीवतिजीवतीतिकथितावार्त्तामयापिश्रुता विस्तीर्णापृथिवीजनोपिविविधः किंकिंनसंभाव्यते अत्राद्योदाहरणेअभूतपूर्वममभाविकिंचिदस्ति संभवप्रमाणसिद्धोर्थोदर्शितः १ १ १

कुतइत्यनंतरमागतइतिशेषः नगरादित्युत्तरं वार्त्तेतिपुनःपूर्वस्यप्रश्नः बाढमित्युत्तरंअंगीकारे अस्तीत्यर्थः ब्रूहीतिपूर्वस्योक्तिः युवेत्यादिपांथवचनं सत्यंजीवतीतिपुनःपूर्वस्यप्रश्नः जीवतीत्यादिसर्वंपांथवचनं इतिसंभवः १ १

रूपकंविनाप्युत्प्रेक्षायांतात्पर्यग्राहकमस्तीतिशंकते नन्विति एवमुक्तौतमोगजानामित्युक्तौ तथाचसाधकांतरस्यसाधकांतराद्रू
पकत्वाद्रूपकस्योत्प्रेक्षांगत्वमविकृतमितिभावः अवत्विति सवितुःसूर्यस्यतुरगावलीअश्वपंक्तिर्नोऽस्मानवतु केवनभःश्रियःगगन
लक्ष्म्याःमरकतमणीनामेकलताएकावलीवेत्युत्प्रेक्षा सूर्यतुरंगाणांहरितवर्णत्वात् कथंभूतासम्यगतिलंघितास्तुंगाउच्चाःप

ननुशशांकेनलूनाकृतीनांतमसांगात्रखंडाइवावेपंतेत्येतावदुक्तावपिसिद्ध्यत्युत्प्रेक्षा तादात्म्यसंभाव
नोपयुक्तलूनाकृतित्वरूपाधिकविशेषणोपादानात् सत्यं तथोक्तावाकृतिलवनादिधर्मरूपकार्यस
मारोपनिर्मिताशशांकतमसोर्हंतृहंतव्यचेतनवृत्तांतसमारोपरूपासमासोक्तिरपेक्षणीया एवमुक्तौरू
पकमितिविशेषः एवमत्रातिशयोक्तिरूपकोत्प्रेक्षाणामंगांगिभावेनसंकरः समप्राधान्यसंकरोयथा
अवतुनःसवितुस्तुरगावलीसमतिलंघिततुंगपयोधरा स्फुरितमध्यगतारुणनायकामरकतैकल
तेवनभःश्रियः योधरामेघायया एकावलीपक्षेपयोधरौस्तनौ तथास्फुरितोदीप्तिमान्मध्यगतःअरुणरूपोनायकोनेतासार
थिर्यस्याःसा पक्षे अरुणः आरक्तःनायकोहारमध्यमणिः नायकोनेतरिश्रेष्ठेहारमध्यमणावपीतिविश्वः ७ ७

(166)

कुसुमेति माघेऋतुवर्णनेपद्यमिदं अन्ययाकयापिवनितयाचलितयाकलस्वरोमेखलायाः कांच्याः कलकलः कोलाहलोविदधे किंभूतयाकुसुमसौरभलोभेनपरिभ्रमतांभ्रमराणां संभ्रमेणत्वराविशेषेण संभृतासमृद्धाशोभायस्यास्तया अलकालोलायस्यांतादृशीदृक्यस्यास्तथाभूतयेति आनंदेति आनंदेनमंथरंयथास्यात्तथापुरंदरेणेंद्रेण मुक्तमर्पितंमाल्यंयत्रतादृशं

तत्रसंसृष्टिर्यथा कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया चलितयाविदधेकलमेखलाकलकलोलकलोलदृशान्यया अत्रशब्दालंकारानुप्रासयमकयोः संसृष्टिः लिंपतीवतमोंगानिवर्षतीवांजनंनभः असत्पुरुषसेवेवदृष्टिर्निष्फलतांगता अत्रोत्प्रेक्षयोरुपमायाश्चेत्यर्थालंकाराणां संसृष्टिः आनंदमंथरपुरंदरमुक्तमाल्यंमौलौहठेननिहितंमहिषासुरस्य पादांबुजंभवतुमेविजयायमंजुमंजीरसिंजितमनोहरमंबिकायाः अत्रशब्दार्थलंकारयोरनुप्रासोपमयोः संसृष्टिः

महिषासुरस्यमौलौमस्तकेहठेननिहितं मंजुमनोज्ञं मंजीरस्यनूपुरस्यसिंजितंरणितंयत्रतादृशमनोरममंबिकायाःपादांबुजमंबुजसदृशंचरणंनोऽस्माकंविजयायभवत्वित्यन्वयः अत्रपादांबुजमित्युपमितसमासएव नतुमयूरव्यंसकादित्वात्एवांबुजमिति तथासत्यंबुजप्राधान्ये मंजीरासंजितान्वयायोगादित्युपमैवनरूपकमितिज्ञेयं इतिसंसृष्टिः

तलेष्विति तदा मारुतकंपितानां महीरुहाणां तलेषु छाया अवेपंत कंपमाना आसन् तत्रोत्प्रेक्षते शशांकरूपेण सिंहेन छिन्नाकृतीनां तमोलक्षणगजानां शरीरखंडा इवेति गुणानां चेति तार्त्तीयाधिकरणसूत्रं अस्यार्थः गुणानां गुणभूतानां पदार्थानां परार्थत्वात्

अंगांगिभावसंकरो यथा तलेष्ववेपंत महीरुहाणां छायास्तदा मारुतकंपितानां शशांकसिंहेन तमोगजानां लूनाकृतीनामिव गात्रखंडाः अत्र शशांकसिंहेनेति तमोगजानामिति च रूपकं यद्यप्यत्र शशांक एव सिंहस्तमांस्येव गजा इति मयूरव्यंसकादिसमासाश्रयणेन रूपकवत् शशांकः सिंह इव तमांसि गजा इवेत्युपमितसमासाश्रयणेनोपमापि वक्तुं शक्या तथापि लूनाकृतीनामिति विशेषणानुगुण्याद्रूपकसिद्धिः तस्य हि विशेषणस्य प्रधानेन सहान्वयेन भाव्यं न तु गुणेन गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायादुपमितसमासाश्रयणे तस्य पूर्वपदार्थप्रधानत्वात् शशांकस्य तमसां च प्राधान्यं भवेत् तत्र न विशेषणमुख्यार्थान्वयस्वारस्यमस्ति
मुख्यप्रधानार्थत्वात्परस्परमसंबंधः कुतः समत्वात् अप्रधानत्वसाम्यादिति यथा भाष्यकारमते पावमानेष्टीनामाधानस्य चाहवनीयाद्यर्थत्वात्परस्परं नांगांगिभावसंबंधः यथा वार्त्तिककारमतेऽग्निसमिंधनार्थानां मंत्रविशेषरूपाणां निविदां सामधेनीनां चेति संक्षेपः एतदधिकरणपूर्वपक्षसिद्धांतौ प्रकृतानुपयोगान्न दर्शितौ

स्वरूपनाशेति स्वरूपनाशरूपमुपचरितं गौणंयदाछ्कतिलवनमित्यर्थः नन्वेवमपितमोंशेऽस्यविशेषणस्यान्वयात्कथं रूपक
सिद्धिरित्याशंक्याह स्वरूपेति क्रोडीकारेणनिगरणेन लक्षणामूलेति साध्यवसानलक्षणामूलेत्यर्थः तथाचतमोंशेउपचा

स्वरूपनाशरूपोपचरिताछ्कतिलवनकर्तृत्वकर्मत्वान्वयसंभवेपिमुख्यार्थान्वयस्वारस्यमेवादरणीयं
स्वरूपनाशक्रोडीकरणप्रवृत्तयालक्षणामूलातिशयोक्त्यारूपकसिद्धिः तत्ररूपकमुत्प्रेक्षायाअंगं
तदुत्थापकत्वात् रूपकभावेहिछायाल्रूनगात्रखंडाइवावेपंतेत्येतावदुक्तावुपमेवसिद्ध्येत् वेपनादि
साधर्म्यान्नछायानांसद्यःछ्कतगात्रखंडतादात्म्यसंभावनारूपोत्प्रेक्षा

रेणान्वयइतिभावः नचैवंसत्युपमांगीकारेपि
किंबाधकमितिवाच्यं तदंगीकारेप्रधानान्वयेप्युपचाराश्रयणापत्तेः तदपेक्षयाऽप्रधानेतमोंशेतदंगीकारेणरूपकस्यैवौचित्यादिति
नछायानामिति सिद्ध्येदित्यनुवर्त्तते उत्प्रेक्षानसिद्ध्येदित्यन्वयः इवशब्दस्यसादृश्येप्रसिद्धतरत्वेनासतितात्पर्यग्राहकेसंभावनाबोध
कत्वासंभवादितिभावः

अनिर्दिष्टप्रवक्तृकेति अनिर्दिष्टो विशेषतोनुक्तः प्रवक्ता यस्येत्यर्थः एवंचैतदेवैतिह्यलक्षणमिति दर्शितं इत्यलंकारचंद्रिकायां प्रमा
णालंकारप्रकरणं संपूर्णं यथासंभवमिति संसृष्टिसंकराभ्यां द्वयोस्तदधिकानां वेति यथासंभवमित्यर्थः स्फुटेति स्फुटमवगम्य

द्वितीयोदाहरणे संभवोपपादकं कालानंत्यादिकमपि दर्शितं तृतीयोदाहरणे तु संभवोपि कंठोक्त इति
भेदः ऐतिह्यं यथा कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे एति जीवंतमानंदो नरं वर्षशतादपि अ
त्र लौकिकी गाथेयमित्यनिर्दिष्टप्रवक्तृकप्रवादपारंपर्यरूपता दर्शिता अथैतेषामलंकाराणां यथासं
भवं क्वचिन्मेलने लौकिकालंकाराणां मेलन इव चारुत्वातिशयोपलंभान्नरसिंहन्यायेन पृथगलंकारा
वस्थितौ तन्निर्णयः क्रियते तत्र तिलतंडुलन्यायेन स्फुटावगम्यभेदालंकारमेलने संसृष्टिः नीरक्षी
रन्यायेनास्फुटभेदालंकारमेलने संकरः स चांगांगिभावेन समप्राधान्येन संदेहेन एकवाचकानु
प्रवेशेन चतुर्विधः एवं नृसिंहाकाराः पंचालंकाराः

मानो भेदो येषामिति विग्रहः एकस्मिन् वाचकेनुप्रवेशोऽवस्थितिः एतत्सर्वमुदाहरणे व्यक्तीभविष्यति ९ ९

168

कुवल०
१६७

अतिशयोक्त्या मेघानांस्तनत्वेनाध्यवसानरूपया गर्भैवेत्यनेन तिलतंडुलन्यायेनस्फुटावगम्यमानभेदायाः संसृष्टेः सकाशाद्वैल
क्षण्यंदर्शितं एवमत्रेति एकस्यचमत्कृतिजननेपरापेक्षत्वादंगांगिभावमाशंक्याह परस्परेति अंगुलीभिरिति शशीअंगुलीभि

अत्रपयोधरादिशब्दश्लेषमूलातिशयोक्त्यांगभूतयोत्थाप्यमानेवसवितृतुरगावल्यां मरकतैकावलीतादात्म्योत्प्रेक्षा
नभोलक्ष्म्यांनायिकाव्यवहारसमारोपरूपसमासोक्तिगर्भैवोत्थाप्यते पयोधरश्लेषस्योभयोपकारकत्वात् तत
उत्प्रेक्षासमासोक्त्योरेकःकालः परस्परापेक्षयाचारुत्वसमुन्मेषश्चोभयोस्तुल्यइतिविनिगमनाविरहात्समप्राधान्यं
यथावा अंगुलीभिरिवकेशसंचयंसन्निगृह्यतिमिरंमरीचिभिः कुड्मलीकृतसरोजलोचनंचुंबतीवरजनीमुखंशशी अ
त्रांगुलीभिरितिवाक्योक्तोपमयातत्प्रायपाठान्मुख्यकुड्मलीकरणलिंगानुगुण्याच्चउपमितिसमासाश्रयणेनलब्धयासरो
जलोचनमितिसमासोक्तोपमयांगभूतयोत्थाप्यमानेवशशिकर्तृकनिशामुखचुंबनोत्प्रेक्षानिशाशशिनोर्दंपत्यव्यवहारस
मारोपरूपसमासोक्तिगर्भैवोत्थाप्यते

रिवमरीचिभिःकेशसंचयमिवतिमिरंसंनिगृह्यकुड्मलीकृतसरोजलोचनंलोचनमिवसरोजंयत्र
तादृशंरजनीमुखंचुंबतीवेत्यन्वयः तत्प्रायेति उपमाबहुलेसंदर्भेपाठादित्यर्थः मुख्येति मुख्यार्थरूपंयत्कुड्मलीकरणरूपंलिंगंपुष्पा
साधारणधर्मस्तस्यानुकूल्यादित्यर्थः ७

उत्थापकत्वाविशेषत्वात् अंगत्वाविशेषात् चंद्रस्यचुंबनोत्प्रेक्षायांदांपत्यव्यवहारसमारोपात्मकसमासोक्तोचापेक्षितस्यनायकसाध
र्म्यस्योक्तोपमाभ्याभसमर्पणात्कथंतयोस्तदंगत्वमितिशंकते यद्यपीति मरीचिरिवेतिमरीचिभिरिवांगुलीभिस्तिमिरमिवकेशसंचय

उपमयोरुभयत्रोत्थापकत्वाविशेषात् समासोक्तिगर्भतांविनाचुंबनोत्प्रेक्षायानिरालंबनत्वाच्च ततश्चात्राप्यु
त्प्रेक्षासमासोक्त्योरेककालयोः समप्राधान्यं यद्यप्यत्रोपमाभ्यांशशिनिशागतावेवधर्मौसमर्थ्येते नतुशशि
नायकयोर्निशानायिकयोश्चसाधारणधर्मौ साधारणधर्मसमर्पणंचोत्प्रेक्षासमासोक्त्योरपेक्षितं उत्प्रेक्षायाः
प्रकृताप्रकृतसाधारणगुणक्रियानिमित्तसापेक्षत्वात्समासोक्तेर्विशेषणसाम्यमूलकत्वाच्च तथापिवाक्यो
क्तोपमायामिवकारस्यमरीचिभिरिवेत्यन्वयांतरमभ्युपगम्यान्वयभेदलब्धप्रकृताप्रकृतयोरेकैकविषयस्या
र्थद्वयस्यसमासोक्तोपमायांसरोजसदृशंलोचनमितिसमासांतरमभ्युपगम्यसमासभेदलब्धार्थद्वयस्य
चाभेदाध्यवसायेनसाधारण्यंसंपाद्यतयोरुत्प्रेक्षासमासोक्त्योरंगतानिर्वाह्या १ १

मित्येवंरूपमित्यर्थः एकैकविषयस्यार्थद्वयस्याभेदाध्यवसानेनेत्यन्वयः तयोःवाक्यसमासोक्तोपमयोः १ १ १

(१६९)

तनुदीर्घेत्यादौपूर्वनिपातनियमा
आवश्यकाभेदाध्यवसायेनोपपत्तौ कृतमन्वर्थांतरसमासांतरकल्पनागौरवेणेत्याशयेनाहयद्वेति
तथाचांगुलिमरीच्योस्तनुत्वनीरंध्रत्वाभ्यां तिमिरकेशसंचययोरावरणरूपत्वनीलत्वाभ्यां सरो
नुरोधेनयथासंख्यक्रमपरित्यागः
जलोचनयोर्दीर्घत्वकांतिमत्वाभ्यांच सादृश्यंबोध्यं प्रातिस्विकरूपेण अंगुलित्वमरीचित्वादिना अनुगतेति अनुगतंयत्साद
अप्रकृतकोटिगतानांचांगुलीकेशसंचयलोचना

यद्वा इहप्रकृतकोटिगतानां मरीचितिमिरसरोजानाम
नांचतनुदीर्घावरणत्वनीलनीरंध्रत्वकांतिमत्वादिनासदृशानां प्रातिस्विकरूपेणभेदवदनुगतसादृश्य
प्रयोजकरूपेणाभेदोप्यस्ति सचात्रविवक्षितएवभेदाभेदोभयप्रधानोपमेत्यालंकारिकसिद्धांतात् त
त्रचप्रयोजकांशनिष्कर्षन्यायेनाभेदगर्भतांशोपजीवनेनसाधारण्यंसंपाद्यप्रधानभूतो लेक्षा समासो
त्स्यंगतानिर्वाह्या श्यप्रयोजकंरूपंतनुत्वादिकंतेनेत्यर्थः एतच्चसादृश्यमतिरिक्तमित्यभिप्रायेणसिद्धांतादिति त
दुक्तं साधर्म्यंत्रिविधंभेदप्रधानमभेदप्रधानंभेदाभेदप्रधानंचेत्युपक्रम्य विद्यानाथेन उपमानन्वयोपमेयोपमास्मरणानां
१ १ १
भेदाभेदसाधारणसाधर्म्यमूलत्वमिति

सना स्यत्र ग्रामेय एतां स्फुरल्लावण्यं

पदभेदेनेति सोणत्थिएत्थ गामे जोएअं मह महं तला अंणं तरुणाणंहि अअलूडिं परिसप्पंतिं णिवारेइ अत्र पूर्वार्द्धेऽनुप्रासस्तृतीयपादे रूपकमिति तयोः संसृष्टिः वाच्यप्रतियोगिक

तरुणानां हृदयलुंठनं परिसर्पतिनिवारयतीति संस्कृतं एवंच काव्यावाच्यस्यानुप्रसादेः शब्दालंकारस्य तदनुप्रवेशोन

त्वादिति वाच्यं प्रतियोगिप्रतिसंबधियस्य तद्वाच्यप्रतियोगिकं तत्वादित्यर्थः

अत्रैकपदानुप्रविष्टो रूपकानुप्रासो यत्रैकस्मिन् श्लोके पदभेदेन शब्दार्थालंकारयोः स्थितिस्तत्र तयोः संसृष्टिरि

हतु संकर इति अलंकारसर्वस्वकारस्तु एकस्मिन्वाचकेऽनुप्रवेशो वाच्ययोरेवालंकारयोः स्वारसिकः वाच्यप्रति

योगिकत्वाद्वाचकस्येति मत्वार्थालंकारयोरप्येकवाक्यानुप्रवेशसंकरमुदाजहार सत्पुष्करद्योतितरंगशोभिन्य

मंदमारब्धमृदंगवाद्ये उद्यानवापीपयसीवयस्यामेणीदृशो नाद्य गृहे रमंते अत्र नाद्यगृहवापीपयसोः सत्पु

ष्करेत्यादिविशेषणे शब्दसाम्यं श्लेषः वाचकानुप्रवेश इति वक्तुं युक्तमिति भावः सत्पुष्करेति यस्यां नगर्या एणीदृश उद्यानसंबं

धिवापीपयसीव नाद्यगृहे रमंते क्रीडंति कीदृशे समीचीनैः पुष्करैः कमलैर्द्योतिनो ये तरंगास्तच्छोभावति गृहपक्षे समीचीनैः पुष्करैर्वाद्यभांड

मुखैर्द्योतितो यो रंगो नृत्यभूमिस्तच्छोभिनीत्यर्थः पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जले व्योम्नि खड्गफले पद्म इत्यमरः ७

170

पिनष्टीति व्याख्यातं प्राक् पौर्वापर्येणेति तथाच चमत्कारप्रयोजकपौर्वापर्यघटकत्वेन भेदानवभासात्संसृष्टिवैलक्षण्यमिति भावः दर्शादि
वद्दर्शपौर्णमासादिवत् अयंच भिन्नकालीनयोरपि समप्राधान्ये दृष्टांतः फलं तत्र स्वर्गः प्रकृते तु चमत्कृतिविशेषः शशिनमिति तत्र अजस्यें

पिनष्टीव तरंगाग्रैः समुद्रः फेनचंदनं तदादाय करैरिंदुर्लिंपतीव दिगंगना इत्यत्रोत्प्रेक्षयोः कालभेदेपि समप्राधान्यं अ
न्योन्यनिरपेक्षवाक्यद्वयोपात्तत्वात् तदादायेति फेनचंदनरूपकमात्रोपजीवनेन पूर्वोत्प्रेक्षानपेक्षणात् नचैवं लिंपतीव त
मोंगानीतिवदुत्प्रेक्षाद्वयस्य संसृष्टिरेवेयमिति वाच्यं लौकिकसिद्धपेषणलेपनपौर्वापर्यच्छायानुकारिणोत्प्रेक्षाद्वयपौर्वाप
र्येण चारुतातिशयसमुन्मेषतः संसृष्टिवैषम्यात् तस्माद्दर्शादिवदेकफलसाधनतया समप्रधानमिदमुत्प्रेक्षाद्वयं एवं सम
प्रधानसंकरोपि व्याख्यातः संदेहसंकरो यथा शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जन्हुकन्यावतीर्णा इ
ति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः अत्र इयमिति सर्वनाम्नाय घ्रजं वृतवतीं दुमतीवि
शिष्टरूपेण निर्दिश्यते तदा बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोः सदृशयोरैक्यारोपरूपा निदर्शना दुमत्या स्वयंवरे समगु

णयोरजेंदुमत्योर्योगेन प्रीतिर्येषां ते पौरा नागरिका नृपाणामन्येषां श्रवणयोः कटु पीडाकरं इति पूर्वार्द्ध रूपं एकमेव वाक्यं विवव्रुः उच्चारयामासुरित्यन्वयः

तेनसर्वनाम्ना साइंदुमती बिंबभूतोधर्मः अजकर्मकं वरणं तत्र तस्मिन्पक्षे विलीयेति अग्निसंयोगेनघृतादिवत्केनापिहेतुनाविलीनतांप्रा

यादितेनसास्वरूपेणैवनिर्दिश्यते बिंबभूतोधर्मस्तत्पूर्वप्रस्तावात्समगुणयोगप्रीतयेति पौरविशेषणाच्चा
वगम्यते तत्र प्रस्तुतेधर्मिणि तद्वृत्तांतप्रतिबिंबभूताप्रस्तुतवृत्तांतारोपरूपंललितमित्यनध्यवसायात्संदेहः वि
लीयेंदुः साक्षादमृतरसवापीयदिभवेत्कलंकस्तत्रत्योयदिचविकचेंदीवरवनं ततःस्नानक्रीडाजनितजडभावै
रवयवैः कदाचिन्मुंचेयंमदनशिखिपीडापरिभवं अत्रयद्येतावत्साधनंसंपद्येततदातापःशाम्यतीत्यर्थेकविसं
रंभश्चेत्तदेतदुपात्तसिध्यर्थमूहइतिसंभावनालंकारः एतावत्साधनंकदापिनसंभवत्येवातत्तापशांतिरपिग
गनकुसुमकल्पेत्यर्थेकविसंरंभश्चेदुपात्तमिथ्यात्वसिध्यर्थंमिथ्यांतरकल्पनारूपामिथ्याध्यवसितिरित्युभयथा
संभवात्संदेहः एवं सिक्तंस्फटिककुभांतः स्थितिश्वेतीकृतैर्जलैः मौक्तिकंचेल्लतांसूते तत्पुष्पैस्तेसमंयशः इ
त्यादिष्वपिसंभावनामिथ्याध्यवसितिसंदेहसंकरोद्रष्टव्यः प्येत्यर्थः विकचं विकसितं जडभावः शैत्यं मदनएवशिखी

वह्निः संरंभस्तात्पर्यसिक्तमिति स्फटिककुंभांतः स्थित्याश्वेतीकृतैर्जलैः सिक्तं मौक्तिकमित्यन्वयः ९ ९ ९

17

मुखेनेति संदोहः समूहः लक्षयित्वेति स्फुटमेकत्रविषयेशब्दार्थालंकृतिद्वयमिति सूत्रेणेत्यर्थः स्पष्टेति अथोऽनंतरं दिवसरूपमर
विंदं कमलं संचुकोच संकोचमगमत् कीदृक् स्पष्टमुच्छ्वसंतउल्लसंतः किरणाएव केसराणि यस्यास्तथाभूता सूर्यबिंबरूपा विस्तीर्णा

मुखेन गरलं मुंचन्मूलेवसतिचेत्फणी फलसंदोहगुरुणातरुणाकिंप्रयोजनं अत्रमहोरगवृत्तांतेवर्ण्यमा
नेराजद्वाररूढखलवृत्तांतोपिप्रतीयते तत्रकिंवस्तुतस्तथाभूतोरगवृत्तांत एवप्रस्तुतेऽप्रस्तुतः खलवृत्तांतस्त
तःप्रतीयतइतिसमासोक्तिः यद्वाप्रस्तुतखलवृत्तांतप्रत्यायनायाप्रस्तुतमहोरगवृत्तांतकीर्त्तनमप्रस्तुतप्रशं
सा यद्वावर्ण्यमानमहोरगवृत्तांतकीर्तनेन समीपस्थितखलमर्मोद्घाटनं क्रियतइति उभयस्यापिप्रस्तुतत्वा
त्प्रस्तुतांकुरइतिसंदेहः एकवाचकानुप्रवेशसंकरस्तुशब्दार्थालंकारयोरेवेतिलक्षयित्वाकाव्यप्रकाशकार
उदाजहार स्पष्टोच्छ्वसत्किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथोदिवसारविंदं श्लिष्टाष्टदिग्दलकलाप
मुखावतारबद्धांधकारमधुपावलिसंचुकोच

कर्णिकावराटोयस्यतत् श्लिष्टाःप्रकाशाभावेनपरस्परंमिलिता अष्टदिशएव
दलानांकलापस्तन्मुखेनावतारोयस्यास्तादृशीबद्धाअंधकाररूपामधुपावलिर्येनतथाभूतमित्यर्थः ७ ७ ७

ननु भेदाभेदरूपांशद्वयोपेतायाउपमाया भेदांशस्यानुपयोगात्कथंतस्याउत्प्रेक्षाद्युपयोगित्वमित्याशंक्यपरिहरति नहीति प्रकाश
श्च शीतापनयनंचेतिद्वंद्वः शीतालुः शीतार्त्तः शीतोष्णतृप्रेभ्यस्तदसहन इतिवालुः उक्तसिद्धांतस्यनिर्युक्तिकत्वेनाश्रद्धेयत्वमाशंकम

नहिप्रकाशशीतापनयनशक्तिमतः सौरतेजसः शीतापनयनशक्तिमात्रेणशीतालूपयोगितानदृष्टा एवमनभ्यु
पगमेच पांड्योयमंसार्पितलंबहारः क्लृप्तांगरागोहरिचंदनेन आभातिबालातपरक्तसानुः सनिर्झरोद्गारइवाद्रिराजः
इत्याद्युपमापिननिर्वहेत् नह्यत्राद्रिराजपांडययोरुपमानोपमेययोरनुगतः साधारणधर्मोनिर्दिष्टः एकत्रबालातप
निर्झरावन्यत्रहरिचंदनहाराविति धर्मभेदात् तस्मात्तत्रातपहरिचंदनयोर्निर्झरहारयोश्च सदृशयोरभेदांशोपजीवन
मेवगतिः

नंप्रत्याह एवमिति पांड्योयमिति पांडयनामाऽयं नृपः अद्रिराजइवाभाति कथंभूतः अंसयोरर्पितोलंबोहारोयेनसः तथाहरिचंदनेन रक्तचंदनेनक्लृप्तः
क्लृप्त अंगरागोनुलेपनंयेनतथाभूतः अद्रिराजः कीदृक् बालातपेनरक्तानिसानूनिप्रस्थानियस्य सः तथानिर्झरस्योद्गारेणोद्गमेनसहितः

VZO

श्लेषभित्तिकेति श्लेषोभित्तिरिवभित्तिर्मूलंयस्येत्यर्थः रागवतीति रागोऽनुरागोरक्तिमाच अंबरमाकाशंवस्त्रंच नन्वत्रविशेषणसाम्या
याभेदाध्यवसायापेक्षणेपि सत्पुष्करेत्यादौ शब्दसाम्यमात्रेणाप्युपमोपपत्तेर्नतदपेक्षेत्यत आह शब्देति शब्दतोऽर्थतोवेति शब्दप्रयु

अमंदमारब्धेत्यादिविशेषणेऽर्थसाम्यमुपमातदुभयमेकस्मिन्निवशब्देऽनुप्रविष्टमिति तदपिन मन्यामहे
सत्पुष्करेत्यादिविशेषणेपि श्लेषभित्तिकाभेदाध्यवसायरूपातिशयोक्तिलभ्यस्यधर्मसाम्यस्यैवतत्रे
वशब्दप्रतिपाद्यतयाशब्दसाम्यस्यतदप्रतिपाद्यत्वात् श्लेषभित्तिकाभेदाध्यवसायेन धर्मसाम्य
मतानंगीकारे अहोरागवतीसंध्याजहातिस्वयमंबरमित्यादिश्लिष्टविशेषणसमासोक्त्युदाहर
णेविशेषणसाम्याभावेनसमासोक्त्यभावप्रसंगात् शब्दसाम्यस्यैवशब्दप्रतिपाद्यत्वेपितस्योप
मावाचकत्वस्येवप्राप्त्याश्लेषवाचकत्वाभावाच्च शब्दतोऽर्थतोवाकविसंमतसाम्यप्रतिपादनेस
र्वविधेप्युपमालंकारस्वीकारात् ७ ७ ७ ७

क्तमर्थप्रयुक्तंवायत् कविसंमतंसाम्यंतत्प्रतिपादनइत्यर्थः सर्वविधेसर्वप्रकारे ७ ७ ७

यथेति चदि आल्हादन इति धात्वनुसाराच्चंद्रपदमन्वर्थं अन्वर्थोऽन्वर्थनामा तस्मात् मतद्वयस्याप्ययुक्तत्वात् विधुकरेति सहंसः

अन्यथा यथा प्रल्हादनाच्चंद्रः प्रतापात्तपनो यथा तथैव सोभूदन्वर्थो राजा प्रकृतिरंजनात् इत्य
त्राप्युपमान स्यात् न ह्यत्रान्वर्थनामरूपशब्दसाम्यं विना किंचिदर्थसाम्यं कविविवक्षितम
स्ति तस्माद्यत्रैकस्मिन्नर्थे प्रतिपाद्यमाने अलंकारद्वयप्रतीतिस्तत्र तयोरलंकारयोरेकवाच
कानुप्रवेशः यथा विधुकरपरिरंभादात्तनिष्यंदपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणां वि
फलितजलसेकप्रक्रियागौरवेणाव्यरचि सहृतचित्तस्तत्र भैमीवनेन अत्र हि प्रतिपाद्यमानोर्थः
समृद्धिमद्वस्तुवर्णनमुदात्तमितिलक्षणानुसारादुदात्तालंकाररूपः असंबंधे संबंधकथन
मतिशयोक्तिरितिलक्षणादतिशयोक्तिश्च नच सर्वत्रोदात्तस्यासंबंधे संबंधवचनरूपत्वं निर्णी
तमिति न विविक्तालंकारद्वयलक्षणसमावेशोस्तीति वाच्यं तत्र भैमीवनेन दमयंत्या उद्यानेन हृतचित्तो व्यरचि कृतः
कथंभूतेन चंद्रकिरणाश्लेषादात्तैरंगीकृतैर्निष्यंदैः पूर्णैश्चंद्रकांतघटितैस्तरूणामालवालैर्विफलीकृतजलसेकप्रकाररूपगौरवेणेत्यर्थः

153

कुवल० शब्दव्यवस्थितेति शब्दप्रयुक्तेत्यर्थः तथाचसमप्राधान्यमर्थभेदविषयमितिभावः प्रतिक्षिप्यतेनिवार्यतेकोट्यंतरमनेनेतिप्रतिक्षेपोवि चं०टी
१७२ रोधः मुक्ताइति विदुषांभवनेषुमंदिरेषुकेलीसुरतक्रियायां विछिन्नसूत्रात्हारात्गलिताःसंमार्जनीभिरपसारिताःप्रातःकालेंगणसी

दिव्यलोकगतसंपत्समृद्धिवर्णनादिष्वतिशयास्पृष्टस्योदात्तस्यशौर्यौदार्यदारिद्र्यादिविषयवर्णनेषूदात्ता
स्पृष्टायाअतिशयोक्तेश्चपरस्परविविक्ततयाविश्रांतेः तयोश्चेहार्थवशसंपन्नसमावेशयोर्नांगांगिभा
वः एकेनापरस्यानुत्थापनात्—स्वातंत्र्यपारतंत्र्यविशेषादर्शनाच्च नापिसमप्राधान्यं येशब्दैरिहसंबधिवस्तु
प्रतिपाद्यतेतैरेवतस्यैववस्तुनोसंबंधेसंबंधरूपस्यप्रतिपाद्यमानतयाभिन्नप्रतिपादकशब्दव्यवस्थितार्थभेदाभावात् ना
पिसंदेहसंकरः एकालंकारकोट्यांतदन्यालंकारकोटिप्रतिक्षेपाभावात् तस्मादिहोदात्तातिशयोक्त्योरेकवाचकानु
प्रवेशलक्षणःसंकरः क्वचित्संकराणामपिसंकरोदृश्यते यथा मुक्ताःकेलिविसूत्रहारगलिताःसंमार्जनीभिर्हृताः
प्रातःप्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाः दूराद्दाडिमबीजशंकितधियःकर्षतिकेलीशुकायद्विद्वद्भवने
षुभोजनृपतेस्तत्त्यागलीलायितं मांतेमंदंचलतांबालानांचरणलाक्षारसेनारुणाःमुक्ताः दूराद्दाडिमबीजशंकितधियःक्रीडाशुकायत्क १७
र्षतिआकर्षतितद्भोजनृपतेस्त्यागस्यदानस्यलीलायितमित्यन्वयः ७ ७

तत्रैव बालांघ्रिलाक्षारुणाइत्यत्रैव वक्ष्यमाणेति शंकितधियइतिवक्ष्यमाणेत्यर्थः तयोः तद्गुणकाव्यलिंगयोः तन्मूलः संकरमूलः

अत्रतावद्विदुषां संपत्समृद्धिवर्णनमुदात्तालंकारः तन्मूलकोबालांघ्रिलाक्षारुणाइत्यत्र तद्गुणालंकारः तत्रैववक्ष्यमाणभ्रांत्युपपादकः पदार्थहेतुककाव्यलिंगालंकारश्चेति तयोरेकवाचकानुप्रवेशसंकरः तन्मूलः शंकितधियइत्यत्रभ्रांतिमदलंकारः ताभ्यांचोदात्तालंकारश्चारुतांनीतइतितयोश्चतस्यचांगांगिभावसंकरः एवंविद्वद्गेहवैभवस्यहेतुमतोराज्ञोवितरणविलासस्यहेतोश्चाभेदकथनंहेत्वलंकारः सचराज्ञोवितरणविलासस्यनिरतिशयोत्कर्षाभिव्यक्तिपर्यवसायी एतावन्मात्रेकाविसंरंभश्चेदुक्तरूपोदात्तालंकारपरिष्कृतेहेत्वलंकारेविश्रांतिः कीदृशीसंपदितिप्रश्नोत्तरतयानिरतिशयैश्वर्यवितरणरूपाप्रस्तुतकार्यमुखेनतदीयसंपदुत्कर्षप्रशंसनेकविसंरंभश्चेत्कार्यनिबंधनाप्रस्तुतप्रशंसालंकारेविश्रांतिः कार्यस्यापिवर्णनीयत्वेनप्रस्तुतत्वाभिप्रायेतुप्रस्तुतांकुरेविश्रांतिः अत्रविशेषानध्यवसायात् संदेहसंकरः

ताभ्यां संकरभ्रांतिमद्भ्यां तयोः संकरभ्रांतिमतोः तस्य उदात्तस्य हेतुमतः कार्यस्य अभेदकथनं तत्त्यागलीलायितस्यकार्यमितिवक्तव्येतदेवत्यागलीलायितमित्यभेदकथनं तदीयेति राजकीयेत्यर्थः

अतथ्योदार्येति असत्योदार्येत्यर्थः तन्मूलकस्येति वितरणोत्कर्षपर्यवसायिहेत्वलंकारमूलकस्येत्यर्थः ननुराजसंपत्समृद्धेर्व्यंजनाग
म्यत्वेनावाच्यत्वात्कथंतद्वर्णनात्मकोदात्तालंकारेण सहैकवाचकानुप्रवेशकथनमित्याशंकायामाह वाचकशब्दस्येति त्रयाणामिति एक

किंच विहद्गृहवैभववर्णनस्यासंबंधे संबंधकथनरूपतयाऽतिशयोक्तेरुदात्ता
लंकारेण सहैकवाचकानुप्रवेशसंकरः निरतिशयवितरणोत्कर्षपर्यवसायिनो
हेत्वलंकारस्याप्यद्भुतातथ्योदार्यवर्णनात्मिकयात्युक्त्या सहैकवाचकानुप्रवेशसं
करः तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्यप्रस्तुतांकुरस्यवा राजसंपत्समृद्धिवर्ण
नात्मकोदात्तालंकारेण सहैकवाचकानुप्रवेशसंकरः वाचकशब्दस्यप्रतिपा
दकमात्रपरतया व्यंजकसाधारण्यादेषांचत्रयाणामेकवाचकानुप्रवेशसंकराणां
समप्राधान्यसंकरः

उदात्तातिशयोक्त्योरपरोहेत्वत्युक्त्योरन्योर्व्यंग्योदात्ताप्रस्तुतप्रशंसाप्रस्तुतांकुरान्यतरयोरित्येवंत्रयाणांपरस्परमित्यर्थः ७

उदात्तालंकारस्यहेत्वलंकारांगतायाः पूर्वमुक्तत्वादुदात्तातिशयोक्तिसंकरस्यापि तदंगत्वमिति शंकां निरस्यति उदात्तादिमात्रस्यैवेति
उदात्तादीत्यादिपदेन हेत्वलंकारपरिग्रहः हेत्वलंकारा दीत्यादिपदेन चाप्रस्तुतप्रशंसापरिग्रहः तत्रापि निरतिशयैश्वर्यवितरणोत्कर्ष
पर्यवसायिनो हेत्वलंकारस्यैव तादृशवितरणरूपकार्यपरिष्कारद्वारा तद्गम्यप्रस्तुतराजसंपदुत्कर्षप्रशंसारूपायामप्रस्तुतप्रशंसाय

नह्येतेषां परस्परमन्यत्रांगत्वमस्ति उदात्तादिमात्रस्यैव हेत्वलंकारादिचारुतापादकत्वे
नातिशयोक्तिसंकरस्यांगतयाऽनपेक्षणात् एवमत्रश्लोके चतुर्णामपि संकराणां
यथायोग्यं संकरः एवमन्यत्राप्युदाहरणांतराण्यूह्यानि ७ ३

मंगत्वं न त्वद्भुतातथ्यवर्णनारूपात्युक्तिसंकरस्याप्यपेक्षेति भावः यथायोग्यमिति तथाहि उदात्ततद्गुणयोरंगांगिभावसंकरस्य
भ्रांतिमदुदात्तयोरंगांगिभावसंकरस्य चांगांगिभावे च संकरः तथा भ्रांतिमदुदात्तयोरंगांगिभावसंकरस्योदात्तांगकहेत्वलंकारा
दिसंदेहसंकरस्य चांगांगिभावेन संकर इति सूक्ष्ममतिभिरूहनीयं ७ ७ ७

(178)

स्वकीर्त्यनुवृत्तये ग्रंथनाम स्वनाम चोपनिबध्नन् ग्रंथपूर्तिमनुवदति अमुमिति स्वग्रंथस्य प्रामाणिकत्वं सूचयितुमाह चंद्रालोकइ चंद्रालोक इति शारदागमसंज्ञकश्चंद्रालोकमूलभूतो ग्रंथः शरत्कालागमनेन चंद्रस्यालोक इति श्लेषः तस्माच्च कुवलयानंदः स्वग्रंथोऽभूत् कुवलस्य कुमुदस्यानंद इति च श्लेष इति शिवमास्तां विद्वद्वृंदमहामान्यरामचंद्रात्मजन्मना विदुषा वैद्यनाथेन कृतालंकारचंद्रिका ए

अमुं कुवलयानंदमकरोदप्पदीक्षितः नियोगाद्वेंकटपतेर्निरुपाधिकृपानिधेः चंद्रालोको विजयतां शारदागमसंभवः हृद्यः कुवलयानंदो यत्प्रसादादभूदयं इति श्रीमदद्वैतविद्याचार्यश्रीमद्विजकुलजलधिकौस्तुभश्रीरंगराजाध्वरींद्रवरदसूनोरप्पदीक्षितस्य कृतिः कुवलनंदः समाप्तः ७ ९

नां कुवलयानंदप्रकाशनविशारदां विदां कुर्वंतु विद्वांसः काव्यतत्वविदांवराः असौ कुवलयानंदश्चंद्रालोकोत्थितोपि सन् प्रतिष्ठां लभते नैव विनालंकारचंद्रिकाम् इति श्रीमत्पदवाक्यप्रमाणज्ञतत्सद्रामभट्टात्मजवैद्यनाथकृताऽलंकारचंद्रिकाख्या कुवलयानंदटीका संपूर्णा अष्टर्तुसप्तेंदुमिते शाके पूर्णाख्यपत्तने यत्नतः पाठशालायामंकितोऽयं शिलाक्षरैः ७ ७ १७६

अथालंकाराणामनुक्रमः

तत्रादौ शतमलंकाराः

176

कु०अ०क्र०	प०	अलंकाराः	प०	अलंकाराः	प०	अलंकाराः	प०	अलंकाराः	प०	अलंकाराः
१७५	१०८	४१ अधिकं	११३	५१ पर्यायः	१२२	६१ अर्थांतरंन्यासः	१३४	७१ अनुज्ञा	१४३	८१ उन्मीलितं
	१०८	४२ अल्पं	११५	५२ परिवृत्तिः	१२६	६२ विकस्वरः	१३५	७२ लेशः	१४३	८२ विशेषः
	१०९	४३ अन्योन्यं	११५	५३ परिसंख्यः	१२७	६३ प्रौढोक्तिः	१३७	७३ मुद्रा	१४४	८३ उत्तरं
	११०	४४ विशेषः	११५	५४ विकल्पः	१२८	६४ संभावना	१३८	७४ रत्नावली	१४५	८४ सूक्ष्मं
	११०	४५ व्याघातः	११६	५५ समुच्चयः	१२८	६५ मिथ्याध्यवसितिः	१४०	७५ तद्गुणः	१४६	८५ पिहितं
	१११	४६ कारणमाला	११७	५६ कारकदीपकं	१२९	६६ ललितं	१४०	७६ पूर्वरूपं	१४६	८६ व्याजोक्तिः
	११२	४७ एकावली	११७	५७ समाधिः	१३२	६७ प्रहर्षणं	१४१	७७ अतद्गुणः	१४७	८७ गूढोक्तिः
	११२	४८ मालादीपकं	११८	५८ प्रत्यनीकं	१३३	६८ विषादनं	१४१	७८ अनुगुणः	१४८	८८ विवृतोक्तिः
	११३	४९ सारः	११८	५९ काव्यार्थापत्तिः	१३३	६९ उल्लासः	१४२	७९ मीलितं	१५०	८९ युक्तिः
	११३	५० यथासंख्यं	११९	६० काव्यलिंगं	१३४	७० अवज्ञा	१४२	८० सामान्यं	१५०	९० लोकोक्तिः

१७५

प०	अलंकाराः
१५१	९१ छेकोक्तिः
१५२	९२ वक्रोक्तिः
१५३	९३ स्वभावोक्तिः
१५३	९४ भाविकं
१५३	९५ उदात्तं
१५४	९६ अत्युक्तिः
१५४	९७ निरुक्तिः
१५४	९८ प्रतिषेधः
१५५	९९ विधिः
१५६	१०० हेतुः

पंचदशालंकाराः

प०	अलंकाराः	प०	अलंकाराः
१५७	१ रसवान्	१६०	९ अनुमानं
१५८	२ प्रेयः	१६१	१० उपमानं
१५८	३ ऊर्जस्वित्	१६२	११ शब्दः
१५९	४ समाहितं	१६३	१२ अर्थापत्तिः
१५९	५ भावोदयः	१६४	१३ अनुलब्धि
१५९	६ भावसंधिः	१६४	१४ संभवः
१६०	७ भावशबलता	१६५	१५ ऐतिह्यं
१६०	८ प्रत्यक्षं		

उक्तालंकाराणांमेलने पृथक् पंचालंकाराः

प०		अलंकाराः
१६५	१	संसृष्ट्यलंकारः
		संकरालंकारे
१६६	२	अंगांगिभावसंकरः
१६७	३	समप्राध्यान्यसंकरः
१६९	४	संदेहसंकरः
१७०	५	एकवाचकानुप्रवेशसंकरः

इतिचंद्रिकासहितकुवलयानंदः समाप्तः ७

178

[OrderDescription]
,CREATED=10.09.20 10:57
,TRANSFERRED=2020/09/14 at 10:55:48
,PAGES=353
,TYPE=STD
,NAME=S0003600
,Book Name=M-931-KUVLAYANAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF

FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF

FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF

FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF

FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF

FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF

FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF

FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF

FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF

FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF

FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF

FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF

FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF

FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF

FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF

FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF

FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF

FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF

FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF

FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF

FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF

FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,